...the ...on'ble the Vice-Chancellor and the Syndicate of the Calcutta University for the I. A. Examination of 1918.
...uthorised by the Hon'ble the Director of public Instruction, Bengal ...e in Schools and Colleges as a Library and Prize book.
...Text-book for the Adya and Madhya Examinations in Sanskrit by the Eastern Bengal Saraswata Samaja, Dacca.

पाणिनि-परिशिष्टम्

अध्यापक-श्रीदेवेन्द्रकुमार-विद्यारत्न
एम. ए., एम्. आर. ए. एस्., वन्द्योपाध्यायेन
संकलितम्।

ढाका-सिटि-लाइब्रेरीय-श्रीनगेन्द्रकुमार-रायेण
प्रकाशितञ्च।

मूल्यम्—पादोन-रौप्यकम्।

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

पाणिनि-परिशिष्टम्

अध्यापक-श्रीदेवेन्द्रकुमार-विद्यारत्न
एम. ए., एम्. आर. ए. एस्., वन्द्योपाध्यायेन
संकलितम् ।

ढाका-सिटि-लाइब्रेरीय-श्रीनगेन्द्रकुमार-रायेण
प्रकाशितञ्च ।

मूल्यम्—पादोन-रौप्यकम् ।

Printed by
Jogesh Chandra Adhikary
At the
METCALFE PRESS
76, Balaram De Street, Calcutta.

PREFACE.

सुप्-तिङन्तं पदम् 'Parts of speech are those that end in Declensional and Conjugational suffixes' and नापदं शास्त्रे प्रयुञ्जीत 'Do not use what is not a part of speech' run the popular sayings.

The object of this volume is to present before the readers a comprehensive treatise on Declensions and Conjugations of Sanskrit words and roots with copious references calculated to stimulate a curiosity for analysing them and to indicate those *Panini Sutras* which have the widest application.

Accordingly, this volume is divided mainly into two parts, *viz.* शब्दखण्ड 'Words' and धातुखण्ड 'Roots.' The former comprises लिङ्गानुशासन 'Genders of words' and शब्दरूप 'declensions' the Chapter on Genders opens with the *famous verses* of *Amara* on the subject with foot-notes, embodying very useful things which could be most easily remembered at the time of Sanskrit Composition, for instance, genders of the names of the different parts of the human body. The शब्दरूप-प्रकरण which follows gives the declensions of almost *every type* of words beginning with अकारान्त and ending with हकारान्त words of all the genders.

The धातुखण्ड opens with the धातुपाठ which is a complete Register of the full names of all the roots in the Sanskrit vocabulary with their meanings, (the important roots being marked with asterisks and followed by their लट् 3rd pers. sing. forms). The roots of the भ्वादि class are classified into तवर्गीयान्त, कवर्गीयान्त, अनुनासिकान्त e.t.c.—a classification which is purely Indian and is different from a list of roots in the alphabetical order. The धातुपाठ is followed by full conjugations of some important roots in लट् 'Present' लोट् 'Imperative', लङ् 'Past' विधिलिङ् 'Potential', लृट् 'Future' and लृङ् 'Subjunctive',—tenses and moods which are essentially necessary for Sanskrit Composition. These paradigms are followed by copious exercises.

लुङ्, लिट्, लुट् and आशीर्लिङ् have been classified and separately dealt with.

I must acknolwedge my indebtedness to Kale's *Higher Sanskrit Grammar*, and Thatte and Raverkar's *Subanta-rupa-Kaumudi* for the valuable help which I have recieved from them in the compilation of this book.

I am deeply gratefull to the Hon'ble the Vice-Chancellor and the Syndicate and the Board of Studies in Sanskrit of the Calcutta University as well as to many other learened bodies for their having highly encouraged me to bring out the present edition in the Deva-Nagari characters, by adopting this volume as a Book of Reference for the Students of the Schools, Colleges and *Tols*.

DATED
THE PANINI COTTAGE,
AZIMPURA, DACCA,
The 1st July 1916.

DEVENDRA-KUMAR BANERJI.

पाणिनि-परिशिष्टम् ।

लिङ्गानुशासनम् ।

पुंलिङ्गाः ।

१ । पुंस्त्वे स-भेदाऽनुचराः स-पर्य्यायाः सुरा-ऽसुराः ।
स्वर्गं-यागा-ऽद्रि-मेघा-ऽब्धि-द्रु-काला-ऽसि-शरा-ऽरयः ॥

२ । कर-गण्डौ-ष्ठ-दोर्-दन्त-कण्ठ-केश-नख-स्तनाः ।
अह्ना-ऽह्नान्ताः ध्वड्-भेदा रात्रान्ताः प्राग्-असंख्यकाः ॥

१ । २ । देवतानाम् असुराणाञ्च सामान्य-नामानि, विशेष-नामानि, अनुचर-नामानि च, पुंल्लिङ्गानि भवन्ति । स्वर्गप्रभृतीनाम् एकोनविंशति-संख्यकानां सामान्य-विशेष-नामानि च पुंल्लिङ्गानि भवन्ति ।

सुर-पर्य्यायाः यथा, अमराः निर्जराः देवा स्त्रिदशाः विबुधाः सुराः । वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् । **असुर-पर्य्यायाः** यथा, असुरा दैत्य-दैतेय-दनुजे-न्द्रारि-दानवाः । **देवता-विशेषो** यथा, मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः । कार्त्तिकेयो महासेनः शरजन्मा षड़ाननः । शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः । विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टर-श्रवाः । इन्द्रः वरुणः शक्रः सूर्य्यः आदित्यः । **देवानुचराः**—हाहाः, मातलिः नारदः तुम्बुरुः भरतः देवलः । **दैत्यभेदाः**—बलिः नमुचिः, **असुरानुचराः**—मुण्डः, कुम्भाण्डः कुष्माण्डः ।

(१) **स्वर्गो** नाक, स्त्रिदिवश्च । (२) **यागो** यज्ञो मखः क्रतुः, अध्वरः । **यागभेदा** अश्वमेधः, अग्निष्टोमः । (३) **अद्रिर्गोत्रो** गिरिर्ग्रावाऽचलः शैलः शिलोच्चयः । **तद्भेदाः** विन्ध्यः सह्यो हिमवान् मेरुः । (४) (अभ्रं) **मेघो** वारिवाहः स्तनयित्नु र्बलाहकः । धाराधरो जलधर स्तड़ित्वान् वारिदोऽम्बुभृत् । जीमूतो मुदिरो घनः । (५) समुद्र—उदन्वान् उदधिः सिन्धुः सरस्वान् सागरोऽर्णवः । **तद्भेदाः**—

---

१ । (स्वर्ग) विविष्टप-त्रिभुवने नपुंसके । तृतीयं विष्टपं त्रिविष्टपं स्वर्गः । द्यौः स्त्रियाम् ।

१ । (शर) बाण-काण्डौ नपुंसके च ।

(मेघ) अभ्रं नपुंसकम् ।

१ । दिनाहनी नपुंसके ।

२ । दीधितिः स्त्रियाम् ।

३। क-ष-ण-भ-म-रोपान्ता यद्यश्रदन्ता अमी अथ।

प-थ-न-य-स-टोपान्ता गोत्राख्याश्चरणाह्वयाः॥

क्षीरोदः लवणोदः। (६) द्रुः द्रुमः—वृक्षो महीरुहः शाखी, विटपी पादपस्तरुः। (७) **कालो** दिष्टोऽप्यनेहाऽपि समयोऽपि—**तद्भेदाः** पक्षो मास ऋतुः। (८) **असिः** खड्गः करवालः कृपाणश्च कौक्षेयकः **तद्भेदः,** चन्द्रहासः। (९) **शरो** वाणो मार्गणश्च विशिख आशुगस्तथा। **तद्भेदाः,** नाराचः काण्डः भल्लः। (१०) शत्रुः—रिपुर्वैरी सपत्नोऽरि द्विषद्द्वेषण-दुर्हृदः। **तद्भेदः** आततायी। (११) रश्मिः **कर** उस्रो मयूखोऽंशुर्गभस्तिर्घृणिः किरणः। भागधेयः **करो**वलिः (राजग्राह्यः भागः)। करः पाणि हस्तश्च। (१२) **गण्डः** कटः कपोलश्च। (१३) **ओष्ठः** अधरः दन्तच्छदः रदनच्छदश्च। (१४) भुजो बाहुः प्रवेष्टो **दोः**। (१५) रदनो दशनो **दन्तः**। (१६) **कण्ठो** गलः। (१७) चिकुरः कुन्तलो बालः, कचः **केशः** शिरोरुहः। (१८) पुनर्भवः कररुहो **नखो**ऽस्त्री नखरोऽस्त्रियाम्। (१९) **स्तनः** कुचः पयोधरः। 'रावाद्धाहाः पुंसि' पाणिनिः २। ४। २९। क्ष्वेडस्तु गरलं विषम् इत्यमरः। क्ष्वेड-भेदाः सौराष्ट्रिकः शौक्लिकेयः इत्येवमादयो विष-भेदाः इत्यर्थः।

३। ककार प्रभृति-षड् वर्णोपध-शब्दाः पकार-प्रभृति-षड्-वर्णोपध शब्दाश्च, अकारान्ताश्चेत्, पुंलिङ्गा भवन्ति। 'अलोऽन्त्यात् पूर्व्व उपधा।' गोत्राणाम् आदि-पुरुष-नामानि प्रवर-नामानि वेद-शाखा-नामानि च

३। (कोपधः) (१) चिवुक-शालूक-प्रातिपदिकांऽशुको-ल्मुकानि नपुंसके।

(२) कण्टकाऽनीक-सरक मोदक-चषक-मस्तक-पुस्तक-तड़ाक-निष्क-शुष्क-वर्च्चस्क-पिनाक-भाण्डक-कटक-शण्डक-पिटक-तालक-फलक-कल्क-पुलाकानि नपुंसके च। अयं कटकः इदं कटकम्।

(टोपधः) (१) किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टानि नपुंसके।

(२) कुट-कूट-कपट-कवाट-कर्पट-नट निकट-कीट-कटानि नपुंसके च। कूटः कूटम्।

(णोपधः) (१) ऋण-लवण पर्ण-तोरण-रणोष्णानि नपुंसके।

(२) कार्षापण-स्वर्ण-सुवर्ण-व्रण-चरण-वृषण-विषाण चूर्ण तृणानि नपुंसके च।

(थोपधः) (१) काष्ठ-पृष्ठ-सिक्थो-क्थानि नपुंसके। इदं काष्ठम्।

(२) काष्ठा दिगर्था स्त्रियाम्। इमाः काष्ठाः।

(३) तीर्थ-प्रोथ-यूथ-गाथानि नपुंसके च। अयं तीर्थः, इदं तीर्थम।

(नोपधः) (१) जघना-ऽजिन-तुहिन-कानन-वन-वृजिन-विपिन-वेतन-शासन-सोपान-मिथुन-श्मशान-रत्न-निम्न-चिह्नानि नपुंसके।

(२) मान-याना-ऽभिधान-नलिन-पुलिनो-द्यान-शयना-ऽऽसन-स्थान-चन्दना-ऽऽलान-समान भवन-वसन-सम्भावन-विभावन-विमानानि नपुंसके च। अयं मानः, इदं मानम्।

३। (पोपधः) (१) पाप-रूपो डुप-तल्प-शिल्प-पुष्प-शष्प-समीपा-ऽन्तरीपाणि नपुंसके।

(२) शूर्प-कुतप-कुणप द्वीप-विटपानि नपुंसके च। अयं शूर्पः, इदं शूर्पम्।

(भोपधः) (१) तलभं नपुंसकम्।

(२) जम्भं नपुंसके च।

४ । नाम्न्यकर्त्तरि भावे च घञ्-अज्-अप्-नङ्-ण-घाऽथुचः । ल्युः कर्त्तरि, मनिज् भावे, को, घोः कि (प्रादितोऽन्यतः) ॥

पुंलिङ्गानि भवन्ति । **क,** स्तवकः कल्कः (पापं) अङ्कः लोकः अर्कः । **ष,** वृषः वृक्षः माषः तुषः रोषः । **ण,** गुणः गणः पाषाणः घुणः द्रोणः । **भ,** स्तम्भः कुम्भः दर्भः शरभः गर्द्दभः । **म,** सोमः भीमः होमः ग्रामः धूमः । **र,** क्षुरः अङ्कुरः झर्झरः शीकरः (जल-कणा) समीरः । **प,** यूपः दीपः सर्पः कूपः, सूपः कलापः । **थ,** रथः सार्थः नाथः शपथः । **न,** इनः फेनः जनः अपघनः (३ । ३ । ८१) । **य,** समयः हयः । **स,** वत्सः, वायसः, रसः, हासः, पनसः । गोत्र-नामानि, शाण्डिल्यः गौतमः, देवलः, वशिष्ठः, भरद्वाजः ।

४ । नामार्थे कर्म्मादि-वाच्ये भाववाच्ये च विहिता ये घञ्-प्रभृतयः सप्त कृत्-प्रत्ययाः, तदन्ताः शब्दाः पुंल्लिङ्गा भवन्ति । कर्तरि वाच्ये ल्यु-प्रत्ययान्तः शब्दः, भाववाच्ये च इमनिच्-प्रत्ययान्तः शब्दः पुंल्लिङ्गो भवति । क-प्रत्ययान्तः, (दा-धा-धात्वोः) कि-प्रत्ययान्त-शब्दश्च पुंल्लिङ्गो भवति । **घञ्** पाकः त्यागः **अच्,** चयः, जयः ।

(मोपधः) (१) रुक्म-सिध्म-युग्म-ध्म-गुल्मा-ऽध्यात्म-कुङ्कुमानि नपुंसके ।

(२) संग्राम-दाडिम कुसुमा-ऽऽश्रम-क्षेम-क्षौम-होमो-द्दामानि नपुंसके च । अयं संग्रामः इदं संग्रामम् ।

३ । (योपधः) (१) किशलय-हृदये-न्द्रियो-त्तरीयाणि नपुंसके ।

(२) गोमय-कषाय-मलया-ऽन्वया-ऽव्ययानि नपुंसके च । गोमयः गोमयम् ।

(रोपधः) (१) द्वारा-ऽग्र-स्फार-तक्र-वक्र-वप्र-क्षिप्र-क्षुद्र-छिद्र-नार-तीर-दूर-कृच्छ्र-रन्ध्रा-श्र-श्वभ्र-भीर-गभीर-क्रूर-विचित्र-केयूर-केदारो-दर-शरीर-कन्दर-मन्दर-पञ्जरा-ऽजर-जठरा-ऽजिर-वैर-चामर-पुष्कर-गह्वर-कुहर-कुटीर-कुलीर-चत्वर-काश्मीर-नीरा-ऽम्बर-शिशिर-तन्त्र-यन्त्र-क्षत्र-क्षेत्र-मित्र कलत्र छत्र-मूत्र-वक्त्र-नेत्र-गोत्राऽङ्गुलित्र-भलत्रा-ऽस्त्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्र-नक्षत्राणि नपुंसके । इदं द्वारम् ।

(२) शुक्रम् अ-देवतायाम् । इदं शुक्रं (रेतः) ।

(३) चक्र-वज्रा-ऽन्धकार-सारा-ऽवार-पार-क्षीर-तोमर-शृङ्गार-भृङ्गार-मन्दारो-शीर-तिमिर-शिशिराणि नपुंसके च । चक्रः चक्रम् ।

३ । (षोपधः) (१) शिरीष-र्जीषा-ऽम्बरीष-पीयूष-पुरीष-किल्बिष-कल्माषाणि नपुंसके ।

(२) यूष-करीष-मिष-विष-वर्षाणि नपुंसके च । अयं यूषः, इदं यूषम् ।

३ । (सोपधः) पनस-बिस-बुस-साहसानि नपुंसके ।

चमस-सरस-निर्यासो-पवास-कार्पास-वास-मास-कास-कांस-मांसानि नपुंसके च । इदं चमसम् अयं चमसः ।

कंसं चा-ऽप्राणिनि । कंसोऽस्त्री पान-भाजनम् । प्राणिनि तु कंसो नाम कश्चिद्राजा ।

३ । स्थूणोर्णे नपुंसके च । स्थूणा (काष्ठमयी द्विकर्णिका) स्थूणम्, ऊर्णा (मेषादि-लोम) ऊर्णम् ।

गृह-मेषाभ्यां क्लीबे । गृह-पूर्व्वकः स्थूणा शब्दः, मेष-पूर्व्वकश्च ऊर्णा-शब्दः क्लीबलिङ्गो भवति । गृह-स्थूणम्, मेषोर्णं मेष-लोमनि इत्यमरः ।

४ । (अच्) भय-लिङ्ग-भग-पदानि नपुंसके । भयं लिङ्गं भगं पदम् ।

(नङ्) याच्ञा स्त्रियाम् ।

(कि) इषुधिः स्त्री च ।

५। (१) नान्तः। राजा तक्षा।
(२) उकारान्तः। प्रभुः इक्षुः।
(३) रुत्वन्तः। मेरुः, सेतुः।
(४) आत्म-पङ्काभिधानानि। चेत्रज्ञ आत्मा पुरुषः। पङ्कः, कर्दमः।
(५) पुरुष-गुल्फ-नामानि। पुरुषो नरः, गुल्फः प्रपदम्।
(६) मानाभिधानानि। कुडवः, प्रस्थः।
(७) दारा-ऽचत-लाजा-ऽसूनां बहुत्वञ्च। इमे दाराः।
(८) नाड्य-अप-जनो-पपदानि-व्रणा-ऽङ्ग-पदानि। यथासंख्यम्। नाड़ी-व्रणः, अपाङ्गः जन-पदः।
(९) मरुद्-गरुत्-तरद्-ऋत्विजः। अयं मरुत्।
(१०) ऋषि-राशि-दृति-ग्रन्थि-क्रिमि- ध्वनि-बलि- कौलि-मौलि-रवि-कवि-कपि-मुनयः। अयम् ऋषिः।
(११) ध्वज-गज-मुञ्ज-पुञ्जाः। एष प्रजा-पुञ्जः।
(१२) हस्त-कुन्ता-ऽन्त-व्रात-वात-दूत-धूर्त्त-सूत-चूत-मुहूर्त्ताः। अयं दूतः।
(१३) षण्ड-मण्ड-करण्ड-भरण्ड वरण्ड-तुण्ड-मुण्ड-पाषण्ड-शिखण्डाः। एष षण्डः।
(१४) वंशा ऽंश-पुरोडाशाः। एष वंशः।
(१५) ह्रद-कन्द-कुन्द-बुद्बुद-शब्दाः। अयं ह्रदः।
(१६) अर्घं पथि-मथ्-ऋभुक्षि-स्तम्ब-नितम्ब-पूगाः। अयम् अर्घः।

अप्, करः गरः। नङ्, यत्नः यज्ञः। नन्, स्वप्नः। ण, श्वासः। घ, परिच्छदः। अथुच्, वेपथुः। ल्यु, नन्दनः रमणः मधुसूदनः। इमनिच्, लघिमा गरिमा महिमा अणिमा। क, प्रस्थः। कि, विधिः निधिः जलधिः। प्रादितोऽन्यतः इत्येतत् चिन्त्य-प्रयोजनम् इत्याहुः।

५। (१) धेनु-रज्जु-कुहू-सरयू-तनु-रेणु-प्रियङ्गवः स्त्रियाम्। समासे रज्जुः पुंसि च।
(२) श्मश्रु-जानु-स्वादु-अश्रु-जतु-त्रपु-तालूनि नपुंसके।
(३) वसु चार्थवाचि।
(४) मद्गु-मधु-शीधु-सानु-कमण्डलूनि नपुंसके च। अयं मद्गुः, इदं मद्गु।
(५) दारु-कसेरु-जतु-वस्तु-मस्तूनि नपुंसके।
(६) सक्तुर्नपुंसके च।
(७) इषु-बाहू स्त्रियाञ्च।
५। द्रोणाढकौ नपुंसके च। इदं द्रोणम्, अयं द्रोणः।
खारी-मानिके स्त्रियाम्। इयं खारी, इयं मानिका।

(१७) पल्लव-पल्वल-कफ-रेफ-कटाह-निर्व्यूह-मठ-मणि-तरङ्ग-तुरङ्ग-गन्ध-स्कन्ध-मृदङ्ग-सङ्ग-समुद्र-पुङ्खाः । अयं पल्लवः ।

(१८) सारथ्य-अतिथि-कुक्षि-वस्ति-पाण्य-अञ्जलयः । रचितोऽञ्जलिर्वः ।

स्त्रीलिङ्गाः ।

६ । स्त्रियाम् ईद्-ऊद्-विरामैकाच् स-योनि प्राणिनाम तु ।
नाम विद्युन्-निशा-वल्ली-वाणी-दिग्-भू-नदी-ह्रियाम् ॥ १

७ । स्त्री-भावादाव् अनि-क्तिण्-ण्वुल्-णच्-ण्वुच्-क्यव्-युज्-इञ्-अङ्-नि-शाः ।
उणादिषु निर्-ऊर्-ईश्च ङ्याव् ऊङन्तं चलं स्थिरम् ॥ २

८ । तल्, द्वन्द्वे ये, नि-कच्य-त्रा, वैर-मैथुनिकादि-वुन् ॥
अदन्तो द्विगुरेकार्थो, न स पात्र-युगादिभिः ॥ ३

६ । ७ । ईकारान्त ऊकारान्तश्च एकाक्षरः शब्दः स्त्रीलिङ्गी भवति । योनियुक्त-प्राणिनां नामाऽपि स्त्रीलिङ्गं भवति । विद्युत्-प्रभृति-वाचक-शब्दाः स्त्रीलिङ्गा भवन्ति । स्त्रियाम् (३।३।९४) इति, भाववाच्ये कर्त्तृभिन्नवाच्ये च विहिता ये अनि-प्रभृत्येकादश-प्रत्यया, तदन्ताः शब्दाः, उणादिप्रत्ययान्ता नि-भागान्ताः ऊकारान्ता ईकारान्ताश्च शब्दाः, ङी-प्रत्ययान्ता आप्-ऊङ् प्रत्ययान्ताश्च शब्दाः स्त्रीलिङ्गा भवन्ति । **ई,** श्रीः धीः ह्रीः । **ऊ,** भ्रूः भूः । माता दुहिता स्त्री वनिता योषित् । **विद्युत्,** तड़ित्, **निशा** रात्रिः रजनी, **वल्ली** व्रतिः लता, **वाणी** वाक् गीः गौः (वीणेति पाठान्तरम्) **दिक्** आशा ककुप्, **भुः** पृथिवी धरा कुः, **नदी** स्रोतस्वती मन्दाकिनी, सरित् निम्नगा, **ह्रीः** लज्जा त्रपा व्रीड़ा । **अनि** (३।३।११२) अजीवनिः अजननिः अकरणिः । **क्तिन्,** कृतिः धृतिः नीतिः मतिः । **ण्वुल्** प्रवाहिका, प्रच्छर्दिका । **णच्** व्यावक्रोशी व्यात्युक्षी । **ण्वुच्** शायिका इक्षु-भक्षिका । **क्यप्** विद्या इज्या । स्त्रीभावादौ किम् ? भवीयम् ब्रह्मभूयम् **युच्** धारणा कामना । **इञ्,** कां त्वं कारिं गणिं वाऽकार्षीः ? **अङ्** पचा त्रपा भिदा छिदा; **अ,** पुत्रीया चिकीर्षा । ईहा ऊहा । 'ग्ला-म्ले ति,' **निः** ग्लानिः म्लानिः । **श,** क्रिया इच्छा । **नि,** श्रेणिः श्रोणिः द्रोणिः । अनिः इति पाठान्तरे, धरणिः धमनिः सरणिः । **ऊ,** चमूः । **ई,** कदली कन्दली । लक्ष्मीः अवीः तरीः । ङी = ङीन्ङीप्ङीष् । आप् = चाप्, डाप्, टाप् । ऊङ् ।

८ । **तल्,** सरलता मृदुता साधुता, ग्रामता जनता । द्वन्द्वे—**य,** पथ्या । **इनि,** शाकिनी, खलिनी । **कच्य,** रथ-कच्या, **त्र,** गोत्रा । वैरमैथुनिकयोः (४।३।१२५) **वुन्** काकोलूकिका, अत्रिभरद्वाजिका ।

---

५ । सीरार्थौदनाः पुंसि ।

६ । यादो नपुंसकम् । यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात् ।

७ । वह्नि-वृष्ण्य-अग्नयः पुंसि ।

७ । श्रोणि-योन्य्-ऊर्म्मयः पुंसि च । इयम् अयं वा श्रोणिः

८ । द्विगुः स्त्रियाञ्च । व्यवस्थया त्रिलोकी, त्रिभुवनम् ।

९। आपः सुमनसो वर्षा अप्सरः-सिकता-समाः।
एते स्त्रियां बहुत्वे स्युर् एकत्वेऽ पुरुत्तरे त्रयः॥

१०। (१) ऋकारान्ता मातृ-दुहितृ-स्वसृ-ननान्दरः। ऋकारान्ता एते एव स्त्रीलिङ्गाः भवन्ति।

(२) विंशत्यादिर् आ नवतेः। इयं विंशतिः। त्रिंशत् चत्वारिंशत्, पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः।

(३) दुन्दुभिर् अक्षेषु। इयं दुन्दुभिः। अक्षेषु किम्? अयं दुन्दुभिर्वाद्य-विशेषः असुरो वा। अन्यत्र पुंस्येव।

(४) नाभिर् अ-क्षत्रिये। इयं नाभिः। नाभिः क्षत्रियः।

(५) भाः-स्रुक्-स्रग्-दिग्-दृग्-उष्णिग्-उपानहः। एते स्त्रीलिङ्गा भवन्ति।

(६) दर्व्वि-विदि-वेदि-खनि-शान्य्- अश्रि-वेशि- कृष्-ओषधि-कट्य-अङ्गलयः। एते स्त्रियां स्युः।

(७) प्रावृड्-विप्रुड्-रुट्-त्वड्-विट्-त्विषः। एते स्त्रियां स्युः।

(८) तिथि-नाड़ि-रुचि-वीचि-नालि-धूलि-किकि-केलि-च्छवि-रात्र्यादयः।

(९) प्रतिपद्-आपद्-विपत्-सम्पच्-छरत्-संसत्-परिषद्-उषः-संवित्-क्षुत्-पुन्-मुत्-समिधः। स्त्रियां स्युः। इयं प्रतिपत्।

(१०) शष्कुलि-राजि-कुट्य-अशनि-वर्त्ति-भ्रुकुटि-त्रुटि-वलि-पङ्क्तयः। एते स्त्रियां स्युः।

(११) आशी-धूः-पूर्-गीर्-द्वारः। इयम् आशीः।

(१२) स्रक्-त्वग्-ज्योग्-वाग्-यवागू-नौ-स्फिचः। इयं स्रक्, इयं त्वक्, इयं स्फिक्।

(१३) त्रुटि-सीमा-संबध्याः। इयं त्रुटिः

(१४) चुल्लि-वेणि-खार्य्यश्च। स्त्रियां स्युः।

(१५) तारा-धारा-ज्योत्स्नादयश्च।

आदि-शब्द-ग्रहणात् द्विपदिकां ददाति, द्विपदिकां दण्डितः। वुञोऽपि ग्रहणम् उपलक्षितम्। शैष्योपाध्यायिका गार्गिकया श्लाघते। द्विगुः पाः २।४।१ द्रष्टव्यम्।

९। अप्-प्रभृति-षट्-शब्दाः स्त्रीलिङ्गा नित्यं बहुवचनान्ताश्च भवन्ति। अप्सरः-प्रभृतयः क्वचित् एकत्वेऽपि भवन्ति। इमा आपः। भूम्नि स्त्रियां सुमनसः (पुष्पम् इत्यर्थः)। देववाची सुमनःशब्दस्तु पुंलिङ्गएव, सुपर्व्वाणः सुमनसः। वर्षासु वृष्टि र्भवति। शाश्वतीः समाः, समां समां (समायां समायां वा) विजायते।

(१६) शलाका स्त्रियां नित्यम् । -नित्य-शब्दोल्लेखः अन्येषां क्वचिद् व्यभिचारं ज्ञापयति ।

क्लीवलिङ्गाः ।

११ । द्वि-हीने ऽन्यच्च खा‍ऽरण्य-पर्ण-श्वभ्र-हिमो-दकम् ।
शीतोष्ण-मांस-रुधिर-मुखाक्षि-द्रविणं बलम् ॥ १

१२ । फल हेम-शुल्व-लोहं सुख-दुःख-शुभा-ऽशुभम् ।
जल-पुष्पाणि लवणं व्यञ्जनान्य् अनुलेपनम् ॥ २

१३ । कोट्याः शतादिः संख्याऽन्या, वा लक्षा नियुतञ्च तत् । ३

१४ । द्व्यच्कम् अस्-इस-उस् अन् अन्तं यद् अना-ऽन्तम् अ-कर्त्तरि ।
त्रान्तं स-लोपधं शिष्टं, रात्रं प्राक् संख्ययाऽन्वितम् । ४

११ । १२ । १३ । अन्यत् (पूर्व्वोक्त-संग्रहात् अवशिष्टम्) आकाश-वन-प्रभृत्यर्थकं ःपदम् द्विहीने (स्त्री-पुंसाभ्यां भिन्ने लिङ्गे) क्लीवे भवति । कोटी-शब्द-भिन्ना शतादिः संख्या क्लीवे भवति । **ख,** अभ्रं व्योम पुष्करम् अम्बरम । नभोऽन्तरिक्षं गगनम् अनन्तं सुरवर्त्म **खम्** । वियद् विष्णुपदं वा तु पुंस्य् आकाश-विहायसी । **अरण्यं** विपिनं, गहनं काननं वनम् । पत्रं पलाशं छदनं दलं **पर्णं** छदः पुमान् । कुहरं, शुषिरं विवरं विलम् । छिद्रं निर्व्यथनं रोकं रन्ध्रम् । प्रालेयं तुहिनं **हिमम्** । कबन्धम् **उदकं** पाथः पुष्करं सर्व्वतोमुखम् । अम्भो-ऽर्णस्तोय-पानीयम् । **शीतं** हिम-गुणे क्लीवम् । **उष्णम्** । उष्णो ग्रीष्मे पुमान् । पिशितं तरसं **मांसं** पललं क्रव्यम् आमिषम् । **रुधिरम्** असृक् लोहितम् अस्रं रक्तं क्षतजं शोणितम् । वक्त्रास्ये वदनं तुण्डम् आननं लपनं **मुखम्** । लोचनं नयनं नेत्रम् ईक्षणं चक्षुरक्षिणी । द्रव्यं वित्तं स्वापतेयं रिक्थम् ऋक्थं धनं वसु । हिरण्यं **द्रविणं** द्युम्नम् । वीर्य्यम् द्रविणं तरः-सहो-**बल**-शौर्य्याणि स्थाम शुष्मञ्च । आम्रम् आमलकं **फलम्** । स्वर्णं सुवर्णं कनकं हिरण्यं **हेम** हाटकम् । ताम्रकं **शुल्वम्** । लोहोऽस्त्री शस्त्रकं **लोहम्** । **सुखं** शर्म्म । **दुःखं** कष्टम् । श्वः-श्रेयसं शिवं भद्रं कल्याणं मङ्गलं **शुभम्** । **अशुभम्** । वारि, **पुष्पं** कुसुमम् । जलज-पुष्पं वा । **व्यञ्जनम्** अन्नम् अशनम् । शतं सहस्रम् अयुतं नियुतं प्रयुतं मतम् ।

१४ । कर्त्तृभिन्न-वाच्ये विहितः, अस्-भागान्तः इसभागान्तः उस्-भागान्तः अन्-भागान्तः शब्दश्च, द्व्यचश्चेत्.

---

११ । वक्त्र-नेत्राऽरण्य-गाण्डीवानि पुंसि च । वक्त्रो वक्त्रम्, नेत्रो नेत्रम् ।
अरण्यः अरण्यम् । गाण्डीवो गाण्डीवम् ।

११ । अटवी स्त्रियाम् ।

१४ । अर्चिः स्त्रियाञ्च । इस्-अन्तत्वेऽपि अर्चिः स्त्रियां नपुंसके च स्यात् ।

१४ । छदिः स्त्रियाम् एव । इयं छदिः । पटलं छदिरित्यमरः ।

१४ । रात्राह्नाहाः पुंसि । पूर्व्वाह्णः, अपराह्णः ।

१७ । तूलोपल-ताल-कुसूल-तरल-कम्बल-देवल-वृषलाः पुंसि । अयं तूलः ।

१५। भावे न-ण-क-चिद्भ्योऽन्ये समूहे भाव-कर्म्मणोः।
अदन्त-प्रत्ययाः पुण्य-सुदिनाभ्यां त्वहः परः॥

१६। द्वन्द्व कत्वा-ऽव्ययीभावौ पथः संख्या-ऽव्ययात् परः।
षष्ठ्याश्छाया बहूनां चेद् विच्छायं, संहतौ सभा॥

१७। शालार्थापि परा, राजाऽमनुष्यार्थाद् अ-राजकात्।
दासी-सभं नृप-सभं रक्षः-सभम् इमा दिशः॥

१८। उपज्ञोपक्रमान्तश्च तदादित्व-प्रकाशने।
कोपज्ञ-कोपक्रमादि कन्थोशीनर-नामसु॥

क्लीवलिङ्गो भवति। कर्त्तृभिन्न-वाच्ये विहितः अन-भागान्तः शब्दः क्लीवे भवति। त्र-शब्दान्तः, सकारोपधः लकारोपधश्च शब्दः, शिष्टः अबाधितश्चेत्, क्लीवलिङ्गो भवति। संख्यापूर्व्वं रात्रं क्लीवलिङ्गं भवति। **अस्,** यशः मनः तपः पयः तेजः। **इस्,** सर्पिः हविः **उस्,** धनुः वपुः यजुः। **अन्,** वर्म्म चर्म्म कर्म्म नाम रोम। अकर्त्तरि किम्? ददाति इति दाता। **अन** (ल्युट्) गमनं पचनं मारणं हसनम्। **त्र,** दात्रं मात्रं गात्रं पात्रं वस्त्रम् अस्त्रं शस्त्रं पत्रं छत्रं मित्रम्। **सोपधः,** विसं, वुसम्। **लोपधः,** कुलं कूलम् स्थूलम् स्थलम् हलं लाङ्गलम्। अबाधितः किम्? पुत्रः छात्रः छत्रः मन्त्रः, हंसः कंसः, शालः कालः। संख्यापूर्व्वं रात्रं क्लीवम्, द्विरात्रं त्रिरात्रं पञ्चरात्रम्।

१५। न-प्रत्ययात् ण-प्रत्ययात् क-प्रत्ययात् चकार-लोपि-प्रत्ययाच्च भिन्नाः, भाव-वाच्य-विहिताः कृत्-प्रत्ययाः ये सन्ति तदन्ताः, समूहार्थे भावार्थे कर्म्मार्थे च ये तद्धितप्रत्ययाः सन्ति तदन्ताश्च अकारान्त-शब्दाः क्लीवलिङ्गा भवन्ति। पुण्याह-सुदिनाह-शब्दौ च क्लीवलिङ्गौ भवतः। क्त, पा ३।३।११४, हसितं गीतम् भूतं भुक्तं गतम्; भवितव्यं भवनीयम् पा ३।४।७०। ब्रह्मभूयम् ३।१।१०७, ल्युट् छेदनं भेदनं कारणम्। मन् कर्म्म, चर्म्म। समूहे ४।२।३८ भैक्षम् औपगवकं काकम्। भाव-कर्म्मणोः ब्राह्मणादिगुणवचनेभ्यश्च त्व-ष्यञौ तद्धितौ— पाण्डित्यं ब्राह्मणत्वम् मौनं मार्द्दवं मृदुत्वम्। एवं यद्-य-ढग्-यग्-अञ्-अण्-वुञ्। पुण्यञ्च तद् अहश्चेति पुण्याहम्। सुदिन-शब्दः प्रशस्तवाची, सुदिनञ्च तद् अहश्चेति सुदिनाहम्।

१६—१८। समाहार-द्वन्द्वः अव्ययीभावश्च क्लीवे स्यात् (२।४।१७—१८)। कृत-समासान्तः संख्या-पूर्व्वकः अव्यय-पूर्व्वकश्च पथिन्-शब्दः, छाया-शब्दान्तः षष्ठी-तत्पुरुषः (सा चेत् छाया बहूनां भवति), समूहार्थक-सभा-शब्दान्तः षष्ठी-तत्पुरुषश्च क्लीवे भवति। द्विपथं त्रिपथं विपथं कापथम्। छाया पा २।४।२२, समूहे २।४।२४ द्रष्टव्यम्। संहतौ किम्? धर्म्मसभा (धर्म्मशाला)।

तत्पुरुष-समासे राजन्-शब्द-भिन्नात् नृप-वाचकशब्दात् राक्षस-पिशाचादि-वाचकाच्च शब्दात् परवर्त्ती गृहार्थक-सभा-शब्दः क्लीवे भवति। प्रभु-सभम्, पिशाच-सभम्। राज-सभा। राज-नाम्नः निषेधात्, नेह, चन्द्रगुप्त-सभा। चन्द्रगुप्तः राज-विशेष इत्यर्थः। उपज्ञा उपक्रमः। पा २।४।२१ द्रष्टव्यम्। कस्य (प्रजापतेः) उपज्ञा उपक्रमश्च कोपज्ञं कोपक्रमम्। कन्था २।४।२० द्रष्टव्यम्।

१९। क्रियाऽव्ययानां भेदकान्य् एकत्वेऽ प्युक्थ-तोटके।
राजसूयं वाजपेयं गद्य-पद्ये कृती कवेः ॥

१९। क्रियाविशेषणम् अव्ययस्य विशेषणञ्च क्लीवलिङ्गं भवति। उक्थं साम-विशेषः, तोटकं द्वादशाक्षर पादविशिष्टं छन्दः। राजसूयं वाजपेयं च (यज्ञनाम) क्लीवे भवति। गद्यं पद्यञ्च काव्यं क्लीवे भवति।

२०। नाम-रोमणी नपुंसके।

(१) वियद्-जगत्-सकृत्-पृषत्-शकृद्-यकृद्-उदश्वितः। एते क्लीवाः स्युः।

(२) नवनीता-ऽवताना-ऽनृता-ऽमृत-निमित्त-वित्त-चित्त-पित्त-व्रत-रजत-वृत्त-पलितानि।

(३) श्राद्ध-कुलिश-दैव-पीठ-कुण्डा-ऽङ्का-ऽङ्ग-दधि-सक्थ्य-अक्ष्य-अस्थ्या-ऽऽस्पदा-ऽऽकाश-कण्व-बीजानि। एतानि क्लीवानि स्युः।

(४) धान्या-ऽऽज्य-सस्य-रूप्य-पण्य-वर्ण्य-धिष्ण्य-हव्य-कव्य-काव्य-सत्याऽ-पत्य-मूल्य-शिक्य-कुड्य-मद्य-हर्म्य-तूर्य-सैन्यानि। इदं धान्यम्।

(५) द्वन्द्व-बर्ह-दुःख-बडिश-पिच्छ-बिम्ब-कुटुम्ब-कवच-कवर-वृन्दारकाणि। अक्षम् इन्द्रिये। एतानि क्लीवानि स्युः।

(६) अपथं नपुंसकम्।

(७) कार्मुक-पत्तन-रण-हला-ऽस्त्राभिधानानि। एतानि क्लीवानि स्युः।

२०। स्त्री पुंसयोः।

(१) अपत्यार्थ स्त्रद्धिते।

(२) गो-मणि यष्टि-मुष्टि-पाटलि-वस्ति-शाल्मलि-त्रुटि-मसि मरीचयः।

(३) मत्य-सीधु-कर्कन्धु-सिन्धु-कण्डु-रेणवः।

१४। शील-मूल-मङ्गल-साल-कमल-तल-मूसल-कुण्डल-पलल-मृणाल-बाल-निगल-पलाल विड़ाल-खिल-शूलाः पुंसि च। चात् क्लीवे च। शीलं शीलः।

१३। शता-ऽयुत-प्रयुताः पुंसि च। अयं शतः, इदं शतम्।

१३। लक्षकोटी स्त्रियाम्। इयं लक्षा, इयं कोटिः।

१३। सहस्रः क्वचित्। इदं सहस्रम्, अयं सहस्रः।

१४। ब्रह्मन् पुंसि च। अयं ब्रह्मा, इदं ब्रह्म। शङ्कुः पुंसि।

१४। यात्रा-मात्रा-भस्त्रा-दंष्ट्रा-वरत्राः स्त्रियामेव।
भृत्याऽमित्र-छात्र-पुत्त्र-मन्त्र-वृत्र-मेढ्रो-ष्ट्राः पुंसि। अयं भृत्यः, न मित्रम् अमित्रः।
पत्र-पात्र-पवित्र-सूत्र-च्छत्राः पुंसि च।

१२। पद्म-कमलोत्पलानि पुंसि च।

२०। आहव-संग्रामौ पुंसि। आजिः स्त्रियामेव।

२२। पुं-नपुंसकयोः—

(१) घृत-भूत-मुस्त-क्ष्वेलितै-रावत-पुस्त-बुस्त-लोहिताः।

(२) शृङ्गा-र्घ-निदाघो-द्यम-शल्य-दृढाः।

(३) व्रज-कुञ्ज-कुथ-कूर्च-प्रस्थ-दर्पा-ऽर्भा-ऽर्द्धर्च-पुच्छाः।

(४) कबन्धौ-षधायुधान्ताः।

(५) दण्ड-मण्ड-खण्ड-शद-सैन्धव-पार्श्वा-ऽऽकाश-कुश-काशा-ऽङ्कुश-कुलिशाः।

(६) गृह-मेह-देह-पट्ट-पटहा-ऽष्टापदा-ऽर्बुद-ककुदाश्च।

२३। अवशिष्ट-लिङ्गम्—

(१) अव्ययं कति-युष्मद्-अस्मदः।

(२) ष्णान्ता संख्या।

(३) गुणवचनं च।

(४) कृत्याश्च।

(५) करणा-ऽधिकरणयोर्ल्युट्।

(६) सर्व्वादीनि सर्व्वनामानि।

२४। (१) परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः।

(२) पूर्व्ववद् अश्ववडवौ।

———

अथ शब्दरूप-प्रकरणम् ।

तत्र विभक्तयः (सुप्)

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	सु	—	अम्	टा	ङे	ङसि	ङस्	ङि
द्विवचने	औः	औ	औट्	भ्याम्	भ्याम्	भ्याम्	ओस्	ओस्
बहुवचने	जस्	जस्	शस्	भिस्	भ्यस्	भ्यस्	आम्	सुप्

अथ शब्दरूपाणि ।

अ

एकवचने	अः	अ	अम्	एन	आय	आत्	अस्य	ए
द्विवचने	औ	औ	औ	आभ्याम्	आभ्याम्	आभ्याम्	अयोः	अयोः
बहुवचने	आः	आः	आन्	ऐः	एभ्यः	एभ्यः	आनाम्	एषु

* राम

एकवचने	रामः	राम	रामम्	रामेण	रामाय	रामात्	रामस्य	रामे
द्विवचने	रामौ	रामौ	रामौ	रामाभ्याम्	रामाभ्याम्	रामाभ्याम्	रामयोः	रामयोः
बहुवचने	रामाः	रामाः	रामान्	रामैः	रामेभ्यः	रामेभ्यः	रामाणाम्	रामेषु

* कृष्ण

एकवचने	कृष्णः	कृष्ण	कृष्णम्	कृष्णेन	कृष्णाय	कृष्णात्	कृष्णस्य	कृष्णे
द्विवचने	कृष्णौ	कृष्णौ	कृष्णौ	कृष्णाभ्याम्	कृष्णाभ्याम्	कृष्णाभ्याम्	कृष्णयोः	कृष्णयोः
बहुवचने	कृष्णाः	कृष्णाः	कृष्णान्	कृष्णैः	कृष्णेभ्यः	कृष्णेभ्यः	कृष्णानाम्	कृष्णेषु

सर्व्वनाम

* सर्व्व — अकारान्त-पुंलिङ्ग-शब्दरूपाणि

एकवचने	सर्व्वः	सर्व्व	सर्व्वम्	सर्व्वेण	सर्व्वस्मै	सर्व्वस्मात्	सर्व्वस्य	सर्व्वस्मिन्
द्विवचने	सर्व्वौ	सर्व्वौ	सर्व्वौ	सर्व्वाभ्याम्	सर्व्वाभ्याम्	सर्व्वाभ्याम्	सर्व्वयोः	सर्व्वयोः
बहुवचने	सर्व्वे	सर्व्वे	सर्व्वान्	सर्व्वैः	सर्व्वेभ्यः	सर्व्वेभ्यः	सर्व्वेषाम्	सर्व्वेषु

एवं—विश्व अन्य अन्यतर इतर त्वत् त्व सम सिम कतर कतम—एते शब्दाः ।

द्रष्टव्यम् १।१।२७ ; विभक्ति-संज्ञक-तद्धिताः ५।३।१—२६ ।

प्रातिपदिक १।२।४५, ४६ ; सुप् ४।१।१, २ ; प्रत्यय ३।१।१, २ ; एकवचन द्विवचन बहुवचन १।४।२१, २२, १०२ ; राम राम=रामौ, राम राम राम=रामाः १।२।६४, रामौ ६।१।८८ ; जस्=अस १।३।७, ४ ; विभक्ति १।४।१०४ ; अन्त्य-हल्लोप-निषेध १।३।४ ; संबुद्धि २।३।४९ ; हे राम ६।१।६९, रामम् ६।१।१०७, शस्=अस् (१।३।८)=आन् ६।१।१०२ ; रामान् (८।४।३७) रामेण कृष्णेन, रामाणां

* पूर्व्व

	कर्त्तरि	संबोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	पूर्व्वः	पूर्व्व	पूर्व्वम्	पूर्व्वेण	पूर्व्वस्मै	पूर्व्वस्मात् } पूर्व्वात् }	पूर्व्वस्य	पूर्व्वस्मिन् } पूर्व्वे }
द्विवचने	पूर्व्वौ	पूर्व्वौ	पूर्व्वौ	पूर्व्वाभ्याम्	पूर्व्वाभ्याम्	पूर्व्वाभ्याम्	पूर्व्वयोः	पूर्व्वयोः
बहुवचने	पूर्व्वे } पूर्व्वाः }	पूर्व्वे } पूर्व्वाः }	पूर्व्वान्	पूर्व्वैः	पूर्व्वेभ्यः	पूर्व्वेभ्यः	पूर्व्वेषाम्	पूर्व्वेषु

एवम्—पर अवर दक्षिण उत्तर अपर अधर एते शब्दाः १।१।३४, ७।१।१६

* स्व=आत्मा, आत्मीय १।१।३५

एकवचने	स्वः	स्व	स्वम्	स्वेन	स्वस्मै	स्वस्मात् स्वात्	स्वस्य	स्वस्मिन् स्वे
द्विवचने	स्वौ	स्वौ	स्वौ	स्वाभ्याम्	स्वाभ्याम्	स्वाभ्याम्	स्वयोः	स्वयोः
बहुवचने	स्वे स्वाः	स्वे स्वाः	स्वान्	स्वैः	स्वेभ्यः	स्वेभ्यः	स्वेषाम्	स्वेषु

एवम्—'अन्तर' (=बाह्य, परिधानीय) एष शब्दः १।१।३६ ।

उभ ५।३।७१, ५।२।४४

द्विवचने	उभौ	उभौ	उभौ	उभाभ्याम्	उभाभ्याम्	उभाभ्याम्	उभयोः	उभयोः

* प्रथम १।१।३३

एकवचने	प्रथमः	प्रथम	प्रथमम्	प्रथमेन	प्रथमाय	प्रथमात्	प्रथमस्य	प्रथमे
द्विवचने	प्रथमौ	प्रथमौ	प्रथमौ	प्रथमाभ्याम्	प्रथमाभ्याम्	प्रथमाभ्याम्	प्रथमयोः	प्रथमयोः
बहुवचने	प्रथमे } प्रथमाः }	प्रथमे } प्रथमाः }	प्रथमान्	प्रथमैः	प्रथमेभ्यः	प्रथमेभ्यः	प्रथमानाम्	प्रथमेषु

एवम्—चरम, द्वितय, त्रितय चतुष्टय, अल्प अर्ध कतिपय नेम—एते शब्दाः

द्वितीय * तीयस्य ङित्सु वा

एकवचने	द्वितीयः	द्वितीय	द्वितीयम्	द्वितीयेन	द्वितीयस्मै } द्वितीयाय }	द्वितीयस्मात् } द्वितीयात् }	द्वितीयस्य	द्वितीयस्मिन् } द्वितीये }
द्विवचने	द्वितीयौ	द्वितीयौ	द्वितीयौ	द्वितीयाभ्याम्	द्वितीयाभ्याम्	द्वितीयाभ्याम्	द्वितीययोः	द्वितीययोः
बहुवचने	द्वितीयाः	द्वितीयाः	द्वितीयान्	द्वितीयैः	द्वितीयेभ्यः	द्वितीयेभ्यः	द्वितीयानाम्	द्वितीयेषु

एवं 'तृतीय'

अणानाम् ८।४।२ ; टा=इन्, ङसि=आत्, ङस्=स्य ७।१।१२ ; रामाभ्याम् ७।३।१०२ ; भिस्=ऐस् ७।१।९, ङे=य ७।१।१३ ; रामेभ्यः ७।३।१०३ ; रामात् रामाद् ८।४।५६ ; रामयोः ७।३।१०४ । रामाणाम् ६।४।३ ; रामेषु ८।३।५९ ।

जस् १।१।३४, स्मात् स्मिन् ७।१।१६, १४ ।

जस्=शी=ई ७।१।१७, १।३।८ ; ङे=स्मै ७।१।१४ ; ङसि=स्मात्, ङि=स्मिन् ७।१।१५ ; आम्=साम् ७।१।२५ ।

निर्जर ७।२।१०१ (जराया: निष्क्रान्त:)

अकारान्त-पुंलिङ्गशब्द-रूपाणि

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	निर्जरः	निर्जर	निर्जरम्	निर्जरेण	निर्जराय	निर्जरात्	निर्जरस्य	निर्जरे
द्विवचने	निर्जरौ	निर्जरौ	निर्जरौ	निर्जराभ्याम्	निर्जराभ्याम्	निर्जराभ्याम्	निर्जरयोः	निर्जरयोः
बहुवचने	निर्जराः	निर्जराः	निर्जरान्	निर्जरैः	निर्जरेभ्यः	निर्जरेभ्यः	निर्जराणाम्	निर्जरेषु

अथवा

एकवचने	निर्जरः	निर्जर	निर्जरसम्	निर्जरसा	निर्जरसे	निर्जरसः	निर्जरसः	निर्जरसि
द्विवचने	निर्जरसौ	निर्जरसौ	निर्जरसौ	निर्जराभ्याम्	निर्जराभ्याम्	निर्जराभ्याम्	निर्जरसोः	निर्जरसोः
बहुवचने	निर्जरसः	निर्जरसः	निर्जरसः	निर्जरैः	निर्जरेभ्यः	निर्जरेभ्यः	निर्जरसाम्	निर्जरेषु

"पदाङ्गाधिकारे तस्य तदन्तस्य च" ग्रहणं भवति। एकदेश-विकृतम् अनन्यवत् ।

पाद ६।१।६३

एकवचने	पादः	पाद	पादम्	पादेन	पादाय	पादात्	पादस्य	पादे
द्विवचने	पादौ	पादौ	पादौ	पादाभ्याम्	पादाभ्याम्	पादाभ्याम्	पादयोः	पादयोः
बहुवचने	पादाः	पादाः	पादान्	पादैः	पादेभ्यः	पादेभ्यः	पादानाम्	पादेषु

अथवा

एकवचने	पादः	पाद	पादम्	पदा	पदे	पदः	पदः	पदि
द्विवचने	पादौ	पादौ	पादौ	पद्भ्याम्	पद्भ्याम्	पद्भ्याम्	पदोः	पदोः
बहुवचने	पादाः	पादाः	पदः	पद्भिः	पद्भ्यः	पद्भ्यः	पदाम्	पत्सु

दन्त ६।१।६३

एकवचने	दन्तः	दन्त	दन्तम्	दन्तेन	दन्ताय	दन्तात्	दन्तस्य	दन्ते
द्विवचने	दन्तौ	दन्तौ	दन्तौ	दन्ताभ्याम्	दन्ताभ्याम्	दन्ताभ्याम्	दन्तयोः	दन्तयोः
बहुवचने	दन्ताः	दन्ताः	दन्तान्	दन्तैः	दन्तेभ्यः	दन्तेभ्यः	दन्तानाम्	दन्तेषु

अथवा

एकवचने	दन्तः	दन्त	दन्तम्	दता	दते	दतः	दतः	दति
द्विवचने	दन्तौ	दन्तौ	दन्तौ	दद्भ्याम्	दद्भ्याम्	दद्भ्याम्	दतोः	दतोः
बहुवचने	दन्ताः	दन्ताः	दतः	दद्भिः	दद्भ्यः	दद्भ्यः	दताम्	दत्सु

मास ६।१।६३

एकवचने	मासः	मास	मासम्	मासेन	मासाय	मासात्	मासस्य	मासे
द्विवचने	मासौ	मासौ	मासौ	मासाभ्याम्	मासाभ्याम्	मासाभ्याम्	मासयोः	मासयोः
बहुवचने	मासाः	मासाः	मासान्	मासैः	मासेभ्यः	मासेभ्यः	मासानाम्	मासेषु

अथवा

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	मासः	मास	मासम्	मासा	मासे	मासः	मासः	मासि
द्विवचने	मासौ	मासौ	मासौ	माभ्याम्	माभ्याम्	माभ्याम्	मासोः	मासोः
बहुवचने	मासाः	मासाः	मासः	माभिः	माभ्यः	माभ्यः	मासाम्	माःसु

एवं 'यूष' शब्दः

'यूष'—एकं रूपं 'नर'वत्, अपरं यथा

एकवचने	यूषः	यूष	यूषम्	यूष्णा	यूष्णे	यूष्णः	यूष्णः	यूष्णि
द्विवचने	यूषौ	यूषौ	यूषौ	षभ्याम्	यूषभ्याम्	यूषभ्याम्	यूष्णोः	यूष्णोः
बहुवचने	यूषाः	यषाः	यष्णः	यूषभिः	यूषभ्यः	यषभ्यः	यष्णाम्	यषसु

'द्व्यह्न' (द्वयोः अह्नोः समाहारः)—६।२।११०

एकवचने	द्व्यह्नः	द्व्यह्न	द्व्यह्नम्	द्व्यह्नेन	द्व्यह्नाय	द्व्यह्नात्	द्वह्नस्य	द्व्यह्ने, द्व्यह्नि, द्व्यहनि
द्विवचने	द्व्यह्नौ	द्व्यह्नौ	द्व्यह्नौ	द्व्यह्नाभ्याम्	द्व्यह्नाभ्याम्	द्व्यह्नाभ्याम्	द्व्यह्नयोः	द्व्यह्नयोः
बहुवचने	द्व्यह्नाः	द्व्यह्नाः	द्वह्नान्	द्वह्नैः	द्वह्नेभ्यः	द्व्यह्नेभ्यः	द्व्यह्नानाम्	द्व्यह्नेषु

एवं—त्र्यह्न व्यह्न सायाह्न इतिशब्दाः ।

अथ आकारान्ताः पुंलिङ्गशब्दाः

* विश्वपा ६।४।१४०, ६।१।१०५,

एकवचने	विश्वपाः	विश्वपाः	विश्वपाम्	विश्वपा	विश्वपे	विश्वपः	विश्वपः	विश्वपि
द्विवचने	विश्वपौ	विश्वपौ	विश्वपौ	विश्वपाभ्याम्	विश्वपाभ्याम्	विश्वपाभ्याम्	विश्वपोः	विश्वपोः
बहुवचने	विश्वपाः	विश्वपाः	विश्वपः	विश्वपाभिः	विश्वपाभ्यः	विश्वपाभ्यः	विश्वपाम्	विश्वपासु

'क्त्वा' ७।१।३७

एकवचने	क्त्वाः	क्त्वाः	क्त्वाम्	क्त्वा	क्त्वे	क्त्वः	क्त्वः	क्त्वि
द्विवचने	क्त्वौ	क्त्वौ	क्त्वौ	क्त्वाभ्याम्	क्त्वाभ्याम्	क्त्वाभ्याम्	क्त्वोः	क्त्वोः
बहुवचने	क्त्वाः	क्त्वाः	क्त्वः	क्त्वाभिः	क्त्वाभ्यः	क्त्वाभ्यः	क्त्वाम्	क्त्वासु

'श्ना' ३।१।८३

एकवचने	श्नाः	श्नाः	श्नाम्	श्ना	श्ने	श्नः	श्नः	श्नि
द्विवचने	श्नौ	श्नौ	श्नौ	श्नाभ्याम्	श्नाभ्यां	श्नाभ्याम्	श्नोः	श्नोः
बहुवचने	श्नाः	श्नाः	श्नः	श्नाभिः	श्नाभ्यः	श्नाभ्यः	श्नाम्	श्नासु

'हाहा' कस्यचित् गन्धर्व्वस्य नाम

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	हाहा:	हाहा:	हाहाम्	हाहा	हाहै	हाहा:	हाहा:	हाहे
द्विवचने	हाहौ	हाहौ	हाहौ	हाहाभ्याम्	हाहाभ्याम्	हाहाभ्याम्	हाहौ:	हाहौ:
बहुवचने	हाहा:	हाहा:	हाहान्	हाहाभि:	हाहाभ्य:	हाहाभ्य:	हाहाम्	हाहासु

'इ' एः ३।३।५६,

एकवचने	इ:	ए	इम्	इना	अये	ए:	ए:	औ
द्विवचने	ई	ई	ई	इभ्याम्	इभ्याम्	इभ्याम्	यो:	यो:
बहुवचने	अय:	अय:	ईन्	इभि:	इभ्य:	इभ्य:	ईनाम्	इषु

'हरि' हरिम् ६।१।१०७, हरीणाम् ६।४।३

एकवचने	हरि:	हरे	हरिम्	हरिणा	हरये	हरे:	हरे:	हरौ
द्विवचने	हरी	हरी	हरी	हरिभ्याम्	हरिभ्याम्	हरिभ्याम्	हर्यो:	हर्यो:
बहुवचने	हरय:	हरय:	हरीन्	हरिभि:	हरिभ्य:	हरिभ्य:	हरीणाम्	हरिषु

'मुनि'

एकवचने	मुनि:	मुने	मुनिम्	मुनिना	मुनये	मुने:	मुने:	मुनौ
द्विवचने	मुनी	मुनी	मुनी	मुनिभ्याम्	मुनिभ्याम्	मुनिभ्याम्	मुन्यो:	मुन्यो:
बहुवचने	मुनय:	मुनय:	मुनीन्	मुनिभि:	मुनिभ्य:	मुनिभ्य:	मुनीनाम्	मुनिषु

एवं विधि जलधि मुरारि कवि अति-द्वि प्रभृतय: शब्दा:

* 'सखि' ६।१।११२, ८।२।७, ७।१।९२-९३

एकवचने	सखा	सखे	सखायम्	सख्या	सख्ये	सख्यु:	सख्यु:	सख्यौ
द्विवचने	सखायौ	सखायौ	सखायौ	सखिभ्याम्	सखिभ्याम्	सखिभ्याम्	सख्यो:	सख्यो:
बहुवचने	सखाय:	सखाय:	सखीन्	सखिभि:	सखिभ्य:	सखिभ्य:	सखीनाम्	सखिषु

* 'पति' ६।१।११२, १।४।८

एकवचने	पति:	पते	पतिम्	पत्या	पत्ये	पत्यु:	पत्यु:	पत्यौ
द्विवचने	पती	पती	पती	पतिभ्याम्	पतिभ्याम्	पतिभ्याम्	पत्यो:	पत्यो:
बहुवचने	पतय:	पतय:	पतीन्	पतिभि:	पतिभ्य:	पतिभ्य:	पतीनाम्	पतिषु

हरी ६।१।१०२, हरय: ७।३।१०९, हरे ७।३।१०८, घि १।४।७, टा=ना ७।३।१२०, हरे: ७।३।११०, १११ ; हरौ ७।३।११९ ; सखा ७।१।९३, ६।४।८, ६।१।६८ ; सखायौ ७।१।९२, ७।२।११५ ; सख्यु: ६।१।११२, सख्यौ ७।३।११८, भूपतिना १।४।८ ; शोभन: सखा सुसखा (५।४।६९) सुसखायौ सुसखाय:, सुसखिना सुसखये, सुसखे: सुसखौ । एवं परम: सखा यस्य स परमसखा, सखीम् अतिक्रान्त: अतिसखि: । गार्ग्य: गार्ग्यौ गर्गा: २।४।६२-६६, ४।१।१०५ ।

* 'भूपति'

	कर्त्तरि प्रथमा	सम्बोधने प्रथमा	कर्म्मणि द्वितीया	करणे तृतीया	सम्प्रदाने चतुर्थी	अपादाने पञ्चमी	सम्बन्धे षष्ठी	अधिकरणे सप्तमी
एकवचने	भूपतिः	भूपते	भूपतिम्	भूपतिना	भूपतये	भूपतेः	भूपतेः	भूपतौ
द्विवचने	भूपती	भूपती	भूपती	भूपतिभ्याम्	भूपतिभ्याम्	भूपतिभ्याम्	भूपत्योः	भूपत्योः
बहुवचने	भूपतयः	भूपतयः	भूपतीन्	भूपतिभिः	भूपतिभ्यः	भूपतिभ्यः	भूपतीनाम्	भूपतिषु

'औडुलोमि' लोम्नोऽपत्येषु बहुषु अकारो वक्तव्यः ६।४।१४४

एकवचने	औडुलोमिः	औडुलोमे	०लोमिम्	०लोमिना	०लोमये	०लोमेः	०लोमेः	०लोमौ
द्विवचने	औडुलोमी	०लोमी	०लोमी	०लोमिभ्याम्	०लोमिभ्याम्	०लोमिभ्याम्	०लोम्योः	०लोम्योः
बहुवचने	औडुलोमाः	०लोमाः	०लोमान्	०लोमैः	०लोमेभ्यः	०लोमेभ्यः	०लोमानाम्	०लोमेषु

* 'द्वि' ७।२।१०२

द्विवचन	द्वौ	द्वौ	द्वौ	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	द्वयोः	द्वयोः

* कति १।१।२५, ७।१।२२

बहुवचने	कति	कति	कति	कतिभिः	कतिभ्यः	कतिभ्यः	कतीनाम्	कतिषु

* 'त्रि' ७।१।५३

बहुवचने	त्रयः	त्रयः	त्रीन्	त्रिभिः	त्रिभ्यः	त्रिभ्यः	त्रयाणाम्	त्रिषु

अतिस्त्रि (स्त्रियम् अतिक्रान्तः) ६।४।७९, ८०

एकवचने	अतिस्त्रिः	अतिस्त्रे	अतिस्त्रियम् / अतिस्त्रिम्	अतिस्त्रिणा	अतिस्त्रये	अतिस्त्रेः	अतिस्त्रेः	अतिस्त्रौ
द्विवचने	अतिस्त्रियौ	अतिस्त्रियौ	अतिस्त्रियौ	अतिस्त्रिभ्याम्	०स्त्रिभ्याम्	०स्त्रिभ्याम्	०स्त्रियोः	अतिस्त्रियोः
बहुवचने	अतिस्त्रियः	अतिस्त्रियः	अतिस्त्रियः / अतिस्त्रीन्	अतिस्त्रिभिः	०स्त्रिभ्यः	०स्त्रिभ्यः	०स्त्रीणाम्	अतिस्त्रिषु

बहुश्रेयसी (५।४।१५६) बह्व्यः श्रेयस्यः यस्य सः ।

एकवचने	बहुश्रेयसी	०श्रेयसि	०श्रेयसीम्	०श्रेयस्या	०श्रेयस्यै	०श्रेयस्याः	०श्रेयस्याः	०श्रेयस्याम्
द्विवचने	०श्रेयस्यौ	०श्रेयस्यौ	०श्रेयस्यौ	०श्रेयसीभ्याम्	०श्रेयसीभ्याम्	०श्रेयसीभ्याम्	०श्रेयस्योः	०श्रेयस्योः
बहुवचने	०श्रेयस्यः	०श्रेयस्यः	०श्रेयसीन्	०श्रेयसीभिः	०श्रेयसीभ्यः	०श्रेयसीभ्यः	०श्रेयसीनाम्	०श्रेयसीषु

ङे ङसि ङस्—७।३।११२, ६।१।९० ; ङि=७।३।११६ ; सम्बोधन ७।३।१०७ एवम् अतिलक्ष्मी ।

कुमारी (क्यच्) (विवाहेच्छुः) ६।४।८२

एकवचने	कुमारी	कुमारि	कुमार्यम्	कुमार्या	कुमार्ये	कुमार्याः	कुमार्याः	कुमार्याम्
द्विवचने	कुमार्यौ	कुमार्यौ	कुमार्यौ	कुमारीभ्याम्	कुमारीभ्याम्	कुमारीभ्याम्	कुमार्योः	कुमार्योः
बहुवचने	कुमार्यः	कुमार्यः	कुमार्यः	कुमारीभिः	कुमारीभ्यः	कुमारीभ्यः	कुमारीणाम्	कुमारीषु

* 'सुश्री' ६।४।७७

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	सुश्रीः	सुश्रीः	सुश्रियम्	सुश्रिया	सुश्रियै	सुश्रियः	सुश्रियः	सुश्रियि
द्विवचने	सुश्रियौ	सुश्रियौ	सुश्रियौ	सुश्रीभ्याम्	सुश्रीभ्याम्	सुश्रीभ्याम्	सुश्रियोः	सुश्रियोः
बहुवचने	सुश्रियः	सुश्रियः	सुश्रियः	सुश्रीभिः	सुश्रीभ्यः	सुश्रीभ्यः	सुश्रियाम्	सुश्रीषु

एवं नी, यवक्री, सुधी, शुद्धधी, परमधी, दुर्धी, पक्की, शुष्की, एते शब्दाः ३।४।८५

* सेनानी ६।४।८२ (एवं 'ग्रामणी' 'उन्नी' अग्रणी)

एकवचने	सेनानीः	सेनानीः	सेनान्यम्	सेनान्या	सेनान्ये	सेनान्यः	सेनान्यः	सेनान्याम्
द्विवचने	सेनान्यौ	सेनान्यौ	सेनान्यौ	सेनानीभ्याम्	सेनानीभ्याम्	सेनानीभ्याम्	सेनान्योः	सेनान्योः
बहुवचने	सेनान्यः	सेनान्यः	सेनान्यः	सेनानीभिः	सेनानीभ्यः	सेनानीभ्यः	सेनान्याम्	सेनानीषु

'पपी' (सूर्य्यः), (एवं ययी ६।४।८२

एकवचने	पपीः	पपीः	पपीम्	पप्या	पप्ये	पप्यः	पप्यः	पपी
द्विवचने	पप्यौ	पप्यौ	पप्यौ	पपीभ्याम्	पपीभ्याम्	पपीभ्याम्	पप्योः	पप्योः
बहुवचने	पप्यः	पप्यः	पपीन्	पपीभिः	पपीभ्यः	पपीभ्यः	पप्याम्	पपीषु

धातुनिष्पन्नश्चेत्—पप्यम्, पप्यः, पप्यि इति विशेषः ।

'प्रधी' ६।४।८२ (बुद्धिमान्)

एकवचने	प्रधीः	प्रधीः	प्रध्यम्	प्रध्या	प्रध्ये	प्रध्यः	प्रध्यः	प्रध्यि
द्विवचने	प्रध्यौ	प्रध्यौ	प्रध्यौ	प्रधीभ्याम्	प्रधीभ्याम्	प्रधीभ्याम्	प्रध्योः	प्रध्योः
बहुवचने	प्रध्यः	प्रध्यः	प्रध्यः	प्रधीभिः	प्रधीभ्यः	प्रधीभ्यः	प्रध्याम्	प्रधीषु

'वातप्रमी' (मृगविशेषः)

एकवचने	वातप्रमीः	०प्रमीः	०प्रमीम्	०प्रम्या	०प्रम्ये	०प्रम्यः	०प्रम्यः	०प्रमी
द्विवचने	वातप्रम्यौ	०प्रम्यौ	०प्रम्यौ	०प्रमीभ्याम्	०प्रमीभ्याम्	०प्रमीभ्याम्	०प्रम्योः	०प्रम्योः
बहुवचने	वातप्रम्यः	०प्रम्यः	०प्रमीन्	०प्रमीभिः	०प्रमीभ्यः	०प्रमीभ्यः	०प्रम्याम्	०प्रमीषु

(धातुनिष्पन्नश्चेत् ० प्रम्यम् ० प्रम्यौ ० प्रम्यः, ० प्रम्यि ० प्रमग्रोः ० प्रमीषु इति विशेषः)

'सखी' (क्यच्), मित्रेच्छुः

एकवचने	सखीः	सखीः	सख्यम्	सख्या	सख्ये	सख्युः	सख्युः	सख्यि
द्विवचने	सख्यौ	सख्यौ	सख्यौ	सखीभ्याम्	सखीभ्याम्	सखीभ्याम्	सख्योः	सख्योः
बहुवचने	सख्यः	सख्यः	सख्यः	सखीभिः	सखीभ्यः	सखीभ्यः	सख्याम्	सखीषु

एवं 'सुखी' 'पती' 'सुती, 'लूनी' 'पूनी' 'क्षामी' 'प्रस्तीमी' ६।१।११२ ; नत्वमत्वे ८।२।१

'उ' ६।४।१४६

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	उः	ओ	उम्	उना	अवे	ओः	ओः	औ
द्विवचने	ऊ	ऊ	ऊ	उभ्याम्	उभ्याम्	उभ्याम्	वोः	वोः
बहुवचने	अवः	अवः	ऊन्	उभिः	उभ्यः	उभ्यः	ऊनाम्	उषु

* 'विष्णु'

एकवचने	विष्णुः	विष्णो	विष्णुम्	विष्णुना	विष्णवे	विष्णोः	विष्णोः	विष्णौ
द्विवचने	विष्णू	विष्णू	विष्णू	विष्णुभ्याम्	विष्णुभ्याम्	विष्णुभ्याम्	विष्ण्वोः	विष्ण्वोः
बहुवचने	विष्णवः	विष्णवः	विष्णून्	विष्णुभिः	विष्णुभ्यः	विष्णुभ्यः	विष्णूनाम्	विष्णुषु

एवं साधु विभु प्रभु गुरु विधु शम्भु प्रभृतयः

'क्रोष्टु' (शृगालः) ७।१।९५,९७

एकवचने	क्रोष्टा	क्रोष्टो	क्रोष्टारम्	क्रोष्टुना	क्रोष्टवे	क्रोष्टोः	क्रोष्टोः	क्रोष्टौ
द्विवचने	क्रोष्टारौ	क्रोष्टारौ	क्रोष्टारौ	क्रोष्टुभ्याम्	क्रोष्टुभ्याम्	०भ्याम्	क्रोष्ट्वोः	क्रोष्ट्वोः
बहुवचने	क्रोष्टारः	क्रोष्टारः	क्रोष्टून्	क्रोष्टुभिः	क्रोष्टुभ्यः	०भ्यः	क्रोष्टूनाम्	क्रोष्टुषु

अथवा

एकवचने	क्रोष्टा	क्रोष्टो	क्रोष्टारम्	क्रोष्ट्रा	क्रोष्ट्रे	क्रोष्टुः	क्रोष्टुः	क्रोष्टरि
द्विवचने	क्रोष्टारौ	क्रोष्टारौ	क्रोष्टारौ	क्रोष्टुभ्याम्	क्रोष्टुभ्याम्	क्रोष्टुभ्याम्	क्रो. ष्ट्रोः	क्रोष्ट्रोः
बहुवचने	क्रोष्टारः	क्रोष्टारः	क्रोष्टून्	क्रोष्टुभिः	क्रोष्टुभ्यः	क्रोष्टुभ्यः	क्रोष्टूनाम्	क्रोष्टुषु

'हूहू' (कस्यचित् गन्धर्व्वस्य नाम)

एकवचने	हूहूः	हूहूः	हूहूम्	हूह्वा	हूह्वे	हूह्वः	हूह्वः	हूह्वि
द्विवचने	हूह्वौ	हूह्वौ	हूह्वौ	हूहूभ्याम्	हूहूभ्याम्	हूहूभ्याम्	हूह्वोः	हूह्वोः
बहुवचने	हूह्वः	हूह्वः	हूहून्	हूहूभिः	हूहूभ्यः	हूहूभ्यः	हूह्वाम्	हूहूषु

'सुलू' (६।४।८३)

एकवचने	सुलूः	सुलूः	सुल्वम्	सुल्वा	सुल्वे	सुल्वः	सुल्वः	सुल्वि
द्विवचने	सुल्वौ	सुल्वौ	सुल्वौ	सुलूभ्याम्	सुलूभ्याम्	सुलूभ्याम्	सुल्वोः	सुल्वोः
बहुवचने	सुल्वः	सुल्वः	सुल्वः	सुलूभिः	सुलूभ्यः	सुलूभ्यः	सुल्वाम्	सुलूषु

एवं 'खलपू' 'उल्लू' 'वर्षाभू' 'करभू'।

'अतिचमू' ६।१।९०, ७।३।१०७, ७।३।११२, ७।३।११६,

एकवचने	अतिचमूः	०चमु	०चमूम्	०चम्वा	०चम्वै	०चम्वाः	०चम्वाः	०चम्वाम्
द्विवचने	०चम्वौ	०चम्वौ	०चम्वौ	०चमूभ्याम्	०चमूभ्याम्	०चमूभ्याम्	०चम्वोः	०चम्वोः
बहुवचने	०चम्वः	०चम्वः	०चमून्	०चमूभिः	०चमूभ्यः	०चमूभ्यः	०चमूनाम्	०चमूषु

'लू' ६।४।७७

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	लूः	लूः	लुवम्	लुवा	लुवे	लुवः	लुवः	लुवि
द्विवचने	लुवौ	लुवौ	लुवौ	लूभ्याम्	लूभ्याम्	लूभ्याम्	लुवोः	लुवोः
	लुवः	लुवः	लुवः	लूभिः	लूभ्यः	लूभ्यः	लुवाम्	लूषु

एवं—कटप्रू, परमलू, स्वयम्भू, स्वभू ६।४।८५

'ऋ' १।१।५१

एकवचने	आ	अः	आरम्	रा	रे	उः	उः	अरि
द्विवचने	आरौ	आरौ	आरौ	ऋभ्याम्	ऋभ्याम्	ऋभ्याम्	रोः	रोः
बहुवचने	आरः	आरः	ॠन्	ऋभिः	ऋभ्यः	ऋभ्यः	ॠणाम्	ऋषु

'ॠ' ७।३।११०, ७।१।९४, ६।४।११, ६।१।१११, ८।२।२४

* 'दातृ'

एकवचने	दाता	दातः	दातारम्	दात्रा	दात्रे	दातुः	दातुः	दातरि
द्विवचने	दातारौ	दातारौ	दातारौ	दातृभ्याम्	दातृभ्याम्	दातृभ्याम्	दात्रोः	दात्रोः
बहुवचने	दातारः	दातारः	दातॄन्	दातृभिः	दातृभ्यः	दातृभ्यः	दातॄणाम्	दातृषु

एवं धातृ वातृ गन्तृ वक्तृ उद्गातृ प्रभृतयः शब्दाः।

* 'पितृ'

एकवचने	पिता	पितः	पितरम्	पित्रा	पित्रे	पितुः	पितुः	पितरि
द्विवचने	पितरौ	पितरौ	पितरौ	पितृभ्याम्	पितृभ्याम्	पितृभ्याम्	पित्रोः	पित्रोः
बहुवचने	पितरः	पितरः	पितॄन्	पितृभिः	पितृभ्यः	पितृभ्यः	पितॄणाम्	पितृषु

एवं (६।४।११ सूत्रोक्तभिन्नाः उणादि-प्रत्ययनिष्पन्नाः) जामातृ-भ्रातृ-देवृ-सव्येष्टृ-नप्तृ-प्रभृतयः शब्दाः।

* 'नृ' (नर)

एकवचने	ना	नः	नरम्	न्रा	न्रे	नुः	नुः	नरि
द्विवचने	नरौ	नरौ	नरौ	नृभ्याम्	नृभ्याम्	नृभ्याम्	न्रोः	न्रोः
बहुवचने	नरः	नरः	नॄन्	नृभिः	नृभ्यः	नृभ्यः	नॄणाम् नृणाम्	नृषु

'कॄ' ३।१।१३५, एवं तॄशब्दः

एकवचने	कीः	कीः	किरम्	किरा	किरे	किरः	किरः	किरि
द्विवचने	किरौ	किरौ	किरौ	कीर्भ्याम्	कीर्भ्याम्	कीर्भ्याम्	किरोः	किरोः
बहुवचने	किरः	किरः	किरः	कीर्भिः	कीर्भ्यः	कीर्भ्यः	किराम्	कीर्षु

अथवा

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	कॄः	कॄः	कॄम्	क्रा	क्रे	क्रः	क्रः	क्रि
द्विवचने	क्रौ	क्रौ	क्रौ	कॄभ्याम्	कॄभ्याम्	कॄभ्याम्	क्रोः	क्रोः
बहुवचने	क्रः	क्रः	क्रॄन्	कॄभिः	कॄभ्यः	कॄभ्यः	क्राम्	कॄषु

गम्लृ एवं शक्लॄ, (लृकारस्य दीर्घोनास्ति)

एकवचने	गमा	गमल्	गमलम्	गम्ला	गम्ले	गमुल्	गमुल्	गमलि
द्विवचने	गमलौ	गमलौ	गमलौ	गम्लृभ्याम्	गम्लृभ्याम्	गमलृभ्याम्	गम्लोः	गम्लोः
बहुवचने	गमलः	गमलः	गमॄन्	गम्लृभिः	गमॄभ्यः	गम्लृभ्यः	गमॄणाम्	गम्लृषु

एकारान्त 'से' शब्दः (स+इः), एवं 'स्मृते' शब्दः।

एकवचने	सेः	सेः	सयम्	सया	सये	सेः	सेः	सयि
द्विवचने	सयौ	सयौ	सयौ	सेभ्याम्	सेभ्याम्	सेभ्याम्	सयोः	सयोः
बहुवचने	सयः	सयः	सयः	सेभिः	सेभ्यः	सेभ्यः	सयाम्	सेषु

* 'गो'

एकवचने	गौः	गौः	गाम्	गवा	गवे	गोः	गोः	गवि
द्विवचने	गावौ	गावौ	गावौ	गोभ्याम्	गोभ्याम्	गोभ्याम्	गवोः	गवोः
बहुवचने	गावः	गावः	गाः	गोभिः	गोभ्यः	गोभ्यः	गवाम्	गोषु

७।१।९०, ६।१।९३, एवं 'स्मृतो' सु-द्यो प्रभृति शब्दाः।

'रै' (धनम्) ७।२।८५, एवं 'सु-रै'।

एकवचने	राः	राः	रायम्	राया	राये	रायः	रायः	रायि
द्विवचने	रायौ	रायौ	रायौ	राभ्याम्	राभ्याम्	राभ्याम्	रायोः	रायोः
बहुवचने	रायः	रायः	रायः	राभिः	राभ्यः	राभ्यः	रायाम्	रासु

'ग्लौ' (चन्द्रः)।

एकवचने	ग्लौः	ग्लौः	ग्लावम्	ग्लावा	ग्लावे	ग्लावः	ग्लावः	ग्लावि
द्विवचने	ग्लावौ	ग्लावौ	ग्लावौ	ग्लौभ्याम्	ग्लौभ्याम्	ग्लौभ्याम्	ग्लावोः	ग्लावोः
बहुवचने	ग्लावः	ग्लावः	ग्लावः	ग्लौभिः	ग्लौभ्यः	ग्लौभ्यः	ग्लावाम्	ग्लौषु

स्त्रीलिङ्ग 'आ' शब्दः

एकवचने	आ	ए	आम्	अया	आयै	आयाः	आयाः	आयाम्
द्विवचने	ए	ए	ए	आभ्याम्	आभ्याम्	आभ्याम्	अयोः	अयोः
बहुवचने	आः	आः	आः	आभिः	आभ्यः	आभ्यः	आनाम्	आसु

औ=शी-७।१।१८ ; सम्बोधन ७।३।१०६, ६।१।६९ ; रमया ७।३।१०५ रमायै ७।३।११३,

* 'रमा'

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	रमा	रमे	रमाम्	रमया	रमायै	रमायाः	रमायाः	रमायाम्
द्विवचने	रमे	रमे	रमे	रमाभ्याम्	रमाभ्याम्	रमाभ्याम्	रमयोः	रमयोः
बहुवचने	रमाः	रमाः	रमाः	रमाभिः	रमाभ्यः	रमाभ्यः	रमाणाम्	रमासु

एवं लता विद्या दुर्गा प्रभृतयः

'अम्बा' एवम् 'अक्का' 'अल्ला' (माता) ७।३।१०७

एकवचने	अम्बा	अम्ब	अम्बाम्	अम्बया	अम्बायै	अम्बायाः	अम्बायाः	अम्बायाम्
द्विवचने	अम्बे	अम्बे	अम्बे	अम्बाभ्याम्	अम्बाभ्याम्	अम्बाभ्याम्	अम्बयोः	अम्बयोः
बहुवचने	अम्बाः	अम्बाः	अम्बाः	अम्बाभिः	अम्बाभ्यः	अम्बाभ्यः	अम्बानाम्	अम्बासु

* 'जरा' ७।२।१०१

एकवचने	जरा	जरे	जराम्	जरया	जरायै	जरायाः	जरायाः	जरायाम्
द्विवचने	जरे	जरे	जरे	जराभ्याम्	जराभ्याम्	जराभ्याम्	जरयोः	जरयोः
बहुवचने	जराः	जराः	जराः	जराभिः	जराभ्यः	जराभ्यः	जराणाम्	जरासु

अथवा

एकवचने	जरा	जरे	जरसम्	जरसा	जरसे	जरसः	जरसः	जरसि
द्विवचने	जरसौ	जरसौ	जरसौ	जराभ्याम्	जराभ्याम्	जराभ्याम्	जरसोः	जरसोः
बहुवचने	जरसः	जरसः	जरसः	जराभिः	जराभ्यः	जराभ्यः	जरसाम्	जरासु

* नासिका ६।१।६३

एकवचने	नासिका	नासिके	नासिकाम्	नासिकया	नासिकायै	नासिकायाः	नासिकायाः	०कायाम्
द्विवचने	नासिके	नासिके	नासिके	नासिकाभ्याम्	नासिकाभ्याम्	नासिकाभ्याम्	०कयोः	०कयोः
बहुवचने	नासिकाः	नासिकाः	नासिकाः	नासिकाभिः	नासिकाभ्यः	नासिकाभ्यः	०कानाम्	०कासु

अथवा

एकवचने	नासिका	नासिके	नासिकाम्	नसा	नसे	नसः	नसः	नसि
द्विवचने	नासिके	नासिके	नासिके	नोभ्याम्	नोभ्याम्	नोभ्याम्	नसोः	नसोः
बहुवचने	नासिकाः	नासिकाः	नसः	नोभिः	नोभ्यः	नोभ्यः	नसाम्	नःसु

* निशा (६।१।६३)

एकवचने	निशा	निशे	निशाम्	निशया	निशायै	निशायाः	निशायाः	निशायाम्
द्विवचने	निशे	निशे	निशे	निशाभ्याम्	निशाभ्याम्	निशाभ्याम्	निशयोः	निशयोः
बहुवचने	निशाः	निशाः	निशाः	निशाभिः	निशाभ्यः	निशाभ्यः	निशानाम्	निशासु

रमे ७।१।१८, सम्बोधने ७।३।१०६, ६।१।६९, रमया ७।३।१०५, रमायै ७।३।११३, रमाणाम् ७।१।५४, ८।४।२, टाप् ४।१।४, डाप् ४।१।१३, चाप् ४।१।७४,

अथवा

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	निशा	निशे	निशाम्	निशा	निशे	निशः	निशः	निशि
द्विवचने	निशे	निशे	निशे	निड्भ्याम्	निड्भ्याम्	निड्भ्याम्	निशोः	निशोः
बहुवचने	निशाः	निशाः	निशः	निड्भिः	निड्भ्यः	निड्भ्यः	निशाम्	निट्सु

'पृतना' (सेना)

एकवचने	पृतना	पृतने	पृतनाम्	पृतनया	पृतनायै	पृतनायाः	पृतनायाः	पृतनायाम्
द्विवचने	पृतने	पृतने	पृतने	पृतनाभ्याम्	पृतनाभ्याम्	पृतनाभ्याम्	पृतनयोः	पृतनयोः
बहुवचने	पृतनाः	पृतनाः	पृतनाः	पृतनाभिः	पृतनाभ्यः	पृतनाभ्यः	पृतनानाम्	पृतनासु

अथवा * मांस-पृतना-सानूनां मांस्-पृत्-स्नवो वाच्याः शसादौ वा ।

एकवचने	पृतना	पृतने	पृतनाम्	पृता	पृते	पृतः	पृतः	पृति
द्विवचने	पृतने	पृतने	पृतने	पृद्भ्याम्	पृद्भ्याम्	पृद्भ्याम्	पृतोः	पृतोः
बहुवचने	पृतनाः	पृतनाः	पृतः	पृद्भिः	पृद्भ्यः	पृद्भ्यः	पृताम्	पृत्सु

'गोपा' (स्त्री)

पुंलिङ्ग 'विश्वपा' वत्

* सर्व्वनाम 'सर्व्वा'

एकवचने	सर्व्वा	सर्व्वे	सर्व्वाम्	सर्व्वया	सर्व्वस्यै	सर्व्वस्याः	सर्व्वस्याः	सर्व्वस्याम्
द्विवचने	सर्व्वे	सर्व्वे	सर्व्वे	सर्व्वाभ्याम्	सर्व्वाभ्याम्	सर्व्वाभ्याम्	सर्व्वयोः	सर्व्वयोः
बहुवचने	सर्व्वाः	सर्व्वाः	सर्व्वाः	सर्व्वाभिः	सर्व्वाभ्यः	सर्व्वाभ्यः	सर्व्वासाम्	सर्व्वासु

एवं विश्वा पूर्व्वा परा अपरा कतरा कतमा एकतरा एकतमा अन्या अन्यतरा इतरा समा सिमा नेमा प्रभृतयः शब्दाः । टा ७।३।१०५, ङित् ७।३।११३, ११४

उत्तरपूर्व्वा १।१।२८

एकवचने	उत्तरपूर्व्वा	०पूर्व्वे	०पूर्व्वाम्	०पूर्व्वया	०पूर्व्वस्यै / ०पूर्व्वायै	०पूर्व्वस्याः / ०पूर्व्वायाः	०पूर्व्वस्याः / ०पूर्व्वायाः	०पूर्व्वस्याम् / पूर्व्वायाम्
द्विवचने	०पूर्व्वे	०पूर्व्वे	०पूर्व्वे	०पूर्व्वाभ्याम्	०पूर्व्वाभ्याम्	०पूर्व्वाभ्याम्	०पूर्व्वयोः	०पूर्व्वयोः
बहुवचने	०पूर्व्वाः	०पूर्व्वाः	०पूर्व्वाः	०पूर्व्वाभिः	०पूर्व्वाभ्यः	०पूर्व्वाभ्यः	०पूर्व्वासाम् / ०पूर्व्वाणाम्	०पूर्व्वासु

द्वितीया ७।३।११५, एवं तृतीया

एकवचने	द्वितीया	द्वितीये	द्वितीयाम्	द्वितीयया	द्वितीयस्यै / द्वितीयायै	द्वितीयस्याः / द्वितीयायाः	द्वितीयस्याः / द्वितीयायाः	द्वितीयस्याम् / द्वितीयायाम्
द्विवचने	द्वितीये	द्वितीये	द्वितीये	द्वितीयाभ्याम्	द्वितीयाभ्याम्	द्वितीयाभ्याम्	द्वितीययोः	द्वितीययोः
बहुवचने	द्वितीयाः	द्वितीयाः	द्वितीयाः	द्वितीयाभिः	द्वितीयाभ्यः	द्वितीयाभ्यः	द्वितीयानाम्	द्वितीयासु

* 'मति' १।४।६, ७।३।११७

	कर्तरि	सम्बोधने	कर्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	मतिः	मते	मतिम्	मत्या	मत्यै मतये	मत्याः मतेः	मत्याः मतेः	मत्याम्, मतौ
द्विवचने	मती	मती	मती	मतिभ्याम्	मतिभ्याम्	मतिभ्याम्	मत्योः	मत्योः
बहुवचने	मतयः	मतयः	मतीः	मतिभिः	मतिभ्यः	मतिभ्यः	मतीनाम्	मतिषु

एवं श्रुति स्मृति धृति बुद्धि कृति प्रभृतयः शब्दाः। एवं प्रिय-त्रि (प्रिया स्त्रय स्त्रीणि वा यस्य सः) आम्, प्रियत्रयाणाम् प्रियत्रीणाम् इतिविशेषः।

* द्वि ७।२।१०२

द्विवचने	द्वे	द्वे	द्वे	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	द्वयोः	द्वयोः

* त्रि ७।२।९९, १०० ; ६।४।४

बहुवचने	तिस्रः	तिस्रः	तिस्रः	तिसृभिः	तिसृभ्यः	तिसृभ्यः	तिसृणाम्	तिसृषु

* चतुर् ७।२।९९, १०० ; ६।४।४

बहुवचने	चतस्रः	चतस्रः	चतस्रः	चतसृभिः	चतसृभ्यः	चतसृभ्यः	चतसृणाम्	चतसृषु

'प्रियत्रि' प्रियाः तिस्रः यस्याः सा प्रियतिस्रा

एकवचने	प्रियतिस्रा	०तिस्रः	०तिस्रम्	०तिस्रा	०तिस्रे	०तिस्रः	०तिस्रः	तिस्रि
द्विवचने	०तिस्रौ	०तिस्रौ	०तिस्रौ	०तिसृभ्याम्	०तिसृभ्याम्	०तिसृभ्याम्	०तिस्रोः	तिस्रोः
बहुवचने	०तिस्रः	०तिस्रः	०तिस्रः	०तिसृभिः	०तिसृभ्यः	०तिसृभ्यः	०तिसृणाम्	०तिसृषु

'ई'

एकवचने	ई	इ	ईम्	या	यै	याः	याः	याम्
द्विवचने	यौ	यौ	यौ	ईभ्याम्	ईभ्याम्	ईभ्याम्	योः	योः
बहुवचने	यः	यः	ईः	ईभिः	ईभ्यः	ईभ्यः	ईनाम्	ईषु

* 'देवी'

एकवचने	देवी	देवि	देवीम्	देव्या	देव्यै	देव्याः	देव्याः	देव्याम्
द्विवचने	देव्यौ	देव्यौ	देव्यौ	देवीभ्याम्	देवीभ्याम्	देवीभ्याम्	देव्योः	देव्योः
बहुवचने	देव्यः	देव्यः	देवीः	देवीभिः	देवीभ्यः	देवीभ्यः	देवीनाम्	देवीषु

एवं नदी वाणी कल्याणी सखी ६।१।६८,

* 'लक्ष्मी'

एकवचने	लक्ष्मीः	लक्ष्मि	लक्ष्मीम्	लक्ष्म्या	लक्ष्म्यै	लक्ष्म्याः	लक्ष्म्याः	लक्ष्म्याम्
द्विवचने	लक्ष्म्यौ	लक्ष्म्यौ	लक्ष्म्यौ	लक्ष्मीभ्याम्	लक्ष्मीभ्याम्	लक्ष्मीभ्याम्	लक्ष्म्योः	लक्ष्म्योः
बहुवचने	लक्ष्म्यः	लक्ष्म्यः	लक्ष्मीः	लक्ष्मीभिः	लक्ष्मीभ्यः	लक्ष्मीभ्यः	लक्ष्मीणाम्	लक्ष्मीषु

'लक्ष्+ई' एवं तरी तन्त्री प्रभृतयः।

अवी लक्ष्मी तरी तन्त्री श्री ह्री धी ध्याम् उणादितः।
स्त्रीलिङ्गानाम् अमीषां तु न सुलोपः कदाचन॥

* 'स्त्री' (स्त्यै + ड्रट् + ई)

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	स्त्री	स्त्रि	स्त्रियम् स्त्रीम्	स्त्रिया	स्त्रियै	स्त्रियाः	स्त्रियाः	स्त्रियाम्
द्विवचने	स्त्रियौ	स्त्रियौ	स्त्रियौ	स्त्रीभ्याम्	स्त्रीभ्याम्	स्त्रीभ्याम्	स्त्रियोः	स्त्रियोः
बहुवचने	स्त्रियः	स्त्रियः	स्त्रियः स्त्रीः	स्त्रीभिः	स्त्रीभ्यः	स्त्रीभ्यः	स्त्रीणाम्	स्त्रीषु

६।४.७९, ८० ; १।४।४

'अति-स्त्रि'

एकवचने	अतिस्त्रिः	०स्त्रे	०स्त्रियम् ०स्त्रिम्	०स्त्रिया	०स्त्रिये ०स्त्रियै	अतिस्त्रेः ०स्त्रियाः	अतिस्त्रेः ०स्त्रियाः	अतिस्त्रौ ०स्त्रियाम्
द्विवचने	०स्त्रियौ	०स्त्रियौ	स्त्रियौ	०स्त्रिभ्याम्	०स्त्रिभ्याम्	स्त्रिभ्याम्	अतिस्त्रियोः	अतिस्त्रियोः
बहुवचने	०स्त्रियः	०स्त्रियः	०स्त्रियः:०स्त्रीः	०स्त्रिभिः	०भ्यः	स्त्रिभ्यः	अतिस्त्रीणाम्	अतिस्त्रिषु

* 'श्री' १।४।६५

एकवचने	श्रीः	श्रीः	श्रियम्	श्रिया	श्रियै श्रिये	श्रियाः श्रियः	श्रियाः श्रियः	श्रियाम् श्रियि
द्विवचने	श्रियौ	श्रियौ	श्रियौ	श्रीभ्याम्	श्रीभ्याम्	श्रीभ्याम्	श्रियोः	श्रियोः
बहुवचने	श्रियः	श्रियः	श्रियः	श्रीभिः	श्रीभ्यः	श्रीभ्यः	श्रीणाम् श्रियाम्	श्रीषु

एवं भी ह्री धी सुधी प्रभृतयः

'प्रधी'

एकवचने	प्रधीः	प्रधि	प्रध्यम्	प्रध्या	प्रध्यै	प्रध्याः	प्रध्याः	प्रध्याम्
द्विवचने	प्रध्यौ	प्रध्यौ	प्रध्यौ	प्रधीभ्याम्	प्रधीभ्याम्	प्रधीभ्याम्	प्रध्योः	प्रध्योः
बहुवचने	प्रध्यः	प्रध्यः	प्रध्यः	प्रधीभिः	प्रधीभ्यः	प्रधीभ्यः	प्रधीनाम्	प्रधीषु

ग्रामणी—पुंवत्,

'सेनानी' शब्दः द्रष्टव्यः ।

* 'धेनु' १।४।७।

एकवचने	धेनुः	धेनो	धेनुम्	धेन्वा	धेन्वै धेनवे	धेन्वाः धेनोः	धेन्वाः धेनोः	धेन्वाम् धेनौ
द्विवचने	धेनू	धेनू	धेनू	धेनुभ्याम्	धेनुभ्याम्	धेनुभ्याम्	धेन्वोः	धेन्वोः
बहुवचने	धेनवः	धेनवः	धेनूः	धेनुभिः	धेनुभ्यः	धेनुभ्यः	धेनूनाम्	धेनुषु

'क्रोष्टु' ७।१।९६,४।१।५=क्रोष्ट्री 'देवी' शब्दवत्

'बधू'

एकवचने	बधूः	बधु	बधूम्	बध्वा	बध्वै	बध्वाः	बध्वाः	बध्वाम्
द्विवचने	बध्वौ	बध्वौ	बध्वौ	बधूभ्याम्	बधूभ्याम्	बधूभ्याम्	बध्वोः	बध्वोः
बहुवचने	बध्वः	बध्वः	बधूः	बधूभिः	बधूभ्यः	बधूभ्यः	बधूनाम्	बधूषु

एवं 'तनू' 'चमू' 'चञ्चू' श्वश्रू—प्रभृतयः शब्दाः ।

(२५) अकारान्त-क्लीवलिङ्ग-शब्दरूप-प्रकरणम् ।

* 'भ्रू'

	कर्त्तरि	सम्बोधने	कर्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	भ्रूः	भ्रूः	भ्रुवम्	भ्रुवा	भ्रुवै भ्रुवे	भ्रुवाः भ्रुवः	भ्रुवाः भ्रुवः	भ्रुवाम् भ्रुवि
द्विवचने	भ्रुवौ	भ्रुवौ	भ्रुवौ	भ्रूभ्याम्	भ्रूभ्याम्	भ्रूभ्याम्	भ्रुवोः	भ्रुवोः
बहुवचने	भ्रुवः	भ्रुवः	भ्रुवः	भ्रूभिः	भ्रूभ्यः	भ्रूभ्यः	भ्रूणाम् भ्रुवाम्	भ्रूषु

६।४।७७, १।४।५, ६ ;' एवं 'सुभ्रू'

'खलपू' 'सुलू' 'कारभू'' कारभू'

एकवचने	खलप्वः	खलपूः	खलप्वम्	खलप्वा	खलप्वै	खलप्वाः	खलप्वाः	खलप्वाम्
द्विवचने	खलप्वौ	खलप्वौ	खलप्वौ	खलपूभ्याम्	खलपूभ्याम्	खलपूभ्याम्	खलप्वोः	खलप्वोः
बहुवचने	खलप्वः	खलप्वः	खलप्वः	खलपूभिः	खलपूभ्यः	खलपूभ्यः	खलपूनाम्	खलपूषु

'वर्षाभू' (मण्डूकी)

एकवचने	वर्षाभूः	वर्षाभूः	वर्षाभ्वम्	वर्षाभ्वा	वर्षाभ्वै	वर्षाभ्वाः	वर्षाभ्वाः	वर्षाभ्वाम्
द्विवचने	वर्षाभ्वौ	वर्षाभ्वौ	वर्षाभ्वौ	वर्षाभूभ्याम्	वर्षाभूभ्याम्	वर्षाभूभ्याम्	वर्षाभ्वोः	वर्षाभ्वोः
एकवचने	गोङ्	गोङ्	गोङ्	गोञ्चा	गोञ्चे	गोञ्चः	गोञ्चः	गोञ्चि
द्विवचने	गोञ्चौ	गोञ्चौ	गोञ्चौ	गोङ्भ्याम्	गोङ्भ्याम्	गोङ्भ्याम्	गोञ्चोः	गोञ्चोः
बहुवचने	गोञ्चि	गोञ्चि	गोञ्चि	गोङ्भिः	गोङ्भ्यः	गोङ्भ्यः	गोञ्चाम्	गोङ्क्षु

* 'असृज्' (रक्तम्)

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	असृक्	असृक्	असृक्	असृजा	असृजे	असृजः	असृजः	असृजि
द्विवचने	असृजी	असृजी	असृजी	असृग्भ्याम्	असृग्भ्याम्	असृग्भ्याम्	असृजोः	असृजोः
बहुवचने	असृञ्जि	असृञ्जि	असृञ्जि	असृग्भिः	असृग्भ्यः	असृग्भ्यः	असृजाम्	असृक्षु

अथवा ६।१।६३

एकवचने	असृक्	असृक्	असृक्	अस्ना	अस्ने	अस्नः	अस्नः	अस्नि असनि
द्विवचने	असृजी	असृजी	असृजी	असभ्याम्	असभ्याम्	असभ्याम्	अस्नोः	अस्नोः
बहुवचने	असृञ्जि	असृञ्जि	असानि	असभिः	असभ्यः	असभ्यः	अस्नाम्	अससु

'ऊर्ज्' (अन्नम्)।

एकवचने	ऊर्क्	ऊर्क्	ऊर्क्	ऊर्जा	ऊर्जे	ऊर्जः	ऊर्जः	ऊर्जि
द्विवचने	ऊर्जी	ऊर्जी	ऊर्जी	ऊर्ग्भ्याम्	ऊर्ग्भ्याम्	ऊर्ग्भ्याम्	ऊर्जोः	ऊर्जोः
बहुवचने	ऊन्र्जि	ऊन्र्जि	ऊन्र्जि	ऊर्ग्भिः	ऊर्ग्भ्यः	ऊर्ग्भ्यः	ऊर्जाम्	ऊर्क्षु

'बहूर्ज्'

एकवचने	बहूर्क्	बहूर्क्	बहूर्क्	बहूर्जा	बहूर्जे	बहूर्जः	बहूर्जः	बहूर्जि
द्विवचने	बहूर्जी	बहूर्जी	बहूर्जी	बहूर्ग्भ्याम्	बहूर्ग्भ्याम्	बहूर्ग्भ्याम्	बहूर्जोः	बहूर्जोः
बहुवचने	बहून्र्जि ०र्ञ्जि	०र्जि ०हूर्ञ्जि	०र्जि ०र्ञ्जि	बहूर्ग्भिः	बहूर्ग्भ्यः	बहूर्ग्भ्यः	बहूर्जाम्	बहूर्क्षु

* 'गच्छत्'।

एकवचने	गच्छत्	गच्छत्	गच्छत्	गच्छता	गच्छते	गच्छतः	गच्छतः	गच्छति
द्विवचने	गच्छन्ती	गच्छन्ती	गच्छन्ती	गच्छद्भ्याम्	गच्छद्भ्याम्	गच्छद्भ्याम्	गच्छतोः	गच्छतोः
बहुवचने	गच्छन्ति	गच्छन्ति	गच्छन्ति	गच्छद्भिः	गच्छद्भ्यः	गच्छद्भ्यः	गच्छताम्	गच्छत्सु

एवं 'पचत्' 'भवत्' 'चलत्' दीव्यत् 'भ्राम्यत्' 'शाम्यत्' ७।१।८१

* 'तुदत्' ७।१।८०, (एवं "करिष्यत्" "भविष्यत्")

एकवचने	तुदत्	तुदत्	तुदत्	तुदता	तुदते	तुदतः	तुदतः	तुदति
द्विवचने	तुदती तुदन्ती	०ती ०न्ती	०ती ०न्ती	तुदद्भ्याम्	तुदद्भ्याम्	तुदद्भ्याम्	तुदतोः	तुदतोः
बहुवचने	तुदन्ति	तुदन्ति	तुदन्ति	तुदद्भिः	तुदद्भ्यः	तुदद्भ्यः	तुदताम्	तुदत्सु

* 'भात्' ७।१।८०

एकवचने	भात्	भात्	भात्	भाता	भाते	भातः	भातः	भाति
द्विवचने	भाती भान्ती	भाती भान्ती	भाती भान्ती	भाद्भ्याम्	भाद्भ्याम्	भाद्भ्याम्	भातोः	भातोः
बहुवचने	भान्ति	भान्ति	भान्ति	भाद्भिः	भाद्भ्यः	भाद्भ्यः	भाताम्	भात्सु

* महत् ६।३।१०, ७।१।१९।२०।७२।

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	महत्	महत्	महत्	महता	महते	महतः	महतः	महति
द्विवचने	महती	महती	महती	महद्भ्याम्	महद्भ्याम्	महद्भ्याम्	महतोः	महतोः
बहुवचने	महान्ति	महान्ति	महान्ति	महद्भिः	महद्भ्यः	महद्भ्यः	महताम्	महत्सु

* 'जगत्' (एवं 'श्रीमत्')

एकवचने	जगत्	जगत्	जगत्	जगता	जगते	जगतः	जगतः	जगति
द्विवचने	जगती	जगती	जगती	जगद्भ्याम्	जगद्भ्याम्	जगद्भ्याम्	जगतोः	जगतोः
बहुवचने	जगन्ति	जगन्ति	जगन्ति	जगद्भिः	जगद्भ्यः	जगद्भ्यः	जगताम्	जगत्सु

* 'ददत्' ७।१।७८, ७९

एकवचने	ददत्	ददत्	ददत्	ददता	ददते	ददतः	ददतः	ददति
द्विवचने	ददती	ददती	ददती	ददद्भ्याम्	ददद्भ्याम्	ददद्भ्याम्	ददतोः	ददतोः
बहुवचने	ददन्ति ददति	ददन्ति ददति	ददन्ति ददति	ददद्भिः	ददद्भ्यः	ददद्भ्यः	ददताम्	ददत्सु

'यकृत्'

एकवचने	यकृत्	यकृत्	यकृत्	यकृता	यकृते	यकृतः	यकृतः	यकृति
द्विवचने	यकृती	यकृती	यकृती	यकृद्भ्याम्	यकृद्भ्याम्	यकृद्भ्याम्	यकृतोः	यकृतोः
बहुवचने	यकृन्ति	यकृन्ति	यकृन्ति	यकृद्भिः	यकृद्भ्यः	यकृद्भ्यः	यकृताम्	यकृत्सु

अथवा ६।१।६३, ६।२।८

एकवचने	यकृत्	यकृत्	यकृत्	यक्ना	यक्ने	यक्नः	यक्नः	यक्नि यकनि
द्विवचने	यकृती	यकृती	यकृती	यकभ्याम्	यकभ्याम्	यकभ्याम्	यक्नोः	यक्नोः
बहुवचने	यकृन्ति	यकन्त्	यकानि	यकभिः	यकभ्यः	यकभ्यः	यक्नाम	यकसु

'शकृत्' (विष्ठा)

एकवचने	शकृत्	शकृत्	शकृत्	शकृता	शकृते	शकृतः	शकृतः	शकृति
द्विवचने	शकृती	शकृती	शकृती	शकृद्भ्याम्	शकृद्भ्याम्	शकृद्भ्याम्	शकृतोः	शकृतोः
बहुवचने	शकृन्ति	शकृन्ति	शकृन्ति	शकृद्भिः	शकृद्भ्यः	शकृद्भ्यः	शकृताम्	शकृत्सु

अथवा ६।१।६३, ६।२।८

एकवचने	शकृत्	शकृद्	शकृत्	शक्ना	शक्ने	शक्नः	शक्नः	शक्नि शकनि
द्विवचने	शकृती	शकृती	शकृती	शकभ्याम्	शकभ्याम्	शकभ्याम्	शक्नोः	शक्नोः
बहुवचने	शकृन्ति	शकृन्ति	शकानि	शकभिः	शकभ्यः	शकभ्यः	शक्नाम्	शकसु

'बेभिद्' (एवम् 'चेच्छिद्')

	कर्त्तरि प्रथमा	सम्बोधने प्रथमा	कर्म्मणि द्वितीया	करणे तृतीया	सम्प्रदाने चतुर्थी	अपादाने पञ्चमी	सम्बन्धे षष्ठी	अधिकरणे सप्तमी
एकवचने	बेभित्	बेभित्	बेभित्	बेभिदा	बेभिदे	बेभिदः	बेभिदः	बेभिदि
द्विवचने	बेभिदी	बेभिदी	बेभिदी	बेभिद्भ्याम्	बेभिद्भ्याम्	बेभिद्भ्याम्	बेभिदोः	बेभिदोः
बहुवचने	बेभिन्दि	बेभिन्दि	बेभिन्दि	बेभिद्भिः	बेभिद्भ्यः	बेभिद्भ्यः	बेभिदाम्	बेभित्सु

* सर्व्वनाम 'तद्' ७।२।१०२

एकवचने	तत्	०	तत्	तेन	तस्मै	तस्मात्	तस्य	तस्मिन्
द्विवचने	ते	०	ते	ताभ्याम्	ताभ्याम्	ताभ्याम्	तयोः	तयोः
बहुवचने	तानि	०	तानि	तैः	तेभ्यः	तेभ्यः	तेषाम्	तेषु

* सर्व्वनाम 'यद्' ७।२।१०२

एकवचने	यत्	०	यत्	येन	यस्मै	यस्मात्	यस्य	यस्मिन्
द्विवचने	ये	०	ये	याभ्याम्	याभ्याम्	याभ्याम्	ययोः	ययोः
बहुवचने	यानि	०	यानि	यैः	येभ्यः	येभ्यः	येषाम्	येषु

* सर्व्वनाम 'एतद्' ७।२।१०२

एकवचने	एतत्	०	एतत् एनत्	एतेन एनेन	एतस्मै	एतस्मात्	एतस्य	एतस्मिन्
द्विवचने	एते	०	एते एने	एताभ्याम्	एताभ्याम्	एताभ्याम्	एतयोः एनयोः	एतयोः एनयोः
बहुवचने	एतानि	०	एतानि एनानि	एतैः	एतेभ्यः	एतेभ्यः	एतेषाम्	एतेषु

* सर्व्वनाम् 'त्यद्' ७।२।१०२

एकवचने	त्यत्	०	त्यत्	त्येन	त्यस्मै	त्यस्मात्	त्यस्य	त्यस्मिन्
द्विवचने	त्ये	०	त्ये	त्याभ्याम्	त्याभ्याम्	त्याभ्याम्	त्ययोः	त्ययोः
बहुवचने	त्यानि	०	त्यानि	त्यैः	त्येभ्यः	त्येभ्यः	त्येषाम्	त्येषु

* 'नामन्'

एकवचने	नाम	नाम, नामन्	नाम	नाम्ना	नाम्ने	नाम्नः	नाम्नः	नाम्नि नामनि
द्विवचने	नाम्नी नामनी	नाम्नी नामनी	नाम्नी नामनी	नामभ्याम्	नामभ्याम्	नामभ्याम्	नाम्नोः	नाम्नोः
बहुवचने	नामानि	नामानि	नामानि	नामभिः	नामभ्यः	नामभ्यः	नाम्नाम्	नामसु

एवं 'लोमन्' 'धामन्' ६।४।१२६, ८।२।८, ६।४।८

ब्रह्मन्

एकवचने	ब्रह्म	ब्रह्मन् ब्रह्म	ब्रह्म	ब्रह्मणा	ब्रह्मणे	ब्रह्मणः	ब्रह्मणः	ब्रह्मणि
द्विवचने	ब्रह्मणी	ब्रह्मणी	ब्रह्मणी	ब्रह्मभ्याम्	ब्रह्मभ्याम्	ब्रह्मभ्याम्	ब्रह्मणोः	ब्रह्मणोः
बहुवचने	ब्रह्माणि	ब्रह्माणि	ब्रह्माणि	ब्रह्मभिः	ब्रह्मभ्यः	ब्रह्मभ्यः	ब्रह्मणाम्	ब्रह्मसु

६।४।८, ६।४।१३७, ८।२।८, एवं 'वर्म्मन्' 'कर्म्मन्'

'दण्डिन्'

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	दण्डि	दण्डिन् दण्डि	दण्डि	दण्डिना	दण्डिने	दण्डिन:	दण्डिन:	दण्डिनि
द्विवचने	दण्डिनौ	दण्डिनौ	दण्डिनौ	दण्डिभ्याम्	दण्डिभ्याम्	दण्डिभ्याम्	दण्डिनो:	दण्डिनो:
बहुवचने	दण्डीनि	दण्डीनि	दण्डीनि	दण्डिभि:	दण्डिभ्य:	दण्डिभ्य:	दण्डिनाम्	दण्डिषु

एवं 'स्थायिन्' शोभिन् 'गुणिन्' 'स्रग्विन्' 'वाग्मिन्' 'हारिन्'

अतिमथिन्—अतिमथि अतिमथी अतिमन्थानि ; सुपथिन्…सुपथी सुपन्थानि ; अत्यभुक्षिन्—अत्यभुक्षि अत्यभुक्षी अत्यभुक्षाणि इत्यादि। ६।२।८

* अहन् ८।२।६८, ६।४।१३६, ६।४।८

एकवचने	अह:	अह:	अह:	अह्ना	अह्ने	अह्न:	अह्न:	अह्नि अहनि
द्विवचने	अह्नी अहनी	अह्नी अहनी	अह्नी अहनी	अहोभ्याम्	अहोभ्याम्	अहोभ्याम्	अह्नो:	अह्नो:
बहुवचने	अहानि	अहानि	अहानि	अहोभि:	अहोभ्य:	अहोभ्य:	अह्नाम्	अह:सु

'बहुवृत्रहन्' (बहुव्रीहि),

एकवचने	बहुवृत्रह	०वृत्रहन् ०वृत्रह	०वृत्रह	बहुवृत्रघ्ना	०घ्ने	०घ्न:	०घ्न:	०घ्नि
द्विवचने	०वृत्रघ्नी ०हणी	०वृत्रघ्नी ०हणी	०घ्नी ०हणी	बहुवृत्रहभ्याम्	०हभ्याम्	०हभ्याम्	०घ्नो:	०घ्नो:
बहुवचने	बहुवृत्रहाणि	बहुवृत्रहाणि	०वृत्रहाणि	बहुवृत्रहभि:	०हभ्य:	०हभ्य:	०घ्नाम्	बहुवृत्रहसु

'बहुपूषन्' (एवम् 'बह्वर्य्यमन्')

एकवचने	बहुपूष	०पूषन् ०पूष	बहुपूष	बहुपूष्णा	०पूष्णे	०पूष्ण:	०पूष्ण:	०पूष्णि ०पूषणि
द्विवचने	बहुपूष्णी ०पूषणी	०पूष्णी ०पूषणी	०पूष्णी ०पूषणी	०पूषभ्याम्	०पूषभ्याम्	०पूषभ्याम्	०पूष्णो:	०पूष्णो:
बहुवचने	बहुपूषाणि	बहुपूषाणि	बहुपूषाणि	०पूषभि:	०पूषभ्य:	०पूषभ्य:	०पूष्णाम्	०पूषसु

'स्वप्' (सर:) ७।४।४८,

एकवचने	स्वप्	स्वप्	स्वप्	स्वपा	स्वपे	स्वप:	स्वप:	स्वपि
द्विवचने	स्वपौ	स्वपौ	स्वपौ	स्वद्भ्याम्	स्वद्भ्याम्	स्वद्भ्याम्	स्वपो:	स्वपो:
बहुवचने	स्वम्पि स्वाम्पि	स्वम्पि स्वाम्पि	स्वम्पि स्वाम्पि	स्वद्भि:	स्वद्भ्य:	स्वद्भ्य:	स्वपाम्	स्वप्सु

सर्व्वनाम 'किम्'

एकवचने	किम्	०	किम्	केन	कस्मै	कस्मात्	कस्य	कस्मिन्
द्विवचने	के	०	के	काभ्याम्	काभ्याम्	काभ्याम्	कयो:	कयो:
बहुवचने	कानि	०	कानि	कै:	केभ्य:	केभ्य:	केषाम्	केषु

सर्व्वनाम 'इदम्'।

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	इदम्	०	इदम् एनत्	अनेन एनेन	अस्मै	अस्मात्	अस्य	अस्मिन्
द्विवचने	इमे	०	इमे एने	आभ्याम्	आभ्याम्	आभ्याम्	अनयोः } एनयोः }	अनयोः } एनयोः }
बहुवचने	इमानि	०	इमानि एनानि	एभिः	एभ्यः	एभ्यः	एषाम्	एषु

'वार्' (जलम्)

एकवचने	वाः	वाः	वाः	वारा	वारे	वारः	वारः	वारि
द्विवचने	वारी	वारी	वारी	वार्भ्याम्	वार्भ्याम्	वार्भ्याम्	वारोः	वारोः
बहुवचने	वारि	वारि	वारि	वार्भिः	वार्भ्यः	वार्भ्यः	वाराम्	वार्षु

* 'चतुर्'

बहुवचने	चत्वारि	चत्वारि	चत्वारि	चतुर्भिः	चतुर्भ्यः	चतुर्भ्यः	चतुर्णाम्	चतुर्षु

'परम-चतुर्'

बहुवचने	परमचत्वारि	०चत्वारि	०चत्वारि	परमचतुर्भिः	परमचतुर्भ्यः	परमचतुर्भ्यः	०चतुर्णाम्	०चतुर्षु

'प्रिय-चतुर्' गौणत्वे नुट् न।

एकवचने	प्रियचतुः	०चतुः	०चतुः	प्रियचतुरा	प्रियचतुरे	०चतुरः	०चतुरः	०चतुरि
द्विवचने	प्रियचतुरी	०चतुरी	०चतुरी	प्रियचतुर्भ्याम्	प्रियचतुर्भ्याम्	०चतुर्भ्याम्	०चतुरोः	०तुरोः
बहुवचने	प्रियचत्वारि	०चत्वारि	०चत्वारि	प्रियचतुर्भिः	०चतुर्भ्यः	०चतुर्भ्यः	०चतुराम्	०चतुर्षु

* 'विमलदिव् (न नुम्)

एकवचने	विमलद्यु	०द्यु	०द्यु	०दिवा	०दिवे	०दिवः	०दिवः	०दिवि
द्विवचने	विमलदिवी	०दिवी	०दिवी	०द्युभ्याम्	०द्युभ्याम्	०द्युभ्याम्	०दिवोः	०दिवोः
बहुवचने	विमलदिवि	०दिवि	०दिवि	०द्युभिः	०द्युभ्यः	०द्युभ्यः	०दिवाम्	०द्युषु

* 'धनुष्' एवं 'वपुष्'

एकवचने	धनुः	धनुः	धनुः	धनुषा	धनुषे	धनुषः	धनुषः	धनुषि
द्विवचने	धनुषी	धनुषी	धनुषी	धनुर्भ्याम्	धनुर्भ्याम्	धनुर्भ्याम्	धनुषोः	धनुषोः
बहुवचने	धनूंषि	धनूंषि	धनूंषि	धनुर्भिः	धनुर्भ्यः	धनुर्भ्यः	धनुषाम्	धनुःषु

* 'चक्षुष्'

एकवचने	चक्षुः	चक्षुः	चक्षुः	चक्षुषा	चक्षुषे	चक्षुषः	चक्षुषः	चक्षुषि
द्विवचने	चक्षुषी	चक्षुषी	चक्षुषी	चक्षुर्भ्याम्	चक्षुर्भ्याम्	चक्षुर्भ्याम्	चक्षुषोः	चक्षुषोः
बहुवचने	चक्षूंषि	चक्षूंषि	चक्षूंषि	चक्षुर्भिः	चक्षुर्भ्यः	चक्षुर्भ्यः	चक्षुषाम्	चक्षुःषु

* 'हविष्' (एवं सर्पिष्)

	कर्त्तरि	सम्बोधने	कर्म्मणि	करणे	सम्प्रदाने	अपादाने	सम्बन्धे	अधिकरणे
	प्रथमा	प्रथमा	द्वितीया	तृतीया	चतुर्थी	पञ्चमी	षष्ठी	सप्तमी
एकवचने	हविः	हविः	हविः	हविषा	हविषे	हविषः	हविषः	हविषि
द्विवचने	हविषी	हविषी	हविषी	हविर्भ्याम्	हविर्भ्याम्	हविर्भ्याम्	हविषोः	हविषोः
बहुवचने	हवींषि	हवींषि	हवींषि	हविर्भिः	हविर्भ्यः	हविर्भ्यः	हविषाम्	हविःषु

'पिपठिष्' एवं चिकीर्ष् (न नुम्)

एकवचने	पिपठीः	पिपठीः	पिपठीः	पिपठिषा	पिपठिषे	पिपठिषः	०ठिषः	पिपठिषि
द्विवचने	पिपठिषी	पिपठिषी	पिपठिषी	पिपठीर्भ्याम्	पिपठीर्भ्याम्	०र्भ्याम्	पिपठिषोः	पिपठिषोः
बहुवचने	पिपठिषि	पिपठिषि	पिपठिषि	पिपठीर्भिः	पिपठीर्भ्यः	पिपठीर्भ्यः	पिपठिषाम्	पिपठिःषु

* 'पयस्' (एवं 'मनस्' 'यशस्)

एकवचने	पयः	पयः	पयः	पयसा	पयसे	पयसः	पयसः	पयसि
द्विवचने	पयसी	पयसी	पयसी	पयोभ्याम्	पयोभ्याम्	पयोभ्याम्	पयसोः	पयसोः
बहुवचने	पयांसि	पयांसि	पयांसि	पयोभिः	पयोभ्यः	पयोभ्यः	पयसाम्	पयःसु

विद्वस्—विद्वत् विदुषी विद्वांसि; तस्थिवस्—तस्थिवत् तस्थुषी तस्थिवांसि; गरीयस्—गरीयः गरीयसी गरीयांसि।

"सुपंस्" (बहुव्रीहिः)

एकवचने	सुपुम्	सुपुम्	सुपुम्	सुपुंसा	सुपुंसे	सुपुंसः	सुपुंसः	सुपुंसि
द्विवचने	सुपुंसी	सुपुंसी	सुपुंसी	सुपुम्भ्याम्	सुपुम्भ्याम्	सुपुम्भ्याम्	सुपुंसोः	सुपुंसोः
बहुवचने	सुपुमांसि	सुपुमांसि	सुपुमांसि	सुपुम्भिः	सुपुम्भ्यः	सुपुम्भ्यः	सुपुंसाम्	सुपुंसु

* अदस् ८।२।३, ८०, ८१

एकवचने	अदः	०	अदः	अमुना	अमुष्मै	अमुष्मात्	अमुष्य	अमुष्मिन्
द्विवचने	अमू	०	अमू	अमूभ्याम्	अमूभ्याम्	अमूभ्याम्	अमुयोः	अमुयोः
बहुवचने	अमूनि	०	अमूनि	अमीभिः	अमीभ्यः	अमीभ्यः	अमीषाम्	अमीषु

'स्वनडुह्' (बहुव्रीहिः

एकवचने	स्वनडुत्	०डुत्	०डुत्	स्वनडुहा	स्वनडुहे	स्वनडुहः	स्वनडुहः	स्वनडुहि
द्विवचने	स्वनडुही	०डुही	०डुही	स्वनडुद्भ्याम्	स्वनडुद्भ्याम्	स्वनडुद्भ्याम्	स्वनडुहोः	स्वनडुहोः
बहुवचने	स्वनड्वांहि	०ड्वांहि	०ड्वांहि	स्वनडुद्भिः	स्वनडुद्भ्यः	स्वनडुद्भ्यः	स्वनडुहाम्	स्वनडुत्सु

एतद्भिन्नाः सर्व्वे व्यञ्जनवर्णान्ताः क्लीवलिङ्गशब्दाः पुंवद् भवन्ति, प्रथमा-विभक्तौ द्वितीयाविभक्तौ च ७।१।२३ सूत्रम्, ७।१।१९ सूत्रम्, ७।१।७२ सूत्रम् ७।१।२० सूत्रञ्च प्रयोज्यम्।

इति शब्द-खण्डं सम्पूर्णम्

---

* अदस्-शब्दस्य रूपसाधनक्रमः, प्रथमं सर्व्व-वत् ततः ८।२।३, ८०, ८१

एकवचने	अदः	अदः	अदेन	अदस्मै	अदस्मात्	अदस्य	अदस्मिन्
द्विवचने	अदे	अदे	अदाभ्याम्	अदाभ्याम्	अदाभ्याम्	अदयोः	अदयोः
बहुवचने	अदानि	अदानि	अदेभिः	अदेभ्यः	अदेभ्यः	अदेषाम्	अदेषु

अथ पाणिनि-परिशिष्टे धातु-खण्डम्।

पाणिनीयो धातुपाठः

तत्र भ्वादयः।

* 'भू' सत्तायाम् १ (भवति
उदात्तः परस्मैभाषः

अथ तवर्गीयान्ताः।

उदात्ता अनुदात्तेत
आत्मने-पदिनः ३६

* 'एध' वृद्धौ २ (एधते
* 'स्पर्द्ध' संघर्षे ३ (स्पर्द्धते
'गाधृ' प्रतिष्ठा-लिप्सयो-र्ग्रन्थे च ४
* 'बाधृ' लोड़ने ५ (वाधते
* 'नाधृ' } याच्ञोपतापैश्वर्याशीःषु (नाथते
'नाधृ' }
'दध' धारणे (दधते
'स्कुदि' आप्रवणे
'श्विदि' श्वैत्ये १०
* 'वदि' अभिवादन-स्तुत्योः (वन्दते
'भदि कल्याणे सुखे च
'मदि' स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (मन्दते
* 'स्पदि' किञ्चिच्चलने (स्पन्दते
'क्लिदि' परिदेवने १५
* 'मुद' हर्षे (मोदते
* 'दद' दाने (ददते
* 'ष्वद' } आस्वादने (स्वदते
'स्वर्द' }

'उर्द' माने क्रीड़ायाञ्च
'कुर्द' } क्रीड़ायामेव
'खुर्द' }
'गुर्द' }
'गुद' }
'षूद' चरणे २५
* 'ह्राद' अव्यक्त-शब्दे (ह्रादते
* 'ह्लादी' सुखे च (ह्लादते
* 'स्वाद' आस्वादने (स्वादते
* 'पर्द' कुत्सित-शब्दे
* 'यती' प्रयत्ने ३० (यतते
'युतृ' } भासने
'जुतृ' }
'विथृ' } याचने
'वेथृ' }
'श्रथि' शैथिल्ये ३५
'ग्रथि' कौटिल्ये
* 'कत्थ' श्लाघायाम् ३७ (कत्थते

अथ उदात्ता उदात्तेतः

परस्मैपदिनः

* 'अत' सातत्यगमने (अतति
* 'चिती' संज्ञाने ३९ (चेतति
'च्युतिर्' आसेचने ४०

'श्चुतिर्' क्षरणे
'श्चुतिर्' च इत्येके
'मन्थ' विलोड़ने (मन्थति
'कुथि' } हिंसा-संक्लेशनयोः
'पुथि' }
'लुथि' }
'मथि' }
'षिध' गत्याम् (सेधति
'षिधू' शास्त्रे माङ्गल्ये च (सेधति
* 'खाद' भक्षणे (खादति
'खद' स्थैर्य्ये हिंसायाञ्च
'बद' स्थैर्य्ये
* 'गद' व्यक्तायां वाचि (गदति
'रद' विलेखने
'णद' अव्यक्तशब्दे (नदति
'अर्द्द' गतौ याचने च ५५
'नर्द' } शब्दे (नर्दति, गर्दति
'गर्द' }
'तर्द' हिंसायाम् (तर्दति
* 'कर्द' कुत्सित-शब्दे (कर्दति
'खर्द' दन्दशूके ६० (खर्दति
'अति' } बन्धने (अन्तति, अन्दति
'अदि' }
* 'इदि' परमैश्वर्य्ये (इन्दति
'विदि' अवयवे (विन्दति
'भिदि' इति पाठान्तरम्

---

* इत्प्रकरणम् १।३।२—९, १२, ७२ ; ञि ३।२।१८७ ; टु ३।३।८९ ; डु ३।३।८८, अनिदित् ६।४।२४ षित् ३।३।१०४, इदित् ७।१।५८ इरित् ३।१।५७, ष = स ६।१।६४ ण = न ६।१।६५, ओदित् ८।२।४५, उदित् ७।२।५६, ऋदित् ७।२।६२, आदित् ७।२।१६, ईदित् ७।२।१४, एज ६।१।४५, लृ दित् ३।१।५५, ऋदित् ७।४।२, ऊदित् ७।२।४४

* 'णिदि' कुत्सायाम् ६५ (निन्दति
* 'टु नदि'—समृद्धौ (नन्दति
* 'चदि'—आह्लादे (चन्दति
'वदि'—चेष्टायाम्
* 'कदि' / 'क्रदि' / 'क्लदि' } आह्वाने रोदने च (क्रन्दति
'क्लिदि'—परिदेवने
'शुन्ध'—शुद्धौ ७३

अथ कवर्गीयान्ताः

तत्र उदात्ता अनुदात्तेत आत्मनेपदिनः ४१
'शीकृ'—सेचने ७४
(अयं दन्त्यादिरित्यन्ये)
'लोकृ' दर्शने ७५ (लोकते
'श्लोकृ'—संघाते
'द्रेकृ' / 'ध्रेकृ' } शब्दोत्साहयोः
'रेकृ'—शङ्कायाम्
'सेकृ' / 'स्रेकृ' / 'स्रकि' / 'श्रकि' / 'श्लकि' } गतौ
* 'शकि'—शङ्कायाम् ८५ (शङ्कते
'अकि'—लक्षणे (अङ्कते
* 'वकि'—कौटिल्ये (वङ्कते
'मकि'—मण्डने
'कक'—लौल्ये
'कुक' / 'वृक' } आदाने
'चक'—तृप्तौ प्रतिघाते च (चकते

'ककि' / 'वकि' / 'श्वकि' / 'त्रकि' / 'ढौकृ' / 'त्रौकृ' / 'ष्वष्क' / 'वस्क' / 'मस्क' / 'टिकृ' / 'टीकृ' / 'तिकृ' / 'तीकृ' / 'रघि' / 'लघि' } गत्यर्थाः (कङ्कते लङ्घते
तृतीयो दन्त्यादिः इत्येके
'लघि' भोजन-निवृत्तावपि
'अघि' / 'वघि' / 'मघि' } गत्याक्षेपे ११०
'मघि' कैतवे च
'राघृ' / 'लाघृ' / 'द्राघृ' } सामर्थ्ये
'ध्राघृ' इत्यपि केचित्
'द्राघृ' आयामे च
'श्लाघृ'—कत्थने (श्लाघते ११४

अथ उदात्ता उदात्तेतः

परस्मैपदिनः
'फक्क'—नीचैर्गतौ (फक्कति ११५
'तक'—हसने (तकति
'तकि'—कृच्छ्रजीवने (तङ्कति
'बुक्क'—भषणे (भषणं श्वरवः बुक्कति,
'कख'—हसने
'ओखृ' / 'राखृ' / 'लाखृ' / 'द्राखृ' / 'ध्राखृ' } शोषणालमर्थयोः (ओखति
'शाखृ' / 'श्लाखृ' } व्याप्तौ (शाखति
'उख' / 'उखि' / 'वख' / 'वखि' / 'मख' / 'मखि' / 'णख' / 'णखि' / 'रख' / 'रखि' / 'लख' / 'लखि' / 'इख' / 'इखि' / 'ईखि' / 'वल्ग' / 'रगि' / 'लगि' / 'अगि' / 'वगि' / 'मगि' / 'तगि' / 'त्वगि' / 'श्रगि' / 'श्लगि' 'इगि' / 'रिगि' 'लिगि' } गत्यर्थाः (उङ्खति इङ्खति, वल्गति, इङ्गति लिङ्गति
'रिख' / 'त्रख' / 'त्रिखि' / 'शिखि' } इत्यपि केचित् (शिङ्खति

'त्वगि'—कम्पने च

'युगि' / 'जुगि' / 'बुगि' } वर्जने

'घघ'—हसने १५८

'मघि'—मण्डने

'शिघि'—आघ्राणे १६०

——

अथ चवर्गीयान्ताः

तत्र अनुदात्तेतः उदात्ता आत्मनेपदिनः २१

'वर्च'—दीप्तौ (वर्चते

* 'षच'—सेचने सेवने च (सचते

* 'लोचृ'—दर्शने (लोचते

'शच'—व्यक्तायां वाचि

'श्वच' / 'श्वचि' } गतौ

'कच'—बन्धने (कचते

'कचि' / 'काचि' } दीप्ति-बन्धनयोः

'मच' / 'मुचि' } कल्कने *

* कल्कनं दम्भः शाठ्यञ्च

'मचि'—धारणोच्छ्राय-पूजनेषु (मञ्चते

* 'पचि'—व्यक्तीकरणे (पञ्चते

'ष्टुच'—प्रसादे

'ऋज'—गति-स्थानार्जनोपार्जनेषु

* 'ऋजि' / 'भृजी' } भर्जने (भर्जते

'एजृ' / 'भ्रेजृ' / 'भ्राज' } दीप्तौ (एजते भ्राजते

'ईज'—गति-कुत्सनयोः १८१

——

अथ उदात्ता उदात्तेतः

परस्मैपदिनः ७१ त्विस्त्वनुदात्तः

* 'शुच'—शोके (शोचति

'कुच'—शब्दे तारे

'कुञ्च' / 'क्रुञ्च' } कौटिल्याल्पीभावयोः

'लुञ्च'—अपनयने

* 'अञ्चु'—गति-पूजनयोः (अञ्चति

'वञ्चु' / 'चञ्चु' / 'तञ्चु' / 'त्वञ्चु' / 'म्रुञ्चु' / 'म्लुञ्चु' / 'म्रुचु' / 'म्लुचु' } गत्यर्थाः

'ग्रुचु' / 'ग्लुचु' / 'कुजु' / 'खुजु' } स्तेयकरणे

'ग्लुञ्चु' / 'षस्ज' } गतौ

* 'गुजि'—अव्यक्तशब्दे (गुञ्जति

* 'अर्च'—पूजायाम् (अर्चति

* 'म्लेच्छ'—अव्यक्तशब्दे (म्लेच्छति

'लच्छ' / 'लाछि' } लक्षणे (लाञ्छति

* 'वाछि'—इच्छायाम् (वाञ्छति

'आछि'—आयामे

'ह्रीच्छ'—लज्जायाम्

'हुर्च्छा'—कौटिल्ये २१०

* 'मुर्च्छा'—मोह-समुच्छ्राययोः (मुर्च्छति

'स्फुर्च्छा'—विस्तृतौ

'युच्छ'—प्रमादे

'उछि'—उञ्छे (उञ्छति

'उच्छी'—विवासे २१५ (व्युच्छति

'ध्रज' / 'ध्रजि' / 'धृज' / 'धृजि' / 'ध्वज' / 'ध्वजि' } गतौ (ध्वजति

* 'कूज'—अव्यक्तशब्दे (कूजति

* 'अर्ज' / 'षर्ज' } अर्जने (अर्जति

* 'गर्ज'—शब्दे २२५ (गर्जति

* 'तर्ज'—भर्त्सने (तर्जति

'कर्ज'—व्यथने

'खर्ज'—पूजने च (खर्जति

जर्ज / चर्च / झर्झ } परिभाषण-हिंसा-तर्जनेषु (७१६—७१८) चर्चति

* 'अज'—गति-क्षेपणयोः (अजति

'तेज'—पालने २३०

'खज'—मन्थे

* 'खजि'—गति-वैकल्ये (खञ्जति

'एजृ'—कम्पने (एजति

'टुओस्फूर्जा'—वज्रनिर्घोषे (स्फूर्जति

* 'चि'—चये २३५ (चयतिः अकर्म्मकः)
'चीज'—अव्यक्तशब्दे
'लज' / 'लजि' } भर्ज्जने (लजति
'लाज' / 'लाजि' } भर्त्सने च २४०
'जज' / 'जजि' } युद्धे (जजति
'तुज'—हिंसायाम्
'तुजि'—पालने (तुञ्जति
'गज' / 'गजि' / 'गृज' / 'गृजि' / 'मुज' / 'मुजि' } शब्दार्थाः २५०
'गज'—मदने च
* 'वज' / 'व्रज' } गतौ (व्रजति २५२

———

अथ टवर्गीयान्ताः

तत्र उदात्ता अनुदात्तेतः आत्मनेपदिनः ३६
'अट्ट'—अतिक्रम-हिंसनयोः (अट्टते २५३
* 'वेष्ट'—वेष्टने (वेष्टते
* 'चेष्ट'—चेष्टायाम् २५५ (चेष्टते
'गोष्ट' / 'लोष्ट' } संघाते
* 'घट्ट'—चलने (घट्टते
* 'स्फुट'—विकसने (स्फोटते
* 'अठि'—गतौ २६०
'वठि'—एक-चर्य्यायाम्
'मठि' / 'कठि' } शोके
'मुठि'—पालने
'हेठ'—विबाधायाम्
'एठ'—च
* 'हिडि'—गत्यनादरयोः (हिण्डते
'हुडि'—संघाते
* 'कुडि'—दाहे (कुण्डते
'वडि'—विभाजने
'मडि'—च
'भडि'—परिभाषणे (भण्डते
* 'पिडि'—संघाते (पिण्डते
* 'मुडि'—मार्ज्जने (मुण्डते
'तुडि'—तोड़ने (तुण्डते
'हुडि'—वरणे हरणे इत्येके (हुण्डते
* 'चडि'—कोपे (चण्डते
'शडि'—रुजायां संघाते च
'तडि'—ताड़ने (तण्डते
'पडि'—गतौ २८० (पण्डते
'कडि'—मदे (कण्डते
* 'खडि'—मन्थे (खण्डते
'हेडृ' / 'होडृ' } अनादरे च
'वाडृ'—आप्लाव्ये (वाड़ते
'द्राडृ' / 'ध्राडृ' } विशरणे
'शाडृ'—श्लाघायाम् २८८ (शाड़ते

———

अथ टवर्गीयान्ताः

उदात्ता उदात्तेतः

परस्मैपदिनः ७२
'शौटृ'—गर्व्वे २८९ (शौटति
'यौटृ'—बन्धे (यौटति
'म्लेटृ' / 'म्रेडृ' } उन्मादे
'कटे'—वर्षावरणयोः
'चटे'—इत्येके
* 'अट' / 'पट' } गतौ २९५ (अटति
* 'रट'—परिभाषणे (रटति
'लट—बाल्ये
'शट'—रुजा-विशरण,गत्यवसादनेषु
'वट'—वेष्टने ३००
'किट' / 'खिट' } त्रासे (खेटति
'शिट' / 'षिट' } अनादरे:
* 'जट' / 'झट' } संघाते (जटति
* 'भट'—भृतौ (भटति
'तट'—उच्छ्राये (तटति
'खट—काङ्क्षायाम्
* 'नट'—नृत्तौ ३१० (नटति
'पिट'—शब्द-संघातयोः
* 'हट'—दीप्तौ (हटति
'षट'—अवयवे
* 'लुट'—विलोड़ने (लोटति
डान्तोऽयम् इत्येके
* 'चिट'—पर-प्रेष्ये (चेटति
'विट'—शब्दे
'बिट'—आक्रोशे
'हिट'—इत्येके

'इट'
'किट' } गतौ ३२०
'कटी'

'कटिइ' इति केचित्

* 'मड़ि'—भूषायाम् (मण्डति

'कुड़ि'—वैकल्ये (कुण्डति

'मुड़'
'प्रुड़' } मर्द्दने

'चुड़ि'—अल्पीभावे

'मुड़ि'—खण्डने ३२६ (मुण्डति

'पुड़ि' च इत्येके

'रुटि'
'लुटि' } स्तेये

रुठि'
* 'लुठि' } इत्येके

'रुड़ि'
'लुड़ि' } इत्यपरे

'स्फुटिर्'—विशरणे

'स्फु टि'—इत्यपि केचित्

* 'पठ'—व्यक्तायां वाचि (पठति

'वठ'—स्थौल्ये

'मठ'—मद-निवासयोः

'कठ'—कृच्छ्र-जीवने

'रठ'—परिभाषणे

'हठ'—प्लुति-शठत्वयोः (हठति

बलात्कारे—इत्यन्ये

'रुठ'
'लुठ' } उपघाते (रोटति
'उठ'

ऊठ—इत्येके (ऊठति

'पिठ'—हिंसा-संक्लेशनयोः

* 'शठ'—कैतवे च ३४०(शठति

'शुठ'—प्रतिघाते (शोठति

'शुठि'—इति स्वामी (शुण्ठति

'कुठि'—च (कुण्ठति

* 'लुठि'—आलस्ये प्रतिघाते च (लुण्ठति

'शुठि—शोषणे (शुण्ठति

'रुठि'
'लुठि' } गतौ

'चुड्ड'—भावकरणे (चुड्डति

'अड्ड'—अभियोगे (अड्डति

'कड्ड'—कार्कश्ये (कड्डति

(चुड्डादयस्त्रयः दोपधाः)

* 'क्रीड़ृ'—विहारे ३५० (क्रीड़ति

'तुड़ृ'—तोड़ने (तोड़ति

'तूड़ृ'—इत्येके

'हुड़ृ'
'हूड़ृ' } गतौ
होड़ृ

'रौड़ृ—अनादरे

'रोड़ृ'
'लोड़ृ' } उन्मादे

'अड'—उद्यमे (अडति

'लड'—विलासे (लडति

('लल' इत्येके डलयोरभेदात्

'कड़'—मदे ३६० (कड़ति

'कड़ि'—इत्येके (कण्डति

'गड़ि'—वदनैकदेशे ३६१ (गण्डति

अथ पवर्गीयान्ताः ।

उदात्ता अनुदात्तेत ७५

आत्मनेपदिनः ३२ तिपिस्त्वनुदात्तः

'तिपृ'
'तेपृ'
'ष्टिपृ' } क्षरणार्थाः ३६५ (तेपते
'ष्टेपृ'

'तेपृ'—कम्पने च

'ग्लेपृ'—दैन्ये (ग्लेपते

'टुवेपृ'—कम्पने (वेपते

'केपृ'
'गेपृ' } च
'ग्लेपृ'

'मेपृ'
'रेपृ' } गतौ
'लेपृ'

* 'त्रपूष्'—लज्जायाम् (त्रपते

'कपि'—चलने ३०५ (कम्पते

'रबि'
'लबि' } शब्दे
'अबि'

'लबि'—अवस्रंसने च

'कबृ'—वर्णे

'क्लीबृ'—अधार्ष्ट्ये (क्लीबते

'चीबृ'—मदे (चीबते

'शीभृ'—कत्थने (शीभते

'चीभृ' च

'रेभृ'—शब्दे ३८५

'अभि'
'रभि' } इति केचित् (अम्भते

'ष्टभि'
'स्कभि' } प्रतिबन्धे (स्तम्भते ष्टम्भते

'जभी'
'जृभि' } गात्रविनामे (जृम्भते

'शल्भ'—कत्थने ३९०

'वल्भ'—भोजने

'गल्भ'—धार्ष्ट्ये (गल्भते

'श्रम्भु'—प्रमादे (श्रम्भते

'ष्टुभु'—स्तम्भे (स्तोभते

अथ पवर्गीयान्ता

उदात्ता उदात्तेत: परस्मैपदिन:

* 'गुपू'—रक्षणे ३९५ (गोपायति
'धूप'—सन्तापे (धूपायति
* 'जप' 'जल्प' } व्यक्तायां वाचि (जपति, जल्पति
'जप'—मानसे च
'चप'—सान्त्वने
'षप'—समवाये ४०० (सपति
* 'रप' 'लप' } व्यक्तायां वाचि (लपति
* 'चुप'—मन्दायां गतौ (चोपति
'तुप' 'तुम्प' 'त्रुप' 'त्रुम्प' 'तुफ' 'तुम्फ' 'त्रुफ' 'त्रुम्फ' } हिंसार्था: (तापति तुम्पति
'पर्प' 'रफ' 'रफि' 'अर्ब्ब' 'पर्ब्ब' 'लर्ब्ब' 'बर्ब्ब' 'मर्ब्ब' 'कर्ब्ब' 'खर्ब्ब' 'गर्ब्ब' 'शर्ब्ब' 'षर्ब्ब' 'चर्ब्ब' } गतौ ४२५ (अर्ब्बति, पर्ब्बति कर्ब्बति, खर्ब्बति गर्ब्बति, चर्ब्बति

'कुबि'—आच्छादने (कुम्बति
'लुबि' 'तुबि' } अर्दने (लुम्बति तुम्बति
* 'चुबि'—वक्त्रसंयोगे (चुम्बति
'षृभु' 'षृम्भु' } हिंसार्थौ
'षिभु' 'षिम्भु' } इत्येके
* 'शुभ' 'शुम्भ' } भाषणे, भासने इत्येके, हिंसायाम् इत्यन्ये (शोभते

—

अथ अनुनासिकान्ता:

अनुदात्तेत उदात्ता

आत्मने पदिन: १०

'घिणि' 'घुणि' 'घृणि' } ग्रहणे घिणते घुणते, घृणते
'घुणि' 'घुर्ण' } भ्रमणे (घोणते घूर्णते
* 'पण'—व्यवहारे स्तुतौ च (पणते
'पन'—च ४४०
* 'भाम'—क्रोधे (भामते
* 'क्षमूष्'—सहने (क्षमते
* 'कमु'—कान्तौ (कामयते

—

अथ अनुनासिकान्ता:

उदात्ता उदात्तेत: परस्मै-पदिन: ३०

'अण' 'रण' 'वण' 'भण' 'मण' 'कण' 'क्वण' 'व्रण' 'भ्रण' 'ध्वण' } शब्दार्था: (रणति, भणति क्वणति,
'धण' इत्यपि
'ओणृ' अपनयने
'शोणृ'—वर्ण-गत्यो:
'श्रोणृ'—संघाते
'श्लोणृ'—च
'पैणृ'—गति-प्रेरण-श्लेषणेषु
'प्रैणृ'—इति केचित्
'ध्रण'—शब्दे
'कनी'—दीप्ति-कान्ति-गतिषु
'ष्टन' 'वन' } शब्दे (स्तनति
'वन' 'षण' } सम्भक्तौ (सनति
'अम'—गत्यादिषु (अमति
'द्रम' 'हम्म' 'मीमृ' } गतौ (द्रमति
'चमु' 'छमु' 'जमु' 'झमु' } अदने (चमति आचामति
'क्रमु'—पादविक्षेपे

अथ अन्तःस्थवर्णान्ताः

उदात्ता अनुदात्तेतः

तत्र आत्मनेपदिनः ३४

* 'अय' 'वय' 'पय' 'मय' 'चय' 'तय' 'णय' } गतौ (अयते

* 'दय' दान-गति-रक्षण-हिंसा-दानेषु (दयते

* 'रय' गतौ (रयते

'ऊयी' तन्तु-सन्ताने

* 'पूयी' विशरणे दुर्गन्धे च (पूयते

'क्नूयी' शब्दे उन्दे च

'क्ष्मायी' विधूनने

'स्फायी' 'ओ प्यायी' } वृद्धौ (स्फायते प्यायते

'ताय्ृ' सन्तान-पालनयोः

* 'शल' चलन-संवरणयोः (शलते

'वल' 'वल्ल' } संवरणे सञ्चरणे च (वलते, वल्लते

'मल' 'मल्ल' } धारणे (मलते, मल्लते

'भल' 'भल्ल' } परिभाषण-हिंसा-दानेषु (भलते, भल्लते

'कल' शब्द-संख्यानयोः (कलते

'कल्ल' अव्यक्ते शब्दे (कल्लते
अशब्दे इति स्वामी

'तेवृ' 'देवृ' } देवने ५००

* 'षेवृ' 'गेवृ' 'ग्लेवृ' 'पेवृ' 'मेवृ' 'म्लेवृ' } सेवने (सेवते,

'शेवृ' 'खेवृ' 'क्लेवृ' } इत्येके

'रेवृ' प्लव-गतौ (रेवते

अथ उदात्ता उदात्तेतः

परस्मैपदिनः जिस्त्वनुदात्तः ९३

'मव्य बन्धने

'सूर्क्ष्य' 'ईर्क्ष्य' * 'ईर्ष्य' } ईर्ष्यार्थाः ईर्ष्यति

'हय'—गतौ (हयति

'शुच्य'—अभिषवे

'चुच्य'—इत्येके

'हर्य'—गति-कान्त्योः

* 'अल'—भूषण-पर्याप्ति-वारणेषु (अलति
अयं स्वरितेत् इत्येके ५१५

* 'ञि फला'—विशरणे (फलति

* 'मील' 'श्मील' 'स्मील' 'क्ष्मील' } निमेषणे (मीलति

'पील'—प्रतिष्टम्भे

'नील'—वर्णे

* 'शील'—समाधौ (शीलति

* 'कील'—बन्धने (कीलति

* 'कूल' आवरणे (कूलति

* 'शूल'—रुजायां संघोषे च (शूलति

* 'तूल'—निष्कर्षे (तूलति

* 'पूल'—सङ्घाते (पूलति

* 'मूल'—प्रतिष्ठायाम् (मूलति

* 'फल'—निष्पत्तौ (फलति

'चुल्ल'—भावकरणे

'फुल्ल'—विकसने (फुल्लति

'चिल्ल'—शैथिल्ये भावकरणे च

'तिल'—गतौ (तेलति

'तिल्ल'—इत्येके (तिल्लति

'वेलृ' 'चेलृ' 'केलृ' 'खेलृ' 'क्ष्वेलृ' 'वेल्लृ' } चलने ५४० (केलति, खेलति वेलति, वेल्लति

'पेलृ' 'फेलृ' 'शेलृ' } गतौ

'षेलृ'—इत्येके

* 'स्खल'—सञ्चलने (स्खलति

'खल'—सञ्चये

* 'गल'—अदने (गलति

'षल'—गतौ

'दल'—विशरणे (दलति

'श्वल' 'श्वल्ल' } आशुगमने ५५०

'खोलृ' 'खोर्ऋ' } गति-प्रतिघाते

'धोर्ऋ'—गति-चातुर्य्ये

'त्सर'—छद्म-गतौ

'क्मर'—हूर्छने

'अम' 'वम' 'मम' 'चर' } गत्यार्थाः (चरति चरति भक्षणेऽपि

* 'ष्ठिवु—निरसने ५६७ (ष्ठीवति

* 'जि'—जये (जयति

* 'जीव'—प्राणधारणे (जीवति

* 'पीव' 'मीव' 'तीव' 'नीव' } स्थौल्ये

* 'चीवु' 'चेवु' } निरसने (चीवति

'उर्व्वी' 'तुर्व्वी' 'थुर्व्वी' 'दुर्व्वी' 'धुर्व्वी' } हिंसार्थाः

* 'गुर्व्वी'—उद्यमने (गूर्व्वति

'मुर्व्वी'—बन्धने

'पूर्व्व' 'पर्व्व' 'मर्व्व' } पूरणे

* 'चर्व्व'—अदने (चर्व्वति

'भर्व्व'—हिंसायाम् ५८०

* 'कर्व्व' 'खर्व्व' 'गर्व्व' } दर्पे (कर्व्वति खर्व्वति गर्व्वति

'अर्व्व' 'शर्व्व' 'षर्व्व' } हिंसायाम् (अर्व्वति शर्व्वति, सर्व्वति

'इवि'—व्याप्तौ (इन्वति

'पिवि' 'मिवि' 'णिवि' } सेचने, (पिन्वति सेवने इत्येके

'हिवि' 'दिवि' 'धिवि' 'जिवि' } प्रीणनार्थाः (हिन्वति दिन्वति, धिनोति ३।१.८०

'रिवि' 'रवि' 'धवि' } गत्यर्थाः (रिण्वति रण्वति धन्वति

'कृवि'—हिंसा-करणयोश्च (कृणोति

'मव'—बन्धने (मवति

* 'अव'—रक्षण-गति-कान्ति-प्रीति-तृप्त्य-वगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छादीप्त्य-वाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु ६०० (अवति

* 'धावु'—गति-शुद्ध्योः (धावति (धावते

अयम् उदात्तः स्वरितेद् उभयतो भाषः ६०१

———

अथ उष्मवर्णान्ताः

तत्र उदात्ता अनुदात्तेत

आत्मनेपदिनः ५१

* 'धुक्ष' 'धिक्ष' } सन्दीपन-क्लेशन-जीवनेषु (धुक्षते, (धिक्षते

'वृक्ष'—वरणे (वृक्षते

* 'शिक्ष'—विद्योपादाने (शिक्षते

* 'भिक्ष'—भिक्षायाम् अलाभे लाभे च (भिक्षते

'क्लिश'—अव्यक्तायां वाचि, बाधने इति दुर्गः (क्लेशते

* 'दक्ष —वृद्धौ शीघ्रार्थे च (दक्षते

* 'दीक्ष'—मौण्ड्येज्यो-पनयन-नियम-व्रतादेशेषु (दीक्षते

* 'ईक्ष'—दर्शने ६१० (ईक्षते

* 'ईष'—गति-हिंसा-दर्शनेषु (ईषते

* 'भाष' व्यक्तायां वाचि (भाषते

'वर्ष'—स्नेहने

'गेषृ'—अन्विच्छायाम्

'ग्लेषृ'—इत्येके

'येषृ'—प्रयत्ने ६१५

'जेषृ' 'णेषृ' 'एषृ' 'प्रेषृ' } गतौ

'रेषृ' 'हेषृ' 'ह्रेषृ' } अव्यक्ते शब्दे (रेषते, हेषते, ह्रेषते

'कासृ' शब्द-कुत्सायाम् (कासते

* 'भासृ'—दीप्तौ (भासते

'णासृ' 'रासृ' } शब्दे (नासते, रासते

'णस'—कौटिल्ये

'भ्यस'—भये

* 'आङः शसि'—इच्छायाम् (आशंसते

* 'ग्रसु' 'ग्लसु' } अदने (ग्रसते

* 'ईह'—चेष्टायाम् (ईहते

'वहि' 'महि' } वृद्धौ (वंहते मंहते

'अहि'—गतौ ६२६ (अंहते

* 'गर्ह'
'गल्ह' } कुत्सायाम् (गर्हते

'बर्ह'
'वल्ह' } प्राधान्ये

'वर्ह'
'वल्ह' } परिभाषण-हिंसा-च्छादनेषु

'प्लिह'—गतौ

'वेह्'
'जेह्'
'वाह्' } प्रयत्ने,

'जेह्'—गतावपि

'द्राह्'—निद्रा-क्षये निक्षेपे इति केचित्

* 'काश्'—दीप्तौ (काशते

* 'ऊह'—वितर्के (ऊहते

* 'गाह्'—ग्रहणे ६५० (गर्हते

'ग्लह'—च (ग्लहते

'घुषि'—कान्ति-करणे

'घष'—इति केचित्

———

उदात्ता उदात्तेत:

परस्मैपदिन: ८८

घसिस्त्वनुदात्त:

'घुषिर्'—अविशब्दने शब्दे इत्यन्ये (घोषति

'अक्ष'—व्याप्तौ (अक्षति

'तक्ष्'
'त्वक्ष' } तनूकरणे (तक्षति

* 'उक्ष'—सेचने (उक्षति

* 'रक्ष'—पालने (रक्षति

'णिक्ष'—चुम्बने (प्रणिक्षति

'तृक्ष'
'स्तृक्ष'
'णक्ष' } गतौ

'वक्ष'—रोषे संघाते इत्येके

'मृक्ष'—संघाते

'मक्ष'—इत्येके

* 'तक्ष'—त्वचने ६६५ (तक्षति

'सूर्क्ष'—आदरे

'काक्षि'
'वाक्षि'
'माक्षि' } काङ्क्षायाम् (काङ्क्षति

'द्राक्षि'
'ध्राक्षि'
'ध्वाक्षि' } घोर-वासिते च

* 'चूष'—पाने (चूषति

'तूष'—तुष्टौ (तूषति

'पूष'—वृद्धौ ६७५ (पूषति

'मूष'—स्तेये (मूषति

'लूष'
'रूष' } भूषायाम् (रूषति

'शूष'—प्रसवे

'यूष'—हिंसायाम्

'जूष'—च

* 'भूष'—अलङ्कारे (भूषति

'ऊष'—रुजायाम्

'ईष'—उञ्छे (ईषति

'कष'
'खष'
'शिष'
'जष'
'झष'
'शष'
'वष'
'मष'
'रुष'
'रिष' } हिंसार्था: (कषति खषति, जषति, रेषति

'भष'—भर्त्सने (भषति

* 'उष'—दाहे (ओषति

'जिषु'
'विषु'
'मिषु' } सेचने

* 'पुष'—पुष्टौ ७०० (पोषति

'श्रिषु'
'श्लिषु'
'प्रुषु'
'प्लुषु' } दाहे (श्रेषति प्लोषति

* 'पृषु'
'वृषु'
'मृषु' } सेचने (पर्षति वर्षति, मर्षति

* 'मृषु—सहने च, इतरौ हिंसा-संक्लेशनयोश्च

* 'घृषु'—संघर्षे (घर्षति

'हृषु'—अलीके

* 'तुस'
'ह्रस'
'ह्लस'
* 'रस' } शब्दे (तोषति रसति

* 'लस'—श्लेषण-क्रीडनयो: ६३ (लसति

* 'घस्लृ'—अदने ७१५ (घसति

* 'जर्ज'
'चर्च'
'झर्झ' } परिभाषण-हिंसा-तर्जनेषु (जर्जति २२८-२२९

'पिस्'
'पेस्' } गतौ

* 'हसे'—हसने (हसति

* 'णिश'—समाधौ (नेशति

'मिश'
'मश' } शब्दे रोषकृते च

'शव'—गतौ ७२५

* 'शश'—प्लुतगतौ (शशति

'शसु'—हिंसायाम्

* 'शंसु'—स्तुतौ, दुर्गतौ इत्येके (शंसति
'चह'—परिकल्कने
'मह'—पूजायाम् (महति
'रह'—त्यागे (रहति
'रहि'—गतौ (रंहति
* 'दृह' 'दृहि' 'बृह' 'बृहि' } वृद्धौ (दर्हति, दृंहति बर्हति बृंहति
'बृहि'—शब्दे च बृहिर् इत्येके
'तुहिर्' 'दुहिर्' 'उहिर्' } अर्दने
* 'अर्ह'—पूजायाम् ७४० (अर्हति

———

अथ द्युतादयः उदात्ताः २२ अनुदात्तेतः

आत्मनेपदिनः १।३।९१, २२ ; ३।१।५५ ; ७।२।५९

* 'द्युत'—दीप्तौ (द्योतते
* 'श्विता'—वर्णे (श्वेतते
* 'ञि मिदा'—स्नेहने (मेदते
* 'ञि ष्विदा'—स्नेहन-मोचनयं स्नेहन-मोहनयोः इति केचित् (स्वेदते
'ञि क्ष्विदा'—च इत्येके
* 'रुच'—दीप्तौ अभिप्रीतौ च (रोचते
'घुट'—परिवर्त्तने (घोटते
* 'रुट' 'लुट' 'लुठ' } प्रतिघाते (रोटते
* 'शुभ'—दीप्तौ ७५० (शोभते
'क्षुभ'—सञ्चलने (क्षोभते
'णभ' 'तुभ' } हिंसायाम्
* 'स्रंसु' 'ध्वंसु' 'भ्रंसु' } अवस्रंसने (स्रंसते ध्वंसते भ्रंसते
'ध्वंसु'—गतौ च
'भ्रंशु'—इत्यपि केचित् (भ्रंशते
* 'भ्रशु' 'भ्रंशु' } अधः पतने इति दिवादौ
'स्रम्भु'—विश्वासे, श्रम्भु इत्येके (विस्रम्भते, विश्रम्भते
* 'वृतु'—वर्त्तने (वर्तते
* 'वृधु'—वृद्धौ (वर्द्धते
'शृधु'—कुत्सायाम् ७७०
* 'स्यन्दू'—प्रस्रवणे (स्यन्दते
* 'कृपू'—सामर्थ्ये (कल्पते

——

अथ घटादयः मितः। तत्र उदात्ता अनुदात्तेतः

आत्मनेपदिनः मितः १३

* 'घट'—चेष्टायाम् (घटते
'व्यथ'—भय-सञ्चलनयोः (व्यथते
* 'प्रथ'—प्रख्याने ७६५ (प्रथते
* 'प्रस'—विस्तारे (प्रसते
'म्रद'—मर्दने (म्रदते
'स्खद'—स्खदने
'क्षजि'—गति-दानयोः (क्षञ्जते
* 'दक्ष'—गति-हिंसनयोः (दक्षते
* 'क्रप'—कृपायां गतौ
* 'कदि' 'क्रदि' 'क्लदि' } वैक्लव्ये (क्रन्दति
'वैकल्ये'—इत्येके
[त्रयोऽपि अनिदित इति नन्दी। इदित इति स्वामी। 'कदि क्रदी' इदितौ, 'क्रद' 'क्लद' इति च अनिदितौ इति मैत्रेयः]
* 'ञि त्वरा'—सम्भ्रमे ७७५ (त्वरते

——

अथ उदात्ता उदात्तेतः

परस्मैपदिनः ४८

'ज्वर'—रोगे (ज्वरति
'गड'—सेचने (गडति
'हेड'—वेष्टने (हेडति
'वट' 'भट' } परिभाषणे
* 'णट'—नृत्तौ, गतौ इत्यन्ये (नटति
'ष्टक'—प्रतिघाते (स्तकति
'चक'—तृप्तौ (चकति
'कखे'—हसने (कखति
'रगे'—शङ्कायाम् ७८५ (रगति
* 'लगे'—सङ्गे (लगति
'ह्रगे' 'ह्लगे' 'षगे' 'ष्टगे' } संवरणे
'कगे'—अनेकार्थः
'अक' 'अग' } कुटिलायां गतौ (अकति, अगति
'कण' 'रण' } गतौ ७९५
'चण' 'शण' 'श्रण' } दाने च (चणति, श्रणति
'शण'—गतौ इत्यन्ये

'श्रथ'
'श्नथ'
* 'क्रथ'
'क्लथ' } हिंसार्थाः (श्रथति क्रथति

'वन'—च

'वनु'—च क्रियासामान्ये

* 'ज्वल'—दीप्तौ (ज्वलति

'ह्वल'
'ह्मल' } चलने (ह्वलति

* 'स्मृ'—आध्याने (स्मरति

'दृ'—भये (दरति

'नॄ'—नये (नृणाति

'श्रा'—पाके ८१० (श्राति

'ज्ञा'—मारण-तोषण-निशा-मनेषु (जानाति

* 'चलि'—कम्पने (चलति

'छदिर'—ऊर्जने

'लडि'—जिह्वोन्मथने

* 'मदी—हर्ष-ग्लेपनयोः ८५१ (मादयति

'ध्वन'—शब्दे (ध्वनति

'दलि'—विशरणे (दलति, दलयति

'स्खलि'—सञ्चलने (स्खलति

'स्रणि'—गतौ

'ध्वनि'—शब्दे(ध्वनति ध्वनयति

'त्रपि'—लज्जायाम् ८२० (त्रपते

'चपि'—चये (चपयति

'स्वन'—अवतंसने (स्वनति

| अत्र गण-सूत्राणि अष्ट

(घटादयो मितः) (क)

जनी-जॄष्-क्नसु

रञ्जो-मन्ताश्च (ख)

ज्वल-ह्वल-ह्मल-नमाम्

अनुपसर्गाद्वा (ग)

ग्ला-स्ना-वनु-वमाश्च (घ)

न कम्यमिचमाम् (ङ)

शमो दर्शने (च)

यमो परिवेषणे (छ)

खदिर् अव-परिभ्याञ्च | (ज)

'फण'—गतौ ६।४।१२५ (फणति

इति घटादयः

---

* 'राजृ'—दीप्तौ १ (राजति राजते

उदात्तः स्वरितेद् उभयतो भावः

'टुभ्राजृ'
'टुभ्राशृ'
'टुभ्लाशृ' } दीप्तौ (भ्राजते अनुदात्तेतः ४

अथ स्यमादयः

उदात्ता उदात्तेतः

परस्मैपदिनः २६

'स्यमु'
'स्वन'
'ध्वन' } शब्दे ८३० (स्वनति, ध्वनति

'षम'
'ष्टम' } अवैकल्ये (समति

अथ ज्वलादयः ३०

* 'ज्वल'—दीप्तौ (ज्वलति

* 'चल'—कम्पने (चलति

'जल'—घातने ८३५ (जलति

'टल'
'ट्वल' } वैक्लव्ये (टलति

* 'स्थल'—स्थाने (स्थलति

'ष्ठल द्रव्ये के

* 'हल'—विलेखने (हलति

'णल'—गन्धे, बन्धने द्रव्ये के (नलति

'पल'—गतौ (पलति

'बल'—प्राणने (बलति धान्यावरोधने च

'पुल'—महत्त्वे (पोलति

'कुल'—संस्थाने (कोलति

* 'शल'
'हुल'
'पत्लृ' } गतौ (शलति, पतति

'क्वथे'—निष्पाके (क्वथति

'पथ'—गतौ

* 'मथे'—विलोडने ८५० (मथति

* 'टुवम'—उद्गिरणे (वमति

* 'भ्रमु'—चलने (भ्रमति

* 'चर'—सञ्चलने (चरति

---

* 'षह' मर्षणे १ (सहते

उदात्तः अनुदात्तेत् आत्मनेभावः

* 'रमु'—क्रीडायाम् (रमते

अनुदात्तः अनुदात्तेत् आत्मनेभावः

अथ षद्लादयः

अनुदात्ता उदात्तेतः

परस्मैपदिनः ३

* 'षद्लृ'—विशरण-गत्यवसाद-नेषु १ (सीदति

* 'शद्लृ'—शातने २ (शीयते, १।३।६०

* 'क्रुश'—आह्वाने रोदने च (क्रोशति

अथ कुचादय

उदात्ता उदात्तेतः

परस्मैपदिन ४। रुहि स्त्वनुदात्तः

* 'कुच'—सम्पर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेषु १ (कोचति

* 'बुध'—अवगमने ८६० (बोधति

* 'रुह'—बीज-जन्मनि प्रादुर्भावे च (रोहति

* 'कस'—गतौ (कसति

इति ज्वलादिर्गणः ।

———

अथ उभयपदिनः ४३

अथ व्यञ्जनान्ताः हिक्कादय उदात्ताः स्वरितेतः १६

* 'हिक्क'—अव्यक्ते शब्दे (हिक्कति हिक्कते

* 'अञ्चु'—गतौ याचने च (अञ्चति अञ्चते

'अचु'—इत्येके (अचति

'अचि'—इत्यपरे

* 'टु याट्ट'—याच्ञायाम् ८६५ (याचति याचते

'रेटृ'—परिभाषणे (रेटति, रेटते

* 'चते' }
'चदे' } याचने (चतति चतते

'प्रोथृ'—पर्य्याप्तौ (प्रोथति, प्रोथते

'मिदृ' }
'मेदृ' } मेधा-हिंसनयोः

इमौ थान्तौ इति स्वामी धान्तौ इति न्यासः

* 'मेधृ'—सङ्गमे च (मेधति मेधते

'णिदृ' }
'णेदृ' } कुत्सा-सन्निकर्षयोः

'शृधु' }
'मृधु' } उन्दने (शर्धति, ०ते, मर्धति ०ते

* बुधिर्—बोधने (बोधति बोधते

'उबुन्दिर्'—निशामने

'वेणृ'—गति-ज्ञान-चिन्ता-निशामन-वादित्र-ग्रहणेषु (वेणति, वेणते

नान्तोऽप्ययम्

* 'खनु'—अवदारणे ८८०

(खनति खनते

'चीवृ'—आदान-संवरणयोः

'चायृ'—पूजा-निशामनयोः

* 'व्यय'—गतौ (व्ययति व्ययते

* 'दाशृ'—दाने (दाशति ०ते

'भेषृ'—भये, गतौ इत्येके

'भ्रेषृ' }
'भ्लेषृ' } गतौ

रलयोरभेदात् एकएवायम्

* 'अस'—गति-दीप्त्यादानेषु (असति असते

'अष'—इत्येके

'स्पश'—बाधन-स्पर्शनयोः (स्पशति स्पशते

* 'लष'—कान्तौ ८९० (लषति लषते

'चष'—भक्षणे

'छष'—हिंसायाम्

'झष'—आदान-संवरणयोः (झषति झषते

'भ्रक्ष' }
'भ्लक्ष' } अदने

* 'दासृ'—दाने

'भक्ष'—इति मैत्रेयः

'माहृ'—माने

* 'गुहू'—संवरणे (गूहति ०ते

———

अथ स्वरान्ताः

उभयपदिनः ५

* 'श्रिञ्'—सेवायाम् (श्रयति ०ते

उदात्त उभयतोभावः

अथ भृञादयश्चत्वारः अनुदात्ताः

* 'भृञ्'—भरणे ९०० (भरति भरते

* 'हृञ्'—हरणे (हरति हरते

* 'धृञ्'—धारणे (धरति धरते

* 'णीञ्—प्रापणे (नयति नयते

———

अथ स्वरान्ताः अनुदात्ताः

परस्मैपदिनः ४६

* 'धेट्'—पाने (धयति

* 'ग्लै' }
'म्लै' } हर्षक्षये (ग्लायति म्लायति

'द्यै'—न्यक्करणे (द्यायति

'द्रै'—स्वप्ने (द्रायति

'ध्रै'—तृप्तौ ध्रायति

'ध्यै'—चिन्तायाम् ९१० (ध्यायति

* 'रै'—शब्दे (रायति

* 'स्त्यै' }
'ष्ट्यै' } शब्द-संघातयोः (स्त्यायति

'खै'—खदने

'क्षै' }
'जै' }
'षै' } क्षये (क्षायति

* 'कै' }
'गै' } शब्दे (कायति गायति

'शै' }
'श्रै' } पाके (शायति श्रायति

* 'पै' }
'ओवै' } शोषणे (पायति

'ष्टै'—वेष्टने (स्तायति

'ष्णै'—वेष्टने शोभायाञ्च इत्येके ९२५ (स्नायति

'दैप्'—शोधने (दायति
* 'पा'—पाने (पिबति
* 'घ्रा'—गन्धोपादाने (जिघ्रति
* 'ध्मा'—शब्दा-ऽग्निसंयोगयोः (धमति
* 'ष्ठा'—गति-निवृत्तौ (तिष्ठति
* 'म्ना'—अभ्यासे (मनति
* 'दाण्'—दाने (यच्छति
'ह्वृ'—कौटिल्ये (ह्वरति
'स्वृ'—शब्दोपतापयोः (स्वरति
'स्मृ'—चिन्तायाम् ९३५ (स्मरति
'ह्वृ'—संवरणे
* 'सृ'—गतौ (सरति
* 'ऋ'—गति-प्रापणयोः (ऋच्छति
'गृ' } सेचने (गरति
'घृ'
'ध्वृ'—हूर्च्छने (ध्वरति
'स्रु'—गतौ (स्रवति
* 'षु'—प्रसवैश्वर्य्ययोः (सवति
* 'श्रु'—श्रवण (शृणोति
* 'ध्रु'—स्थैर्य्ये (ध्रवति
'दु' } गतौ (दवति, द्रवति
'द्रु'
* 'जि' } अभिभवे (जयति
'ज्रि' } १००८

अथ स्वरान्ताः अनुदात्ताः

ङित आत्मने पदिनः २१
* 'ष्मिङ्'—ईषद्धसने ९५० (स्मयते
* 'गुङ्'—अव्यक्ते शब्दे (गवते
'गाङ्'—गतौ (गाते

'कुङ्' } शब्दे (कवते घवते अवते
'घुङ्'
'उङ्'
'ङुङ्'
'उङ्' } इत्यनेग
'कुङ्'
* 'खुङ्'
'गुङ्'
'घुङ्'
'ङुङ्'
'च्युङ्' } गतौ ९६०
'ज्युङ्'
'प्रुङ्'
'प्लुङ्'
'क्लुङ्'—इतोरके
'रुङ्'—गति-रेषणयोः
'धृङ्'—अवबन्धने (धरते
* 'मेङ्'—प्रणिदाने (मयते
'देङ्'—रक्षणे (दयते
'श्यैङ्'—गतौ ९६५ (श्यायते
* 'प्यैङ्'—वृद्धौ (प्यायते
* 'त्रैङ्'—पालने (त्रायते

अथ उदात्ताः

पूङ्'—पवने (पवते
'मूङ्'—बन्धने (मवते
* 'डीङ्'—विहायसा गतौ (डयते
* 'तॄ'—प्लवन तरणयोः (तरति
उदात्तः परस्मैभाषः

अथ हलन्ता अनुदात्तेत उदात्ताः

आत्मनेपदिनः ८
* 'गुप'—गोपने (जुगुप्सते
* 'तिज'—निशाने (तितिक्षते
* 'मान'—पूजायाम् (मीमांसते
'बध'—बन्धने ९७४ (बीभत्सते

* 'रभ'—राभस्ये (आरभते
* 'डु लभष्'—प्राप्तौ (लभते
* 'ष्वञ्ज'—परिष्वङ्गे (स्वजते
* 'हद'—पुरीषोत्सर्गे (हदते

अथ उदात्तेतः

परस्मैपदिनः १६
'ञि ष्विदा—अव्यक्ते शब्दे ९८०
अयम् उदात्तः
* 'स्कन्दिर्'—गति-शोषणयोः (स्कन्दति
* 'यभ'—मैथुने (यभति
'णम'—प्रह्वत्वे शब्दे च (नमति
* 'गम्लृ' } गतौ (गच्छति, सर्पति
'सृप्लृ'
* 'यम'—उपरमे (यच्छति
* 'तप'—सन्तापे (तपति
* 'त्यज'—हानौ (त्यजति
* 'षञ्ज'—सङ्गे (सजति
* 'दृशिर्'—प्रेक्षणे ९९० (पश्यति
* 'दंश'—दशने (दशति
* 'कृष'—विलेखने (कर्षति
* 'दह'—भस्मीकरणे (दहति
* 'मिह'—सेचने (मेहति
इति स्कन्दादयः अनुदात्ताः
* 'कित'—निवासे रोगापनयने च (केतयति चिकित्सति

अथ स्वरितेत

उभयपदिनः ११
'दान'—खण्डने (दीदांसति ०ते
'शान'—तेजने (शीशांसति ०ते
एतौ उदात्तौ
* 'डु पचष्'—पाके (पचति पचते
* 'षच'—समवाये (सचति ०ते

'भज'—सेवायाम् १००० (भजति भजते

* 'रञ्ज'—रागे (रजति रजते

* 'शप'—आक्रोशे (शपति शपते

'त्विष'—दीप्तौ (त्वेषति त्वेषते

* 'यज'—देवपूजा-सङ्गति-करण-दानेषु (यजति यजते

* 'डु वप'—बीजसन्ताने (वपति वपते । छेदनेऽपि

* 'वह'—प्रापणे (वहति वहते

इति पचादयः अनुदात्ताः पचिस्तु उदात्तः ।

---

* 'वस'—निवासे (वसति अयम् अनुदात्त उदात्तेत् परस्मैभाषः । १

अथ अनुदात्ताः

उभयपदिनः ३

* 'वेञ्'—तन्तु-सन्ताने (वयति वयते

* 'व्येञ्'—संवरणे (व्ययति ०ते

* 'ह्वेञ्'—स्पर्द्धायां शब्दे च १०१० (ह्वयति ह्वयते

अथ उदात्तौ

परस्मैपदिनौ २

* 'वद'—व्यक्तायां वाचि १०११ (वदति

* 'टुओश्वि'—गति-वृद्ध्योः१०१२ (श्वयति

इति शव्-विकरणा भ्वादयः

भ्वादिस्त्वाकृतिगणः ।

अथ अदादि-गणीया धातवः २।४।७२

अथ अनुदात्तौ उदात्तेत्तौ

परस्मैपदिनौ

* 'अद'—भक्षणे १०१३ (अत्ति

* 'हन'—हिंसा-गत्योः १०१४ (हन्ति

अथ अनुदात्ताः स्वरितेतः

उभयपदिनः द्विषादयः

* 'द्विष'—अप्रीतौ (द्वेष्टि द्विष्टे

* 'दुह'—प्रपूरणे (दोग्धि दुग्धे,

* 'दिह'—उपचये (देग्धि दिग्धे

* 'लिह'—आस्वादने १०१८ (लेढि लीढे

अथ आत्मनेपदिनः १६

* 'चक्षिङ्'—व्यक्तायां वाचि दर्शनेऽपि (चष्टे अयम् उदात्तः अनुदात्तेद्

अथ उदात्ता अनुदात्तेतः

ईरादयः

* 'ईर'—गतौ कम्पने च (ईर्ते

* 'ईड'—स्तुतौ (ईट्टे

'ईश'—ऐश्वर्ये (ईष्टे

* 'आस'—उपवेशने (आस्ते

* 'आङः शासु'—इच्छायाम् (आशास्ते

* 'वस'—आच्छादने १०२५(वस्ते

* 'कसि'—गति-शासनयोः (कंस्ते कस इत्येके (कस्ते काश इत्यपि (काष्टे

'णिसि'—चुम्बने (निंस्ते

'णिजि'—शुद्धौ (निङ्क्ते

* 'शिजि'—अव्यक्ते शब्दे (शिङ्क्ते

'पिजि'—वर्णे (पिङ्क्ते सम्पर्चने इत्येके अवयवे इत्यन्ये अव्यक्तशब्दे इतीतरे

'पृजि'—इत्यपरे १०३० (पृङ्क्ते

'वृजी'—वर्जने (वृक्ते

'वृजि' इत्यन्ये (वृङ्क्ते

'पृची'—सम्पर्चने (पृक्ते

---

* 'षूङ्'—प्राणिगर्भ-विमोचने (सूते

* 'शीङ्'—स्वप्ने (शेते इमौ उदात्तौ

अथ उदात्ता उदात्तेतः

परस्मैपदिनः ६

* 'यु'—मिश्रणेऽमिश्रणे च १०३५ (यौति

* 'रु'—शब्दे (रौति

* 'णु'—स्तुतौ (नौति

'टुक्षु'—शब्दे (क्षौति

'क्ष्णु'—तेजने (क्ष्णौति

'ष्णु'—प्रस्रवणे १०४० (स्नौति

'ऊर्णुञ्'—आच्छादने
उदात्त उभयतोभाषः

अथ उदात्ताः

तत्र परस्मैपदिनः

'द्यु'—अभिगमने (द्यौति
* 'षु'—प्रसवैश्वर्ययोः (सौति
* 'कु'—शब्दे (कौति

अथ उभय-पदिनौ

* 'ष्टुञ्'—स्तुतौ (स्तौति
* 'ब्रूञ्'—व्यक्तायां वाचि (ब्रवीति

अथ परस्मैपदिनः ३१
(इङ् तु आत्मनेपदी)

तत्र अनुदात्ताः

* 'इण्'—गतौ (एति
* इङ्'—अध्ययने (अधीते
* 'इक्'—स्मरणे (अध्येति
* 'वी'—गति-व्याप्ति प्रजन-कान्त्यसन-खादनेषु १०५० (वेति
* 'या'—प्रापणे (याति
* 'वा'—गति-गन्धनयोः (वाति
* 'भा'—दीप्तौ (भाति
* 'ष्णा'—शौचे (स्नाति
* 'श्रा'—पाके (श्राति
* 'द्रा'—कुत्सायां गतौ (द्राति

'प्सा'—भक्षणे

* 'पा'—रक्षणे (पाति
* 'रा'—दाने (राति
* 'ला'—आदाने १०६० (लाति

द्वावपि दाने इति चन्द्रः

* 'दाप्'—लवने (दाति
* 'ख्या'—प्रकथने (ख्याति
* 'प्रा'—पूरणे (प्राति
* 'मा'—माने (माति
* 'वच'—परिभाषणे (वक्ति

अथ उदात्ता उदात्तेतः

* 'विद'—ज्ञाने (वेत्ति
* 'अस'—भुवि (अस्ति
* 'मृजू'—शुद्धौ (मार्ष्टि
* 'रुदिर्'—अश्रुविमोचने (रोदिति
* 'ञि ष्वप्'—शये (स्वपिति

उदात्तेद् अनुदात्तः

परस्मैपदिनः

* 'श्वस'—प्राणने (श्वसिति
* 'अन'—च (अनिति
* 'जक्ष'—भक्ष-हसनयोः (जक्षिति

इति रुदादयः पञ्च ७।३।९८

* 'जागृ'—निद्राक्षये (जागर्त्ति
* 'दरिद्रा'—दुर्गतौ १०७५ (दरिद्राति
* 'चकास्ट' —दीप्तौ (चकास्ति
* 'शासु'—अनुशिष्टौ (शास्ति

अथ उदात्तौ

आत्मनेपदिनौ

'दीधीङ्'—दीप्ति-देवनयोः
'वेवीङ्'—वेतिना तुल्ये

अथ उदात्ता उदात्तेतः

परस्मैपदिनः

'षस'
'षस्ति' } स्वप्ने

* 'वश'—कान्तौ (वष्टि

चर्करीतञ्च—(यङ्लुक्
(इदं गणसूत्रम्)

* 'ह्नुङ्'—अपनयने १०८३ (ह्नुते, अनुदात्त आत्मनेपदी

इति अदादयः ७१

अथ ह्वादि-गणः २।४।७५

तत्र अनुदात्ताः परस्मैपदिनः

* 'हु'—दानादनयोः (जुहोति
* 'ञिभी'—भये १०८५ (बिभेति
* 'ह्री'—लज्जायाम् (जिह्रेति
* 'पॄ'—पालन-पूरणयोः (पिपर्त्ति

'पृ'—इत्येके
(अयम् उदात्तः)

* 'डुभृञ्'—धारण-पोषणयोः (बिभर्त्ति

अयम् अनुदात्त उभयपदी।

* 'माङ्'—माने शब्दे च (मिमीते
* 'ओहाङ्'—गतौ १०९० (जिहीते

अनुदात्तौ आत्मनेपदिनौ

* 'ओहाक्'—त्यागे (जहाति

अनुदात्तः परस्मैपदी

अथ उभयपदिनः

* 'डुदाञ्'—दाने (ददाति
* 'डुधाञ्'—धारण-पोषणयोः दानेऽपि इत्येके (दधाति

इमौ अनुदात्तौ

* 'णिजिर्'—शौच-पोषणयोः (नेनेक्ति
* 'विजिर्'—पृथग्भावे १०९५ (वेवेक्ति

* 'विषॢ'—व्याप्तौ (वेवेष्टि
णिजिरादयः अनुदात्ताः
स्वरितेतः

अथ छान्दसाः
परस्मैपदिनः ११

* 'घृ'—क्षरण-प्रदीप्त्योः (जिघर्त्ति
'हृ'—प्रसह्य-करणे
'ऋ' } गतौ ११०० (इयर्त्ति
'सृ' }
घृ-प्रभृतय उदात्ताः
'भस'—भर्त्सन-प्रदीप्त्योः
उदात्त उदात्तेत् (बभस्ति
'कित,—ज्ञाने (चिकेत्ति
अनुदात्तः
'तुर'—त्वरणे (तुतोर्त्ति
'धिष'—शब्दे (दिधेष्टि,
'धन'—धान्ये ११०५ (दधन्ति
'जन'—जनने (जजन्ति
तुरादयउदात्ता उदात्तेतः
* 'गा'—स्तुतौ ११०७
अनुदात्तः (जिगाति
इयर्त्ति र्भाषायामपि
इति जुहोत्यादयः २४

अथ दिवादिः ३।१।६९

तत्र उदात्ता उदात्तेतः
परस्मैपदिनः २५
चिपिस्त्वनुदात्तः
* 'दिवु —क्रीड़ा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (दीव्यति
* 'षिवु—तन्तु-सन्ताने (सीव्यति
स्रिवु'—गति-शोषणयोः १११०

* 'ष्ठिवु'—निरसने (ष्ठीव्यति
'ष्णुसु'—अदने (स्नुस्यति
आदाने इत्येके
अदर्शने इत्यपरे
'ष्णसु'—निरसने (स्नस्यति
'क्नसु'—ह्वरण-दीप्त्योः
'व्युष'—दाहे १११५ (व्युष्यति
* 'प्लुष'—च (प्लुष्यति
* 'नृती'—गात्रविक्षेपे (नृत्यति
* 'त्रसी'—उद्वेगे (त्रस्यति
'कुथ'—पूतीभावे
'पुथ'—हिंसायाम् ११२०
'गुध'—परिवेष्टने
* 'क्षिप'—प्रेरणे (क्षिप्यति
* 'पुष्प'—विकसने (पुष्प्यति
'तिम' } आर्द्रीभावे
'ष्टिम' } तिम्यति, स्तिम्यति
'ष्टीम' } स्तीम्यति
* 'व्रीड़'—चोदने लज्जायाञ्च
(व्रीड्यति
* 'इष —गतौ (इष्यति
* 'षह' } चक्यर्थे (सह्यति
'षुह' } (तृप्त्यर्थे)
* 'जॄष्' } वयोहानौ (जीर्य्यति
'झॄष्' }

अथ आत्मनेपदिनः १२
तत्र उदात्तौ
'षूङ्'—प्राणि-प्रसवे (सूयते
* 'दूङ्'—परितापे (दूयते

अथ अनुदात्ताः डीङ्तु
उदात्तः ।
* 'दीङ्'—क्षये ११२५ (दीयते

* 'डीङ्'—विहायसा गतौ
(डीयते
* 'धीङ्'—आधारे (धीयते
* 'मीङ्'—हिंसायाम् (मीयते
'रीङ्'—श्रवणे (रीयते
'लीङ्'—श्लेषणे ११४० (लीयते
'व्रीङ्'—वृणोत्यर्थे (व्रीयते
स्वादय ओदितः ८।२।४५
* 'पीङ्'—पाने (पीयते
* माङ्'—माने (मायते
'ईङ्'—गतौ
* 'प्रीङ्'—प्रीतौ (प्रीयते

अथ अनुदात्ताः
परस्मैपदिनः
* शो'—तनूकरणे (श्यति
* 'छो'—छेदने (छ्यति
* 'षो'—अन्तकर्म्मणि (स्यति
* 'दो'—अवखण्डने (द्यति

अथ उदात्ता अनुदात्तेतः
आत्मनेपदिनः
(तपिस्त्वनुदात्तः)
* जनी'—प्रादुर्भावे ११५५
(जायते
* 'दीपी'—दीप्तौ (दीप्यते
* 'पूरी'—आप्यायने (पूर्य्यते
* तूरी'—गति-त्वरण-हिंसनयोः
(तूर्य्यते
धूरी' } हिंसा-गत्योः
गूरी' } धूर्य्यते, गूर्य्यते
घरी' } हिंसा-वयोहान्योः
'जूरी' }
'शूरी'—हिंसा-स्तम्भनयोः
'चूरी —दाहे

* 'तप'—ऐश्वर्य्ये वा ११६०
(तप्यते
'वृतु'—वरणे (वृत्यते
* 'क्लिश'—उपतापे (क्लिश्यते
* 'काश्ट'—दीप्तौ (काश्यते
* 'वाश्ट'—शब्दे (वाश्यते

अथ उभयपदिनः ५
तत्र द्वौ उदात्तौ स्वरितेतौ
* 'मृष'—तितिक्षायाम् ११६५
(मृष्यति, मृष्यते
* 'ई शुचिर्'—पूतीभावे (शुच्यति
शुच्यते
त्रयः अनुदात्ताः स्वरितेतः
*'णह'—बन्धने (नह्यति, नह्यते
* 'रञ्ज'—रागे (रज्यति, रज्यते
* 'शप'—अक्रोशे (शप्यति,
शप्यते

अथ अनुदात्तेतः आत्मने-पदिनः ११
* 'पद'—गतौ ११७० (पद्यते
* 'खिद'—दैन्ये (खिद्यते
* 'विद'—सत्तायाम् (विद्यते
* 'बुध'—अवगमने (बुध्यते
* 'युध'—सम्प्रहारे (युध्यते
* 'अनो रुध'—कामे ११७५
(अनुरुध्यते
'अण'—प्राणने
'अन'—इत्येके
* 'मन'—ज्ञाने (मन्यते
* 'युज'—समाधौ (युज्यते
* 'सृज'—विसर्गे (सृज्यते
* 'लिश'—अल्पीभावे ११८०
(लिश्यते

अथ परस्मैपदिनः ३८
तत्र अनुदात्ता उदात्तेतः
* 'राधोऽकर्म्मकाद्' वृद्धौ एव
(राध्यति
* 'व्यध'—ताड़ने (विध्यति
* 'पुष'—पुष्टौ पुष्यति
* 'शुष'—शोषणे (शुष्यति
* 'तुष'—प्रीतौ ११८५ (तुष्यति
* 'दुष'—वैकृत्ये (दुष्यति
* 'श्लिष'—आलिङ्गने (श्लिष्यति
* 'शक'—विभाषितो मर्षणे
(शक्यति, शक्यते
* 'ष्विदा'—गात्रप्रक्षरणे (स्विद्यति
* क्रुध'—क्रोधे ११९० (क्रुध्यति
* 'क्षुध'—बुभुक्षायाम् (क्षुध्यति
* 'शुध'—शौचे (शुध्यति
* 'षिधु'—संराद्धौ (सिध्यति

अथ उदात्ता उदात्तेतः
'रध'—हिंसा-संराध्योः
* 'णश'—अदर्शने (नश्यति
* 'तृप'—प्रीणने (तृप्यति
* 'दृप'—हर्षण-मोहनयोः (दृप्यति
* 'द्रुह'—जिघांसायाम् (द्रुह्यति
* 'मुह'—वैचित्ये (मुह्यति
'ष्णुह'—उद्गिरणे १२००
(स्नुह्यति
* 'ष्णिह'—प्रीतौ (स्निह्यति

अथ उदात्तेतः परस्मैपदिनः
* 'शमु'—उपशमे ७।३।७४
(शाम्यति
* 'तमु'—काङ्क्षायाम् (ताम्यति
* 'दमु'—उपशमे (दाम्यति
* 'श्रमु'—तपसि खेदे च (श्राम्यति
* 'भ्रमु'—अनवस्थाने (भ्राम्यति
* 'क्षमू'—सहने (क्षाम्यति
* 'क्लमु'—ग्लानौ (क्लाम्यति
* 'मदी'—हर्षे (माद्यति
* 'असु'—क्षेपणे १२१० (अस्यति
* 'यसु'—प्रयत्ने (यस्यति
'जसु—मोक्षणे (जस्यति
'तसु'—उपक्षये (तस्यति
'दसु'—च (दस्यति
'वसु'—स्तम्भे १२१५ (वस्यति
'व्युष'—विभागे
'प्लुस'—इत्यन्ये
'बुस'—इत्यपरे
* 'प्लुष'—दाहे (प्लुष्यति
'बिस'—प्रेरणे बिस्यति
'कुस'—संश्लेषणे
'बुस'—उत्सर्गे १२२०
'मुस'—खण्डने
'मसी'—परिणामे
'समी'—इत्येके
* 'लुट'—विलोड़ने (लुट्यति
'उच'—समवाये (उच्यति
'भ्रंशु' } अधःपतने (भ्रश्यति
* 'भ्रंसु' }
'वृश'—वरणे (वृश्यति
* 'कृश'—तनूकरणे (कृश्यति
* 'ञितृषा'—पिपासायाम् (तृष्यति
* 'हृष'—तुष्टौ १२३० (हृष्यति
* 'रुष' } हिंसायाम् (रुष्यति,
* 'रिष' } रिष्यति
* 'डिप'—क्षेपे (डिप्यति
* 'कुप'—क्रोधे (कुप्यति
'गुप'—व्याकुलत्वे

'गुपु'
'रुपु' } विमोहने
'लुपु'
* 'लुभ'—गार्ध्ये (लुभ्यति
* 'क्षुभ'—सञ्चलने १२०४
(क्षुभ्यति
'णभ' } हिंसायाम्
'तुभ'
[क्षुभि-नभि-तुभयो द्युतादौ क्र्यादौ च पठ्यन्ते]
* 'क्लिदू'—आर्द्रीभावे (क्लिद्यति
* 'ञिमिदा'—स्नेहने (मेद्यति
७।३।८२
'ञिक्ष्विदा'—स्नेहन-मोचनयोः
* 'ऋधु'—वृद्धौ (ऋध्यति
* 'गृधु'—अभिकाङ्क्षायाम् (गृध्यति
इति दिवादयः १४०
दिवादिराकृतिगणः

अथ स्वादिः ३।१।७३

तत्र उभयपदिनः ९
अनुदात्ताः, 'वृञ्' तु उदात्तः
* 'षुञ्'—अभिषवे (सुनोति, सुनुते
* 'षिञ्'—बन्धने (सिनोति, सिनुते
* 'शिञ्'—निशाने १२५०
* डुमिञ्—प्रक्षेपणे (मिनोति, मिनुते
* 'चिञ्'—चयने (चिनोति, ०ते
* 'स्तृञ्'—आच्छादने (स्तृणोति, स्तृणुते
* 'कृञ्'—हिंसायाम् (कृणोति, कृणुते
* 'वृञ्'—वरणे (वृणोति, वृणुते
* 'धुञ्'—कम्पने (धुनोति, धुनुते
धूञ्—इत्येके

अथ अनुदात्ताः परस्मैपदिनः ९
* 'टुदु'—उपतापे (दुनोति
* 'हि'—गतौ वृद्धौ च (हिनोति
* 'पृ'—प्रीतौ (पृणोति
'स्पृ'—प्रीति-पालनयोः (स्पृणोति
प्रीति-चलनयोरित्यन्ये
'स्मृ'—इत्येके १२६० (स्मृणोति
* 'आप्लृ'—व्याप्तौ (आप्नोति
* 'शक्लृ'—शक्तौ (शक्नोति
* 'राध' } संसिद्धौ (राध्नोति
'साध'

अथ उदात्तौ आत्मनेपदिनौ अनुदात्तेतौ
* 'अशू'—व्याप्तौ संघाते च (अश्नुते
'ष्टिघ'—आस्कन्दने (स्तिघ्नुते

अथ उदात्ता उदात्तेतः परस्मैपदिनः १५
'तिक' } गतौ च (तिक्नोति
'तिग' तिग्नोति
'षघ'—हिंसायाम् (सघ्नोति
* ञिधृषा'—प्रागल्भ्ये १२७० (धृष्णोति
* 'दम्भु'—दम्भने (दभ्नोति
* 'ऋधु'—वृद्धौ (ऋध्नोति

तत्र छन्दसि ९
'तृप'—प्रीणने इत्येके (तृप्नोति
'अह'—व्याप्तौ (अह्नोति
'दघ'—घातने पालने च (दघ्नोति
'चमु'—भक्षणे (चम्नोति
* 'रि'
'क्षि'
'चिरि'
'जिरि'
'दाश'
'दृ' } हिंसायाम् १२८१ (रिणोति, क्षिणोति चिरिणोति जिरिणोति
चिर्भाषायाम् इत्येके ऋचौ इत्येक एव अजादिः इत्येके। रेफवान् इत्यन्ये। वृत्।
इति स्वादयः ३४

अथ तुदादिः ३।१।७७

तत्र अनुदात्ताः स्वरितेतः उभयपदिनः ६
* 'तुद'—व्यथने (तुदति, तुदते
* 'णुद'—प्रेरणे (नुदति, नुदते
* 'दिश'—अतिसर्जने (दिशति, दिशते
* 'भ्रस्ज'—पाके १२८५ (भृज्जति, भृज्जते
* 'क्षिप'—प्रेरणे (क्षिपति, क्षिपते
* 'कृष'—विलेखने (कृषति, कृषते

'ऋषी'—गतौ (ऋषति

उदात्त उदात्तेत्

परस्मैपदी

अथ उदात्ता अनुदात्तेत:

आत्मनेपदिन:

'जुषी'—प्रीति-सेवनयो: (जुषते

* 'ओ विजी'—भयचलनयो: (उद्विजते

* 'ओलजी' 'ओलस्जी' } व्रीड़ने (लजते, लज्जते

अथ परस्मैपदिन:

उदात्ता: १०५

* 'ओ व्रश्चू'—छेदने (वृश्चति
* 'व्यच'—व्याजीकरणे (विचति
* 'उछि'—उञ्छे १२९५ (उञ्छति

'उछी'—विवासे (उच्छति

* 'ऋच्छ'—गतीन्द्रिय-प्रलय-मूर्त्ति-भावेषु (ऋच्छति

'मिच्छ'—उत्क्लेशे

'जर्ज' 'चर्च' 'झर्झ' } परिभाषण भर्त्सनयो:

* 'त्वच'—संवरणे (त्वचति
* 'ऋच'—स्तुतौ (ऋचति
* 'उब्ज'—आर्जवे (उब्जति
* 'उज्झ'—उत्सर्गे १३०५ (उज्झति
* 'लुभ'—विमोहने (लुभति

'रिफ'—कत्थन-युद्ध-निन्दा-हिंसादानेषु (रिफति

'रिह'—इत्येके

'तृप' 'तृम्फ' } तृप्तौ (तृपति तृम्फति

द्वावपि फान्तौ इत्येके

'तुप' 'तुम्प' 'तुफ' 'तुम्फ' } हिंसायाम् (तुपति तुम्पति तुफति तुम्फति

'दृप' 'दृम्फ' } उत्क्लेशे (दृपति

प्रथमोऽपि द्वितीयान्त इत्येके

'ऋफ' 'ऋम्फ' } हिंसायाम् (ऋफति ऋम्फति

'गुफ' 'गुम्फ' } ग्रन्थे (गुफति गुम्फति

'उभ' 'उम्भ' } पूरणे (उभति उम्भति

'शुभ' 'शुम्भ' } शोभार्थे (शुभति शुम्भति

* 'दृभी'—ग्रन्थे (दृभति

'चृती'—हिंसा-ग्रन्थनयो: १३२५

'विध'—विधाने (विधति

'जुड़'—गतौ (जुड़ति

'जुन'—इत्येके (जुनति

'मृड़'—सुखने (मृड़ति

'पृड़'—च (पृड़ति

'पृण'—प्रीणने १३३० (पृणति

'वृण'—च (वृणति

'मृण'—हिंसायाम्

'तुण'—कौटिल्ये

'पुण'—कर्म्मणि शुभे.

'मुण'—प्रतिज्ञाने १३३५

'कुण'—शब्दोपकरणयो:

'शुन'—गतौ

'द्रुण'—हिंसा-गति-कौटिल्येषु

'घुण' 'घूर्ण' } भ्रमणे १३४०

'षुर'—ऐश्वर्य्य-दीप्त्यो: (सुरति

'कुर'—शब्दे (कुरति

'खुर'—छेदने (खुरति

* 'मुर'—संवेष्टने

'क्षुर'—विलेखने १३४५ (क्षुरति

* 'घुर'—भीमार्थ-शब्दयो: (घुरति
* 'पुर'—अग्रगमने

'वृह'—उद्यमने

वृह इत्यन्ये

'तृहू' 'स्तृहू' 'तृंहू' } हिंसायां:

* 'इष'—इच्छायाम् (इच्छति

'मिष'—स्पर्द्धायाम् (मिषति

'किल'—श्वैत्य-क्रीड़नयो: (किलति

* 'तिल'—स्नेहे (तिलति
* 'चिल'—वसने (चिलति

'चल'—विलसने

'इल'—स्वप्न-क्षेपणयो:

'विल'—संवरणे

'बिल'—भेदने १३६०

'णिल'—गहने

'हिल'—भाव-करणे

'शिल' 'षिल' } उञ्छे (शिलति

* 'मिल'—श्लेषणे (मिलति
* 'लिख'—अक्षर-विन्यासे (लिखति
* 'कुट'—कौटिल्ये (कुटति
* 'पुट'—संश्लेषणे (पुटति
* 'कुच'—संकोचने (कुचति
* 'गुज'—शब्दे १३७०

'गुड़'—रक्षायाम्

* 'छिप'—चेपे (छिपति

* 'कुर्'—छेदने (कुरति

* 'स्फुट'—विकसने (स्फुटति

'मुट'—आक्षेप-मर्द्दनयो:

* 'त्रुट'—छेदने (त्रुटति

'तुट'—कलह-कर्म्मणि (तुटति

'चुट' } छेदने
'छुट'

'जुड़'—बन्धने १३८० (जुड़ति

'कड़'—मदे

'लुठ'—संश्लेषणे (लुठति

'क्रड'—घनत्वे

'कुड'—बाल्ये

'पुड'—उत्सर्गे १३८५

'घुट'—प्रतिघाते (घुटति

'तुड़'—तोड़ने

'थुड़' } संवरणे
'स्थुड'

'खुड़' } इत्येके
'कुड'

* 'स्फुर' } सञ्चलने (स्फुरति
'फुल'

'स्फुर'—स्फुरणे (स्फरति

'स्फुल'—सञ्चलने इत्येके

'स्फर'—इत्यन्ये

'स्फुड' } संवरणे
'चुड़'
'व्रुड'

'क्रुड' } निमज्जने इत्येके
'भृड'

'गुरी'—उद्यमने १३९५
(गुरते

उदात्त: अनुदात्तेद आत्मनेपदी

———

अथ परस्मैपदिन: ४

तत्र उदात्तौ

* 'णू'—स्तवने (नुवति

* 'धू'—विधूनने (धुवति

अथ अनुदात्तौ

* 'गु'—पुरीषोत्सर्गे (गुवति

* 'ध्रु'—गति-स्थैर्य्ययो: (ध्रुवति

'ध्रुव'—इत्येके (ध्रुवति

* 'कुङ्'—शब्दे १४०० (कुवते

उदात्त आत्मनेपदी। दीर्घान्त-इति कैय्यटादय:। ह्रस्वान्त इति न्यास:। इत्।

———

अथ अनुदात्तौ
आत्मनेपदिनौ

* 'पृङ्'—व्यायामे (व्याप्रियते

* 'मृङ्'—प्राण-त्यागे (म्रियते

———

अथ परस्मैपदिन: ७

तत्र अनुदात्ता:

'रि' } गतौ (रियति
'पि' } पियति

'धि'—धारणे

'चि'—निवास-गत्यो: (चियति

———

अथ उदात्ता:

* 'षु'—पूरणे (सुवति

* 'कॄ'—विक्षेपे (किरति

* 'गॄ'—निगरणे (गिरति

———

अथ अनुदात्तौ आत्मनेपदिनौ

* 'दृङ्'—आदरे १४१० (द्रियते

* 'धृङ्'—अवस्थाने (ध्रियते

अथ परस्मैपदिन: १६

अनुदात्ता उदात्तेत:।

विच्छिस्तु उदात्त:

* 'प्रच्छ'—ज्ञीप्सायाम्
इत्। (पृच्छति

* 'सृज'—विसर्गे (सृजति

* 'टुमस्जो'—शुद्धौ (मज्जति

* 'रुजो'—भङ्गे (रुजति

* 'भुजो'—कौटिल्ये (भुजति

* 'छुप'—स्पर्शे (छुपति

* 'रुश' } हिंसायाम् (रुशति
'रिश' } रिशति

* 'लिश'—गतौ १४२० (लिशति

* 'स्पृश'—संस्पर्शने (स्पृशति

'विच्छ'—गतौ (विच्छति

* 'विश'—प्रवेशने (विशति

* 'मृश'—आमर्शने (मृशति

* 'णुद'—प्रेरणे १४२५ (नुदति

* 'षद्लृ'—विशरण-गत्यव-सादनेषु (सीदति

अप् अनुदात्त:, शत्लूदात्त:

* 'शद्लृ'—शातने। शीयते

———

अथ उभय-पदिन: ६

* 'मिल'—सङ्गमे (मिलति, मिलते

उदात्त: स्वरितेद

अथ अनुदात्ता: स्वरितेत:

विन्दतिस्तु उदात्त:।

* 'मुच्लृ'—मोचणे (मुञ्चति, ०ते

* 'लुप्लृ'—छेदने १४३०
(लुम्पति, ०ते
* 'विद्लृ'—लाभे (विन्दति
विन्दते
* 'लिप'—उपदेहे (लिम्पति
लिम्पते
* 'षिच'—क्षरणे (सिञ्चति,
०ते

———

अथ परस्मैपदिनः ७
उदात्त त:
* 'कृती'—छेदने (कृन्तति
उदात्तः
* 'खिद'—प्रतिघाते १४३५
(खिन्दति
अनुदात्तः
* 'पिश'—अवयवे (पिंशति
उदात्तः
वृत् ।
इति तुदादयः १५५

———

अथ रुधादिः
३।१।७८
तत्र अनुदात्ताः स्वरितेतः
उभयपदिनः ९
* 'रुधिर्'—आवरणे
(रुणद्धि, रुन्धे
* 'भिदिर्'—विदारणे
(भिनत्ति, भिन्ते
* 'छिदिर्'—द्वैधीकरणे
(छिनत्ति छिन्ते
* 'रिचिर्'—विरेचने १४४०
(रिणक्ति, रिङ्क्ते
* 'विचिर्'—पृथग्भावे
(विनक्ति, विङ्क्ते

* 'क्षुदिर्'—संपेषणे
(क्षुणत्ति क्षुन्ते
* 'युजिर्'—योगे (युनक्ति
युङ्क्ते

———

अथ उदात्तौ
'उच्छृदिर्'—दीप्ति-देवनयोः
(छृणत्ति छृन्ते
'उतृदिर्'—हिंसानादरयोः
१४४५

———

'कृती'—वेष्टने (कृणत्ति
उदात्त उदात्तेत् परस्मैपदी
* 'ञिइन्धी'—दीप्तौ (इन्धे,
उदात्तः
अनुदात्तेद आत्मनेपदी

———

अथ अनुदात्तौ अनुदात्तेतौ
आत्मनेपदिनौ ।
* 'खिद'—दैन्ये (खिन्ते
* 'विद'—विचारणे (विन्ते

———

अथ उदात्तेतः
परस्मैपदिनः ११। तत्र अनुदात्ताः
* 'शिष्लृ'—विशेषणे १४५०
(शिनष्टि
* 'पिष्लृ'—सञ्चूर्णने
(पिनष्टि
* 'भञ्जो'—आमर्दने (भनक्ति
* 'भुज'—पालनाभ्यवहा-
रयोः (भुनक्ति

———

अथ उदात्ताः
* 'तृह' } हिंसायाम्
* 'हिसि' } (तृणेढि, हिनस्ति
* 'उन्दी'—क्लेदने (उनत्ति
'अञ्जू'—व्यक्ति-म्रक्षण-
कान्ति गतिषु (अनक्ति
'तञ्चू'—संकोचने (तनक्ति
* 'ओविजी'—भय-चलनयोः
(विनक्ति
* 'वृजी'—वर्जने १४६०
(वृणक्ति
* 'पृची—सम्पर्के १४६१
(पृणक्ति
इति रुधादयः २५

———

अथ तनादि ३।१।७९
तत्र स्वरितेत उदात्ता
उभयपदिनः ७
* 'तनु'—विस्तारे (तनोति,
तनुते
* 'षनु'—दाने (सनोति,
सनुते
* 'क्षणु'—हिंसायाम्
(क्षणोति, क्षणुते
* 'क्षिणु'—च १४६५
(क्षिणोति, क्षेणोति, ०ते
'ऋणु'—गतौ (ऋणोति,
(अर्णोति, ०ते
'तृणु'—अदने (तृणोति,
तर्णोति, ०ते
* 'घृणु'—दीप्तौ (घर्णोति,
घृणोति ०ते

———

अथ उदात्तौ अनुदात्तेतौ
आत्मनेपदिनौ
* 'वनु'—याचने (वनुते
* 'मनु'—अवबोधने १४७०
(मनुते

* 'डुकृञ्'—करणे १४७१
(करोति, कुरुते
अनुदात्त उभयपदी
इति तनादयः १०

अथ क्र्यादिः ३।१।८१

तत्र उभयपदिनः १५
अथ अनुदात्ताः
* 'डुक्रीञ्'—द्रव्य-विनिमये
(क्रीणाति, क्रीणीते
* 'प्रीञ्'—तर्पणे कान्तौ च
(प्रीणाति, प्रीणीते
'श्रीञ्'—पाके
* 'मीञ्'—हिंसायाम्
(मीनाति, मीनीते
* 'षिञ्'—बन्धने (सिनाति,
सिनीते
'स्कुञ्'—आप्रवणे
'युञ्'—बन्धने (युनाति युनीते

अथ उदात्ताः
'क्नूञ्'—शब्दे (क्नूनाति,
क्नूनीते
'द्रूञ्'—हिंसायाम् १४८०
(द्रूणाति, द्रूणीते
* 'पूञ्'—पवने (पुनाति पुनीते
* 'लूञ्'—छेदने (लुनाति
लुनीते
* 'स्तॄञ्'—आच्छादने
(स्तृणाति, स्तृणीते

'कॄञ्'—हिंसायाम् (कृणाति,
कृणीते
* 'वॄञ्'—वरणे (वृणाति,
वृणीते
* 'धूञ्'—कम्पने (धुनाति,
(धुनीते

अथ परस्मैपदिनः २४
तत्र उदात्ता उदात्तेतः
* 'शॄ'—हिंसायाम् (शृणाति
* 'पॄ'—पालन-पूरणयोः
(पृणाति
* 'वॄ'—वरणे (वृणाति,
भरणे इत्येके
'भॄ'—भर्त्सने १४९०
(भृणाति
'मॄ'—हिंसायाम् (मृणाति
* 'दॄ'—विदारणे (दृणाति
* 'जॄ'—वयोहानौ
'झॄ'—इत्येके
'धॄ'—इत्यन्ये
* 'नॄ'—नये (नृणाति
'कॄ'—हिंसायाम् (कृणाति
* 'ऋ'—गतौ (ऋणाति
* 'गॄ'—शब्दे (गृणाति

अथ ज्यादयः
* 'ज्या'—वयोहानौ (जिनाति
* 'री'—गति-रेषणयोः
(रिणाति
'ली'—श्लेषणे १५००
(लिनाति
'व्ली'—वरणे (व्लिनाति
'प्ली'—गतौ
वृत् । इति प्वादयः ।

'व्री'—वरणे
'भ्री'—भये
भरे इत्येके
'क्षीष्'—हिंसायाम्
* 'ज्ञा'—अवबोधने (जानाति
* 'बन्ध'—बन्धने (बध्नाति
* 'वृङ्'—संभक्तौ (वृणीते
उदात्त आत्मनेपदी

अथ उदात्ता उदात्तेतः
परस्मैपदिनः २५
विषिवर्जम् ।
'श्रन्थ'—विमोचन-प्रति-
हर्षयोः (श्रथ्नाति
* 'मन्थ'—विलोडने १५१०
(मथ्नाति
* 'श्रन्थ' } सन्दर्भे (श्रथ्नाति
'ग्रन्थ' } ग्रथ्नाति
'कुन्थ'—संश्लेषणे
संक्लेशे इत्येके
'कुथ'—इति दुर्गः (कुथ्नाति
* 'मृद'—क्षोदे (मृद्नाति
* 'मृड'—च (मृड्णाति
अयं सुखेऽपि
'गुध'—रोषे (गुध्नाति
* 'कुष'—निष्कर्षे (कुष्णाति)
* 'क्षुभ'—सञ्चलने (क्षुभ्नाति
'णभ' } हिंसायाम्
'तुभ' } (नभ्नाति, तुभ्नाति
* 'क्लिशू'—विबाधने (क्लिश्नाति
* 'अश'—भोजने (अश्नाति
'उध्रस'—उञ्छे (उध्रस्नाति)
'इष'—आभीक्ष्ण्ये (इष्णाति

* 'विष'—विप्रयोगे १५२५
(विषाति
'प्रुष' } स्नेहन-सेचन-पूरणेष
'प्लुष' } (प्रुष्णाति प्लुष्णाति
* 'पुष'—पुष्टौ (पुष्णाति
* 'मुष'—स्तेये (मुष्णाति
'खच'—भूत-प्रादुर्भावे
(खच्नाति वान्तोऽयम्
इतीत्रके (खौनाति
'हिठ'—च (हिट्णाति

——*——

'ग्रह'—उपादाने (गृह्णाति
गृह्णीते, उदात्तः स्वरितेद
उभयपदी

——*——

अथ चुरादिः ३।१।२५

तत्र परस्मैपदिनः १६४

* 'चुर'—स्तेये (चोरयति
चोरयते
* 'चिति'—स्मृत्याम् (चिन्तति
(चिन्तयति
* 'यत्रि'—संकोचे (यन्त्रयति
* 'स्फुडि'—परिहासे (स्फुण्डयति
स्फुटि इत्यपि (स्फुण्टयति
* 'लक्ष'—दर्शनाऽङ्कनयोः
(लक्षयति
'कुद्रि'—अनृत-भाषणे
(कुन्द्रयति
'लड'—उपसेवायाम् (लाडयति
'मिदि'—स्नेहने १५४०
(मिन्दयति मिन्दति
'ओलडि'—उत्क्षेपणे (लण्डयति
लण्डति, ओकारो धात्ववयव
इतीत्रके, न इत्यपरे

'उलडि'—इत्यन्ये (उलण्डयति
'जल'—अपवारणे
'लज'—इतीत्रके
* 'पीड'—अवगाहने (पीडयति
'नट'—अवस्कन्दने (नाटयति
'श्रथ'—प्रयत्ने
प्रस्थाने इतीत्रके
'बध'—संयमने (बाधयति
बन्ध इति चान्द्राः
* 'पॄ'—पूरणे (पारयति
* 'ऊर्ज्ज'—बल-प्राणनयोः
(ऊर्ज्जयति
* 'पक्ष'—परिग्रहे
* 'वर्ण' } प्रेरणे
चूर्ण }
'वर्ण—वर्णने इतीत्रके
'प्रथ'—प्रख्याने (प्राथयति
'पृथ'—प्रक्षेपे (पर्थयति
'पथ'—इत्येके (पाथयति
'षम्ब'—सम्बन्धने (सम्बयति
'शम्ब'—च १५५५
'साम्ब'—इतीत्रके
* 'भक्ष'—अदने (भक्षयति
* 'कुट्ट'—छेदन-भर्त्सनयोः
पूरणे इतीत्रके (कुट्टयति
'पुट्ट' } अल्पीभावे
'चुट्ट' }
'अट्ट' } अनादरे (अट्टयति
'षुट्ट' }
* 'लुण्ठ'—स्तेये (लुण्ठयति
'शठ' } असंस्कार-गत्योः
'श्वठ' }
'श्वठि'—इतीत्रके

'तुजि' } हिंसा-बलादान-
'पिजि' } निकेतनेषु
(तुञ्जयति पिञ्जयति
'तुज' } इति केचित्
'पिज' }
'लजि' } इतीत्रके
'लुजि' }
'पिस'—गतौ (पेसयति
* 'षान्त्व'—साम-प्रयोगे
(सान्त्वयति
'श्वल्क' } परिभाषणे १५७०
'वल्क' }
'ष्णिह'—स्नेहने (स्नेहयति
'स्फिट'—इतीत्रके
'स्मिट'—अनादरे
'ष्मिङ्'—इतीत्रके (स्माययते
'श्लिष'—श्लेषणे (श्लेषयति
* 'पथि'—गतौ (पन्थयति
'पिच्छ'—कुट्टने १५७५
* 'छदि'—संवरणे (छन्दयति
* 'श्रण'—दाने (विश्राणयति
* 'तड'—आघाते (ताडयति
'खड' } भेदने
* 'खडि' } (खाडयति, खण्डयति
* 'कडि' } कण्डयति
* 'कुडि'—रक्षणे
* 'गुडि'—वेष्टने
रक्षणे इतीत्रके
* 'कुठि'—इत्यन्ये (अवकुण्ठयति
* 'गुठि'—इत्यपरे (गुण्ठयति
'खुडि'—खण्डने
* 'वटि —विभाजने
(वण्टयति १५८५
'वडि'—इति केचित्

* 'मडि'—भूषायां हर्षे च (मण्डयति
* 'भडि'—कल्याणे (भण्डयति
* 'छर्द'—वमने (छर्दयति
'पुस्त' 'बुस्त' } आदराऽनादरयोः
* 'चुद'—सञ्चोदने (चोदयति
'नक्क' 'धक्क' } नाशने (नक्कयति
'चक्क' 'चुक्क' } व्यथने
* 'क्षल'—शौच-कर्म्मणि (क्षालयति
* 'तल'—प्रतिष्ठायाम् (तालयति
* 'तुल'—उन्माने (तोलयति
* 'दुल'—उत्क्षेपे (दोलयति
'पुल'—महत्त्वे १६०० (पोलयति
'चुल'—समुच्छ्राये (चोलयति
* 'मूल'—रोहणे (मूलयति
* 'कल' 'विल' } क्षेपे (कालयति
'बिल'—भेदने
'तिल'—स्नेहने (तेलयति
'चल'—भृतौ
* 'पाल'—रक्षणे (पालयति
'लूष'—हिंसायाम्
'शुल्ब'—माने १६१०
'शूर्प'—च
'चुट'—छेदने (चोटयति
'मुट'—सञ्चूर्णने (मोटयति
'पडि' 'पंस' } नाशने (पण्डयति पंसयति
'व्रज' 'मार्ग' } संस्कारगत्योः
'शुल्क'—अतिस्पर्शने

* 'चपि'—गत्याम् (चम्पयति
'चपि'—चान्त्याम् (चम्पयति
'क्षजि'—कृच्छ्रजीवने (क्षञ्जयति
'श्वर्त'—गत्याम्
'श्वभ्र'—च
'ज्ञप'—ज्ञान-ज्ञापन-मारण-तोषण-निशान-निशामनेषु मिच्च (ज्ञपयति
'यम'—च परिवेषणे (यमयति
'चह'—परिकल्कने (चहयति
'चप'—इत्येके (चपयति
'रह'—त्यागे (रहयति
'बल'—प्राणने (बलयति
'चिञ्'—चयने (चपयति, चययति
* 'नान्ये मितः अहेतौ
[अहेतौ स्वार्थे णिचि, ज्ञपादिभ्यः अन्ये मितो न भवन्ति । तेन, शमादीनाम् अमन्तत्वं, मित्त्वं न]
* 'घट्ट'—चलने (घट्टयति
* मुस्त'—संघाते १६३०
* खट्ट'—संवरणे (खट्टयति
'षट्ट' 'स्फिट्ट' 'चुबि' } हिंसायाम्
'पूल'—संघाते
'पूर्ण'—इत्येके
'पुण'—इत्यन्ये
'पुंस'—अभिवर्द्धने
* 'टकि'—बन्धने (टङ्कयति
'धूस'—कान्ति-करणे (धूसयति
'धूष'—इत्येके
'धूश'—इत्यन्ये
'कीट'—वर्णे

'चूर्ण'—संकोचने १६४० चूर्णयति
* 'पूज'—पूजायाम् (पूजयति
* 'अर्क'—स्तवने (अर्कयति तपने इत्येके
'शुठ'—आलस्ये
'शुठि'—शोषणे (शुण्ठयति
'जुड'—प्रेरणे १६४५ (जोडयति
'गज' 'मार्ज' } शब्दार्थौ (गाजयति मार्जयति
'मर्च'—च (मर्चयति
* 'घृ'—प्रस्रवणे स्रावणे इत्येके
* 'पचि'—विस्तार-वचने (पञ्चयति
* 'तिज'—निशाने (तेजयति
* 'कृत'—संशब्दने (कीर्त्तयति ७।१।१०१
* 'वर्द्ध'—छेदन-पूरणयोः (वर्द्धयति
'कुबि'—आच्छादने (कुम्बयति
* 'कुभि'—इत्येके (कुम्भयति
'लुबि' 'तुबि' } अदर्शने अर्दने इत्येके
'ह्रप'—व्यक्तायां वाचि
'क्लप'—इत्येके
'चुटि'—छेदने
'इल'—प्रेरणे (एलयति
* 'म्रच'—म्लेच्छने १६६० (म्रचयति
* 'म्लेच्छ'—अव्यक्तायां वाचि (म्लेच्छयति
'ब्रूस' 'बर्ह' } हिंसायाम्

केचिदत्र इह—

'गर्ध' } शब्दे
'गर्द'

'गर्ध'—अभिकाङ्क्षायाम्
इति पठन्ति

'गुर्द' } निकेतने (गूर्दयति
'पूर्व' } पूर्वयति

'जसि'—रक्षणे (जंसयति
मोक्षणे इति केचित्

* 'ईड'—स्तुतौ (ईड़यति
* 'जसु'—हिंसायाम् (जासयति
* 'पिडि'—संघाते (पिण्डयति
* 'रुष'—रोष
'रुठ'—इत्येके
* 'डिप'—क्षेपे १६७· (डेपयति
* 'ष्टुप'—समुच्छ्राये

———

अथ आकुस्मीया आत्मने पदिनः ।

'चित'—सञ्चेतने (चेतयते
'दशि'—दंशने (दंशयते
'दसि'—दर्शन-दंशनयोः
दंसयते

'डप' } संघाते
'डिप'

* 'तत्रि'—कुटुम्ब-धारणे (तन्त्रयते
* 'मत्रि'—गुप्त-परिभाषणे मन्त्रयते

'स्पश'—ग्रहण-संश्लेषणयोः

* 'तर्ज' } तर्जने (तर्जयते
* 'भर्त्स' } भर्त्सयते

'बस्त' } अर्दने (बस्तयते
'गन्ध' } गन्धयते

'विष्क'—हिंसायाम्
'हिष्क'—इत्येके
'निष्क'—परिमाणे १६८५
* 'लल'—ईप्सायाम् लालयते
'कूण'—संकोचे
'तूण'—पूरणे
'भ्रूण'—आशा-विशङ्कयोः
'शठ'—श्लाघायाम् (शाठयते
'यक्ष'—पूजायाम् (यक्षयते
'स्यम'—वितर्के
'गूर'—उद्यमने

'शम' } आलोचने शामयते
* 'लक्ष'

* 'कुत्स' अवक्षेपणे
(कुत्सयते
* 'त्रुट'—छेदने (त्रोटयते
'कुट'—इत्येके
'गल'—स्रवणे
'भल'—आभण्डने
'कूट'—आप्रदाने १७००
अवसादने इत्येके
'कुट्ट'—प्रतापने
'वञ्चु'—प्रलम्भने (वञ्चयते
'वृष'—शक्तिबन्धने (वर्षयते
'मद'—तृप्तियोगे (मदयते
'दिव'—परिकूजने
'गृ'—विज्ञाने (गारयते
'विद'—चेतना ख्यान निवासेषु
(वेदयते
'मान'—स्तम्भे (मानयते
'यु'—जुगुप्सायाम् (यावयते
'कुस्म'—नाम्नो वा १७१०
कुत्सित स्मयने (कुस्मयते

———

* 'चर्च'—अध्ययने (चर्चयति
'बुक्क'—भषणे (बुक्कयति
'शब्द'—उपसर्गाद्
आविष्कारे च
(शब्दयति उपशब्दयति
'कण'—निमीलने (काणयति
'जभि'—नाशने १७१५
(जम्भयति
'षूद'—क्षरणे (सूदयति
'जसु'—ताड़ने (जासयति
'पश'—बन्धने (पाशयति
'अम'—रोगे (आमयति

'चट' } भेदने (चाटयति
'स्फुट' } स्फोटयति

'घट'—संघाते (घाटयति
हन्त्यर्थाश्च
दिवु'—मर्दने
'अर्ज'—प्रतियत्ने (अर्जयति
'घुषिर्'—विशब्दने (घोषयति
'आङः क्रन्द'—सातत्ये
आक्रन्दयति
'लस'—शिल्पयोगे

* 'तसि' } अलङ्करणे (तंसयति, भूषयति
* 'भूष'

'मोक्ष'—असने (मोक्षयति
'अर्ह'—पूजायाम् १७२०
अर्हयति
'ज्ञा'—नियोगे (आज्ञापयति
'भज'—विश्राणने (भाजयति
'शृधु'—प्रसहने (शर्धयति
'यत'—निकारोपस्कारयोः
यातयति

'रक' } आस्वादने
'लग'

'रघ'
'रग' } इत्यन्ये

'अञ्चु—विशेषणे (अञ्चयति

'लिगि'—चित्रीकरणे (लिङ्गयति

'मुद'—संसर्गे (मोदयति

'वस'—धारणे १७४०

ग्रहणे इत्येके

वारणे इत्यन्ये

'उध्रस'—उञ्छे (ध्रासयति

उकारो धात्ववयव इत्येके

न इत्यन्ये

* 'मुच'—प्रमोचने (मोचयति

मोदने च

'वस'—स्नेह-च्छेदा-ऽपहरणेषु (वासयति

'चर'—संशये

'च्यु'—सहने (च्यावयति

हसने इत्येके

'च्युस'—इत्येके (च्योसयति

'भुवो'—ऽवकल्कने (भावयति

* 'क्रपेश'—(कल्पयति

———

आ स्वदः सकर्मकात्

* 'ग्रस'—ग्रहणे (ग्रासयति

फलम्

* 'पुष'—धारणे (पोषयत्या-

भरणम्

'दल'—विदारणे १७५०

(दालयति

'पट'
'पुट'
'लुट'
'तुजि'
'मिजि'
'पिजि'
'लुजि'
'भजि'
'लघि'
'त्रसि'
'पिसि'
'कुसि'
'दशि'
'कुशि'
'घट'
'घटि'
'बृह'
'बर्ह'
'बल्ह'
'गुप'
'धूप'
'विच्छ'
'चीव'
'पुथ'
'लोकृ'
'लोचृ'
'णद'
'कुप'
'तर्क'
'वृतु'
'वृधु' } भाषार्थाः

पाटयति
पोटयति
लोटयति
तुञ्जयति
घाटयति घण्टयति
तर्कयति
कुंसयति

'रुट'
'लजि'
'अजि'
'दसि'
'भृशि'
'रुशि'
'शीक'
'नट'
'पुटि'
'जिवि'
'रघि'
'लघि'
'अहि'
'रहि'
'महि' } च

'लडि'
'तड'
'नल' } च

'पूरी'—आप्यायने १८०२

(पूरयति

'रुज'—हिंसायाम् १८०३

(रोजयति

* 'स्वद'—आस्वादने १८०४

(स्वादयति

* 'स्वाद'—इत्येके

———

अथ आ-धृषीयाः ५०

आधृषाद् वा (णिच्)

* 'युज'
'पृच' } संयमने (योजयति पर्चयति योजति पर्चति

* 'अर्च'—पूजायाम् (अर्चयति अर्चति

* 'षह'—मर्षणे (साहयति सहति
* 'ईर'—क्षेपे (ईरयति
* 'ली'—द्रवीकरणे (लापयति लयति
* 'वृजी'—वर्जने (वर्जयति वर्जति
'वृञ्'—आवरणे (वारयति वरति
* 'जॄ'—वयोहानौ (जारयति जरति
'चि'—च (चाययति चयति
'रिच'—वियोजन-सम्पर्चनयोः (रेचयति रेचति
'शिष'—असर्व्वोपयोगे (शेषयति, शेषति
'तप'—दाहे (तापयति, तपति
* 'तृप'—तृप्तौ (तर्पयति, तर्पति सन्दीपने इत्येके
'छृदी'—सन्दीपने (छर्दयति छर्दति
'चृप' 'छृप' 'तृप' 'दृप' } सन्दीपने इत्येके (चर्पयति छर्पयति
'दृभी'—भये १८२० (दर्भयति दर्भति
* 'दृभ'—सन्दर्भे (दर्भयति
'श्रथ'—मोक्षणे (श्राथयति हिंसायाम् इत्येके
'मी'—गतौ (माययति, मयति
* 'ग्रन्थ'—बन्धने (ग्रन्थयति ग्रन्थति
'शीक'—आमर्षणे १८२५
'चीक'—च

* 'अर्द्द'—हिंसायाम् (अर्द्दयति अर्द्दति, स्वरितेत्
* 'हिसि'—हिंसायाम् (हिंसयति
* 'अर्ह'—पूजायाम् (अर्हयति
'आङः षद'—पद्यर्थे १८३० (आसीदति आसादयति
'शुन्ध'—शौच-कर्म्मणि (शुन्धयति
* 'छद'—अपवारणे (छादयति स्वरितेत्
'जुष'—परितर्कणे (जोषयति जोषति परितर्पणे इत्यन्ये
'धूञ्'—कम्पने (धूनयति धवति
* 'प्रीञ्'—तर्पणे (प्रीणयति प्रयति
'श्रन्थ' 'ग्रन्थ' } सन्दर्भे (श्रन्थयति ग्रन्थयति
* 'आपॢ'—लम्भने (आपयति आपति स्वरितेद् अयम् इत्येके
'तनु'—श्रद्धोपकरणयोः (तानयति तनति
'चन'—श्रद्धोपहननयोरित्येके (चानयति चनति
* 'वद'—सन्देश-वचने (वादयति वदति वदते स्वरितेत्, अनुदात्तेद् इत्येके
* 'वच'—परिभाषणे (वाचयति वचति
* 'मान'—पूजायाम् (मानयति मानति
* 'भू'—प्राप्तौ (भावयते भवति भवते आत्मनेपदी

* 'गर्ह'—विनिन्दने (गर्हयति
* 'मार्ग'—अन्वेषणे (मार्गयति
'कठि'—शोके (उत्कण्ठयति
* 'मृजू'—शौचालङ्कारयोः (मार्जयति मार्जति
* 'मृष'—तितिक्षायाम् (मर्षयति मर्षति, स्वरितेत्
* 'धृष'—प्रसहने (धर्षयति धर्षति

अथ अदन्ताः ६७

* 'कथ'—वाक्य-प्रबन्धे १८५० (कथयति
* 'वर'—ईप्सायाम् (वरयति
* 'गण'—संख्याने (गणयति
'शठ' 'श्वठ' } सम्यग् अवभाषणे
'पट' 'वट' } ग्रन्थे
* 'रह'—त्यागे (रहयति
'स्तन' 'गदी' } देवशब्दे (स्तनयति गदयति
'पत'—गतौ वा १८६० वा अदन्त इत्येके पतयति, पतति, पातयति
'पष'—अनुपसर्गात् (पषयति
'स्वर'—आक्षेपे (स्वरयति
'रच'—प्रतियत्ने (रचयति
* 'कल'—गतौ संख्याने च (कलयति
'चह'—परिकल्कने
'मह'—पूजायाम् (महयति
'सार' 'कृप' 'श्रथ' } दौर्बल्ये (सारयति, कृपयति श्रथयति

* 'स्पृह'—ईप्सायाम् १८७०
(स्पृहयति
* 'भाम'—क्रोध
* 'सूच'—पैशुन्ये (सूचयति
* खेट'—भक्षणे (खेटयति
'खेड'—इत्येके (खेडयति
'खोट'—इत्यन्ये
'चोट'—क्षेपे
'गोम'—उपलेपने
गोमयति स्थानम्
* 'कुमार'—क्रीड़ायाम्
(कुमारयति
'शील'—उपधारणे (शीलयति
* 'साम'—सान्त्वप्रयोगे (सामयति
'वेल'—कालोपदेशे (वेलयति
* 'काल'—इति पृथग्धातुरित्येके
'पल्यूल'—लवन-पवनयोः
'वात'—सुख-सेवनयोः
गति-सुख-सेवनेषु
इत्येके (वातयति
* 'गवेष'—मार्गणे (गवेषयति
'वास'—उपसेवायाम् (वासयति
'निवास'—आच्छादने
'भाज'—पृथक् कर्म्मणि
'सभाज'—प्रीतिदर्शनयोः
प्रीतिसेवनयोरित्येके
(सभाजयति
* 'ऊन'—परिहाणे (ऊनयति
* 'ध्वन'—शब्दे (ध्वनयति
'कूट'—परितापे
परिदाहे इत्यन्ये
'सङ्केत' 'ग्राम' 'कुण' 'गुण' च } आमन्त्रणे (सङ्केतयति ग्रामयति, कुणयति गुणयति

'केत'—श्रावणे (केतयति
निमन्त्रणे च
कूण'—सङ्कोचनेऽपि १८९५
'स्तेन'—चौर्य्ये

———

आगर्व्वाद् आत्मनेपदिनः

'पद'—गतौ (पदयते
'गृह'—ग्रहणे (गृहयते
* 'मृग'—अन्वेषणे (मृगयते
'कुह'—विस्मापने १९००
'शूर' 'वीर' } विक्रान्तौ (शूरयते वीरयते
'स्थूल'—परिवृंहणे
* 'अर्थ'—उपयाच्ञायाम्
(अर्थयते
'सत्र'—सन्तान-क्रियायाम्
१९०५
* 'गर्व्व'—माने (गर्व्वयते

———

* 'सूत्र'—वेष्टने (सूत्रयति
* 'मूत्र'—प्रस्रवणे (मूत्रयति
मूत्रति
'रूक्ष'—पारुष्ये
* 'पार' 'तीर' } कर्म्मसमाप्तौ (पारयति, तीरयति
'पुट'—संसर्गे (पुटयति
'धेक'—दर्शने इत्येके
'कत्र'—शैथिल्ये १९१४
(कत्रयति, कत्रति
'कर्त्त'—इत्यप्येके (कर्त्तयति
कर्त्तति

———

प्रातिपदिकाद् धात्वर्थे बहुलम्, इष्ठवच्च (क) तत्करोति तदाचष्टे (ख) तेनातिक्रामति (ग) धातुरूपञ्च (घ) [च-शब्दः अनुक्त-समुच्चयार्थः। तथाच वार्त्तिकं—आख्यानात् कृतस्तद् आचष्टे कृल्लुक् प्रत्यापत्तिः प्रकृतिवच्च कारकम् (कंसवधम् आचष्टे इति कंसं घातयति) कर्त्तृकरणाद् धात्वर्थे—(असिना हन्ति असयति)

———

'बष्क'—दर्शने १९१५
* 'चित्र'—चित्रीकरणे (चित्रयति
कदाचिद् दर्शने
'अंस'—समाघाते
'वट'—विभाजने
'लज'—प्रकाशने
'वटि' 'लजि' } इत्येके (वण्टयति लञ्जयति
'मिश्र'—सम्पर्के (मिश्रयति
'संग्राम'—युद्धे (संग्रामयते
अनुदात्तेत्
'स्तोम'—श्लाघायाम्
'छिद्र—कर्ण-भेदने (छिद्रयति
करण भेदने इत्येके
'कर्ण'—इति धात्वन्तरम्
इत्यपरे (कर्णयति
* 'अन्ध'—दृष्ट्युपघाते उपसंहारे
इत्यन्ये (अन्धयति
* 'दण्ड'—दण्ड-निपातने १९१५
(दण्डयति
* 'अङ्क'—पदे, लक्षणे च
(अङ्कयति

'अङ्क'—च (अङ्कयति

'सुख' } तत्क्रियायाम्.
'दुःख' } सुखयति, दुःखयति

'रस'—आस्वादन-स्नेहनयोः
(रसयति

'व्यय'—वित्त समुत्सर्ग
(व्याययति

* 'रूप'—रूप-क्रियायाम्
(रूपयति

'छेद'—द्वैधीकरणे

* 'छद'—अपवारणे (छादयति

'लाभ'—प्रेरणे १९३५

'व्रण'—गात्र-विचूर्णने (व्रणयति

* 'वर्ण'—वर्णक्रिया-विस्तार-गुण
वचनेषु (वर्णयति

[बाहुलकाद् अन्येऽपि
बोध्याः यथा]

'पर्ण'—हरितभावे

'विष्क'—दर्शने

'चप'—प्रेरणे १०४०

'वस'—निवासे १९४१

'तुत्थ'—आवरणे १९४२

———*———

णिङ्'—अङ्गाद् निरसने (क)
[हस्तौ निरस्यति, हस्तयते]

श्वेताश्वाश्वतर-गालोड़िताह्वर-
काणाम् अश्व-तरे-त-क-लोपश्च
(श्वेतयते, अश्वयते, गालोड़यते,
आह्वरयते

केचित् तु णिचम् एव अनु-
वर्त्तयन्ति, तन्मते परस्मैपदमपि (ख)

पुच्छादिषु प्रातिपदिकाद् धात्वर्थे
इत्येव सिद्धम् (ग)

इति स्वार्थे ण्यन्ताश्चुरादयः ४१०

———

अथ कण्ड्वादयः

* 'कण्डूञ्'—गात्र-विघर्षणे
(कण्डूयति कण्डूयते

'मन्तु'—अपराधे (मन्तूयति ०ते

'वल्गु'—पूजा-माधुर्य्ययोः
वल्गूयति

'असु'—उपतापे

'असू' } इत्येके
'असूञ्' } (असूयति ०ते

'लिट्' } धौर्त्ये पूर्व्वभावे
'लोट्' } स्वप्ने च, दीप्तौ
इत्येके (लिट्यति
लोट्यति

'लेला'—दीप्तौ (लेलायति

'इरस्' } ईर्ष्यायाम् (इरस्यति
'इरज्' } इरज्यति ईर्ष्यति
'इरञ्' } ०ते

'उषस्'—प्रभातीभावे
(उषस्यति

वेद'—धौर्त्ये स्वप्ने च

'मेधा'—आशुग्रहणे (मेधायति

'कुषुभ'—क्षेपे (कुषुभ्यति

'मगध'—परिवेष्टने १५
नीचदास्ये इत्यन्ये

'तन्तस्' } दुःखे
'पम्पस्' }

* 'सुख' } तत्क्रियायाम्
'दुःख' } (सुख्यति दुःख्यति

* 'सपर'—पूजायाम् (सपर्य्यति

'अरर'—आराकर्म्मणि

* 'भिषज्'—चिकित्सायाम्
भिषज्यति

'भिष्णज्'—उपसेवायाम्

'इषुध'—शरधारणे

'चरण' } गतौ
'वरण' }

'चुरण'—चौर्य्ये

'तुरण'—त्वरायाम्

'भुरण'—धारण-पोषणयोः

'गद्गद'—वाक्-स्खलने ३०
(गद्गदयति

'एला' } विलासे
'केला' } (खेलायति
'खेला' }

'इला'—इत्यन्ये

'लेखा'—स्खलने च
अदन्तोयम् इत्यन्ये
(लेखायति, लेख्यति

'लिट'—अल्प-कुत्सनयोः

'लाट'—जीवने

* 'हृणीङ्'—रोषणे लज्जायाञ्च
हृणीयते

* 'महीङ्'—पूजायाम् (महीयते

'रेखा'—श्लाघा-सादनयोः

'द्रवस्'—परिताप-परिचरणयोः

'तिरस्'—अन्तर्द्धौ (तिरस्यति

'अगद'—नीरोगत्वे (अगदयति

'उरस्'—बलार्थः (उरस्यति

'तरण'—गतौ

'पयस्'—प्रसृतौ

'सम्भूयस्'—प्रभूत-भावे

'अम्बर' } संभरणे ४८
'संवर' }

आकृति-गणोऽयम्

इति श्रीमद्भगवन्महर्षि-
पाणिनि-प्रणीतो धातु-पाठः

सम्पूर्णः

———

अथ दश-लकारेषु विभक्तयः ३।४।७७, ७८

लट् ३।२।१२३, २४, ३।३।१३१, ३।२।११८, ३।३।४

	परस्मैपदम्			आत्मनेपदम्		
	प्रथमपुरुषस्य	मध्यमपुरुषस्य	उत्तमपुरुषस्य	प्रथमपुरुषस्य	मध्यमपुरुषस्य	उत्तमपुरुषस्य
एकवचने	तिप्	सिप्	मिप्	ते	से	इ
द्विवचने	तस्	थस्	वस्	इते	इथे	वहे
बहुवचने	अन्ति	थ	मस्	अन्ते	ध्वे	महे

लोट् ३।३।१६२, ३।४।८५, ३।३।१५७, १६५, १६८, १७३

एकवचने	तु	हि	आनि	ताम्	स्व	ऐ
द्विवचने	ताम्	तम्	आव	इताम्	इथाम्	आवहै
बहुवचने	अन्तु	त	आम	अन्ताम्	ध्वम्	आमहै

लङ् ३।२।१११, ३।३।१७६

एकवचने	द्	स्	अम्	त	थास्	इ
द्विवचने	ताम्	तम्	व	इताम्	इथाम्	वहि
बहुवचने	अन्	त	म	अन्त	ध्वम्	महि

विधिलिङ् ३।३।१३४, १५६, १५७, १५९, १६१

एकवचने	ईत्	ईस्	ईयम्	ईत	ईथास्	ईय
द्विवचने	ईताम्	ईतम्	ईव	ईयाताम्	ईयाथाम्	ईवहि
बहुवचने	ईयुस्	ईत	ईम्	ईरन्	ईध्वम्	ईमहि

लृट् ३।३।१३, १४, ३।२।११२

एकवचने	स्यति	स्यसि	स्यामि	स्यते	स्यसे	स्ये
द्विवचने	स्यतस्	स्यथस्	स्यावस्	स्येते	स्येथे	स्यावहे
बहुवचने	स्यन्ति	स्यथ	स्यामस्	स्यन्ते	स्यध्वे	स्यामहे

लृङ् ३।३।१३९

एकवचने	स्यत्	स्यस्	स्यम्	स्यत	स्यथास्	स्ये
द्विवचने	स्यताम्	स्यतम्	स्याव	स्येताम्	स्येथाम्	स्यावहि
बहुवचने	स्यन्	स्यत	स्याम	स्यन्त	स्यध्वम्	स्यामहि

लुङ् ३।२।११०, ३।३।१७५

	परस्मैपदम्			आत्मनेपदम्		
	प्रथमपुरुषस्य	मध्यमपुरुषस्य	उत्तमपुरुषस्य	प्रथमपुरुषस्य	मध्यमपुरुषस्य	उत्तमपुरुषस्य
एकवचने	सीत्	सीस्	सम्	स	स्थास्	सि
द्विवचने	स्ताम्	स्तम्	स्व	साताम्	साथाम्	स्वहि
बहुवचने	सुस्	स्त	स्म	सत	ध्वम्	स्महि

लिट् ३।२।११५, ३।२।१०६

एकवचने	णल्	थल्	णल	ए	से	ए
द्विवचने	अतुस्	अथुस्	व	आते	आथे	वहे
बहुवचने	उस्	अ	म	इरे	ध्वे	महे

लुट् ३।३।१५

एकचवने	ता	तासि	तास्मि	ता	तासे	ताहे
द्विवचने	तारौ	तास्थस्	तास्वस्	तारौ	तासाथे	तास्वहे
बहुवचने	तारस्	तास्थ	तास्मस्	तारस्	ताध्वे	तास्महे

आशीर्लिङ् ३।३।१७३

एकवचने	यात्	यास्	यासम्	सीष्ट	सीष्ठास्	सीय
द्विवचने	यास्ताम्	यास्तम्	यास्व	सीयास्ताम्	सीयास्थाम्	सीवहि
बहुवचने	यासुस्	यास्त	यास्म	सीरन्	सीध्वम्	सीमहि

लकारादेशा: ३।४।७७—११२

टित्—टि=ए, ३।४।७९, थास्=से, ३।४।८०

लट्—झ=अन्त ७।१।३, इते इथे ७।२।८१, भवामि ७।३।१०१

लिट्—णल् ३।४।८२, त=ए ३।४।८१, झ=इरे ३।४।८१

लुट्—डा ३।४।८५, तासि ३।१।३३, ताहे ७।४।५२, तास=ता ७।४।५०, ५१

लृट्—स्य ३।१।३३

लेट्—छान्दस:

लोट—टि=ऐ ३।४।९३, थास्=स्व ३।४।९१, इ=उ ३।४।८६, तातङ् ७।१।३५, लङ्वत् ३।४।८५, तस्=ताम्, थस्=तम्, थ=त, मिप्=अम् ३।४।१०१, सि=हि ३।४।८७, सि=०, ६।४।१०५, मि=आनि, ३।४।८९, ९२ ; इताम् इथाम् ७।२।८१, ३।४।९०

ङित्—म्=०, ३।४।९९, इ=०, ३।४।१००, लङ् अट् ६।४.७१, आट् ६।४.७२

विधिलिङ् ३।३।१६१, स्=०, ७।२।७९, याम् ३।४।१०३, यास्=ईय् ७.२।८०, य्=०, ६।१।६६, झि=जुस् ३।४।१०८, झ=रन् ३।४।१०५, ईय् ३।४।१०६

आशीर्लिंङ्—३।४।११६, १०४, अगुण ३।४।१०४, यास् ३।४।१०३, झ=रन् ३।४।१०५, सीय ३।४।१०६, सीष्ट सीयास्ताम् सीष्ठास् सीयास्थाम् ३।४।१०२, १०७ तु हि=तातङ् ७।१।३५

लुङ्—च्लि ३।१।४३, झि=जुस् ३।४।१०९

लृङ् ३।३।१३९, स्य ३।१।३३

धातुरूपाणि—भ्वादिः (परस्मैपदम्) ।

‘भू’ भो (गुण) ७।३।८४, शप् (अ) ३।१।६८, भवामः (आ) ७।३।१०१, अभवत्

६।४।७१, ७४, षत्व ८।३।५९, भव ६।४।१०५, भवन्ति ६।१।९७

	प्रथमपुरुषस्य			मध्यमपुरुषस्य			उत्तमपुरुषस्य		
	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने
	सः	तौ	ते,	त्वम्	युवाम्	यूयम्,	अहम्	आवाम्	वयम्
लट्	भवति	भवतः	भवन्ति,	भवसि	भवथः	भवथ,	भवामि	भवावः	भवामः
लोट्	भवतु	भवताम्	भवन्तु,	भव	भवतम्	भवत,	भवानि	भवाव	भवाम
लङ्	अभवत्	अभवताम्	अभवन्,	अभवः	अभवतम्	अभवत,	अभवम्	अभवाव	अभवाम
विधिलिङ्	भवेत्	भवेताम्	भवेयुः,	भवेः	भवेतम्	भवेत,	भवेयम्	भवेव	भवेम
लृट्	भविष्यति	भविष्यतः	भविष्यन्ति,	भविष्यसि	भविष्यथः	भविष्यथ,	भविष्यामि	भविष्यावः	भविष्यामः
लृङ्	अभविष्यत्	अभविष्यताम्	अभविष्यन्,	अभविष्यः	०विष्यतम्	०विष्यत,	अभविष्यम्	०विष्याव	०विष्याम

‘स्था’ ७।३।७८

लट्	तिष्ठति	तिष्ठतः	तिष्ठन्ति,	तिष्ठसि	तिष्ठथः	तिष्ठथ,	तिष्ठामि	तिष्ठावः	तिष्ठामः
लोट्	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु,	तिष्ठ	तिष्ठतम्	तिष्ठत,	तिष्ठानि	तिष्ठाव	तिष्ठाम
लङ्	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्,	अतिष्ठः	अतिष्ठतम्	अतिष्ठत,	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम
विधिलिङ्	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः,	तिष्ठेः	तिष्ठेतम्	तिष्ठेत,	तिष्ठेयम्	तिष्ठेव	तिष्ठेम
लृट्	स्थास्यति	स्थास्यतः	स्थास्यन्ति,	स्थास्यसि	स्थास्यथः	स्थास्यथ,	स्थास्यामि	स्थास्यावः	स्थास्यामः
लृङ्	अस्थास्यत्	अस्थास्यताम्	अस्थास्यन्,	अस्थास्यः	अस्थास्यतम्	अस्थास्यत,	अस्थास्यम्	अस्थास्याव	अस्थास्याम

‘गम’ ७।३।७७, ७।२।५८

लट्	गच्छति	गच्छतः	गच्छन्ति,	गच्छसि	गच्छथः	गच्छथ,	गच्छामि	गच्छावः	गच्छामः
लोट्	गच्छतु	गच्छताम्	गच्छन्तु,	गच्छ	गच्छतम्	गच्छत,	गच्छानि	गच्छाव	गच्छाम
लङ्	अगच्छत्	अगच्छताम्	अगच्छन्,	अगच्छः	अगच्छतम्	अगच्छत,	अगच्छम्	अगच्छाव	अगच्छाम
विधिलिङ्	गच्छेत्	गच्छेताम्	गच्छेयुः,	गच्छेः	गच्छेतम्	गच्छेत,	गच्छेयम्	गच्छेव	गच्छेम
लृट्	गमिष्यति	गमिष्यतः	गमिष्यन्ति,	गमिष्यसि	गमिष्यथः	गमिष्यथ,	गमिष्यामि	गमिष्यावः	गमिष्यामः
लृङ्	अगमिष्यत्	०मिष्यताम्	०मिष्यन्,	अगमिष्यः	अगमिष्यतम्	०मिष्यत,	अगमिष्यम्	अगमिष्याव	अगमिष्याम

'स्मृ' ७।२।७०

लट्	स्मरति	स्मरतः	स्मरन्ति,	स्मरसि	स्मरथः	स्मरथ,	स्मरामि	स्मरावः	स्मरामः
लोट्	स्मरतु	स्मरताम्	स्मरन्तु,	स्मर	स्मरतम्	स्मरत,	स्मराणि	स्मराव	स्मराम
लङ्	अस्मरत्	अस्मरताम्	अस्मरन्,	अस्मरः	अस्मरतम्	अस्मरत,	अस्मरम्	अस्मराव	अस्मराम
लिङ्	स्मरेत्	स्मरेताम्	स्मरेयुः,	स्मरेः	स्मरेतम्	स्मरेत,	स्मरेयम्	स्मरेव	स्मरेम
लृट्	स्मरिष्यति	स्मरिष्यतः	स्मरिष्यन्ति,	स्मरिष्यसि	स्मरिष्यथः	स्मरिष्यथ,	स्मरिष्यामि	०ष्यावः	०ष्यामः
लृङ्	अस्मरिष्यत्	अस्मरिष्यताम्	अस्मरिष्यन्,	अस्मरिष्यः	०ष्यतम्	अस्मरिष्यत,	अस्मरिष्यम्	०ष्याव	०ष्याम

'गै (=गा) ६।१।४५

लट्	गायति	गायतः	गायन्ति,	गायसि	गायथः	गायथ,	गायामि	गायावः	गायामः
लोट्	गायतु	गायताम्	गायन्तु,	गाय	गायतम्	गायत,	गायानि	गायाव	गायाम
लङ्	अगायत्	अगायताम्	अगायन्,	अगायः	अगायतम्	अगायत,	अगायम्	अगायाव	अगायाम
लिङ्	गायेत्	गायेताम्	गायेयुः	गायेः	गायेतम्	गायेत,	गायेयम्	गायेव	गायेम
लृट्	गास्यति	गास्यतः	गास्यन्ति,	गास्यसि	गास्यथः	गास्यथ,	गास्यामि	गास्यावः	गास्यामः
लृङ्	अगास्यत्	अगास्यताम्	अगास्यन्,	अगास्यः	अगास्यतम्	अगास्यत,	अगास्यम्	अगास्याव	अगास्याम

वृत्—१।३।९२, ७।२।५९ (आत्मनेपदी)

लट्	वर्त्तते	वर्त्तेते	वर्त्तन्ते,	वर्त्तसे	वर्त्तेथे	वर्त्तध्वे,	वर्त्ते	वर्त्तावहे	वर्त्तामहे
लोट्	वर्त्तताम्	वर्त्तेताम्	वर्त्तन्ताम्,	वर्त्तस्व	वर्त्तेथाम्	वर्त्तध्वम्	वर्त्तै	वर्त्तावहै	वर्त्तामहै
लङ्	अवर्त्तत	अवर्त्तेताम्	अवर्त्तन्त,	अवर्त्तथाः	अवर्त्तेथाम्	अवर्त्तध्वम्,	अवर्त्ते	अवर्त्तावहि	अवर्त्तामहि
लिङ्	वर्त्तेत	वर्त्तेयाताम्	वर्त्तेरन्,	वर्त्तेथाः	वर्त्तेयाथाम्	वर्त्तेध्वम्,	वर्त्तेय	वर्त्तेवहि	वर्त्तेमहि
लृट्	वर्त्तिष्यते	वर्त्तिष्येते	वर्त्तिष्यन्ते,	वर्त्तिष्यसे	वर्त्तिष्येथे	वर्त्तिष्यध्वे,	वर्त्तिष्ये	वर्त्तिष्यावहे	वर्त्तिष्यामहे
	वर्त्स्यति	वर्त्स्यतः	वर्त्स्यन्ति,	वर्त्स्यसि	वर्त्स्यथः	वर्त्स्यथ,	वर्त्स्यामि	वर्त्स्यावः	वर्त्स्यामः
लृङ्	अवर्त्तिष्यत	अवर्त्तिष्येताम्	अवर्त्तिष्यन्त,	अवर्त्तिष्यथाः	०ष्येथाम्	०ष्यध्वम्,	अवर्त्तिष्ये	०ष्यावहि	०ष्यामहि
	अवर्त्स्यत	अवर्त्स्यताम्	अवर्त्स्यन्	अवर्त्स्यः	अवर्त्स्यतम्	०र्त्स्यत,	०र्त्स्यम्	अवर्त्स्याव	०र्त्स्याम

धावु (उभयपदी)—परस्मै यथा

लट्	धावति	धावतः	धावन्ति,	धावसि	धावथः	धावथ,	धावामि	धावावः	धावामः
लोट्	धावतु	धावताम्	धावन्तु,	धाव	धावतम्	धावत,	धावानि	धावाव	धावाम
लङ्	अधावत्	अधावताम्	अधावन्,	अधावः	अधावतम्	अधावत,	अधावम्	अधावाव	अधावाम
लिङ्	धावेत्	धावेताम्	धावेयुः,	धावेः	धावेतम्	धावेत,	धावेयम्	धावेव	धावेम
लृट्	धाविष्यति	धाविष्यतः	धाविष्यन्ति,	धाविष्यसि	धाविष्यथः	धाविष्यथ,	धाविष्यामि	०ष्यावः	०ष्यामः
लृङ्	अधाविष्यत्	अधाविष्यताम्	०ष्यन्,	अधाविष्यः	०ष्यतम्,	अधाविष्यत,	अधाविष्यम्	०ष्याव	०ष्याम

आत्मने यथा,

लट्	धावते	धावेते	धावन्ते,	धावसे	धावेथे	धावध्वे,	धावे	धावावहे	धावामहे
लोट्	धावताम्	धावेताम्	धावन्ताम्	धावस्व	धावेथाम्	धावध्वम्,	धावै	धावावहै	धावामहै
लङ्	अधावत	अधावेताम्	अधावन्त	अधावथा:	अधावेथाम्	अधावध्वम्,	अधावे	अधावावहि	०महि
लिङ्	धावेत	धावेयाताम्	धावेरन्,	धावेथा:	धावेयाथाम्	धावेध्वम्,	धावेय	धावेवहि	धावेमहि
लृट्	धाविष्यते	धाविषेते	०ष्यन्ते,	धाविष्यसे	धाविषेथे	धाविष्यध्वे,	धाविष्ये	धाविष्यावहे	०ष्यामहे
लृङ्	अधाविष्यत	०षेताम्	०ष्यन्त,	अधाविष्यथा:	०षेथाम्	०ष्यध्वम्,	अधाविषे	०ष्यावहि	०ष्यामहि

अर्च—अर्चति अर्चत: अर्चन्ति, अर्चिष्यति
अर्ज—अर्जति अर्जत: अर्जन्ति, अर्जिष्यति
अर्ह—अर्हति अर्हत: अर्हन्ति, अर्हिष्यति
ईच—ईचते ईचेते ईचन्ते, ईचिष्यते
कम—कामयते कामयेते कामयन्ते,
कामयिष्यते ३।१।३०
कम्प—कम्पते कम्पेते कम्पन्ते, कम्पिष्यते
कृष—कर्षति कर्षत: कर्षन्ति, कर्च्यति
क्रच्यति ६।१।५९
कृप—कल्पते कल्पेते कल्पन्ते, कल्पिष्यते
कल्प्स्यते ८।२।१८, ७।२।६०
क्रम—क्रामति क्रामत: क्रामन्ति, क्रमिष्यति
७।३।७६
क्रीड़—क्रीड़ति क्रीड़त: क्रीड़न्ति, क्रीड़िष्यति
चम—चमते चमेते चमन्ते, चमिष्यते
चि—चयति चयत: चयन्ति, चेष्यति
चुभ—चोभते चोभेते चोभन्ते, चोभिष्यते
खन { खनति खनत: खनन्ति, खनिष्यति
खनते खनेते खनन्ते, खनिष्यते }
खाद—खादति खादत: खादन्ति, खादिष्यति
गाह—गाहते गाहेते गाहन्ते गाहिष्यते, घास्यते
गुप—गोपायति गोपायत: गोपायन्ति गोप्स्यति
३।१।२८, ३१

गुह { गूहति गूहत: गूहन्ति, घोच्यति गूहिष्यति,
गूहते गूहेते, गूहिष्यते
घोच्यते ६।४।८९, ८।२।३०, ४१ }
घृष—घर्षति घर्षत: घर्षन्ति, घर्षिष्यति
घ्रा—जिघ्रति जिघ्रत: जिघ्रन्ति, घ्रास्यति ७।३।७८
चम् (आ) आचामति आचामत:, आचामन्ति
आचमिष्यति ७।३।७५
चर—चरति चरत: चरन्ति, चरिष्यति
चल—चलति चलत: चलन्ति, चलिष्यति
जि—जयति जयत: जयन्ति, जेष्यति
ज्वल—ज्वलति ज्वलत: ज्वलन्ति, ज्वलिष्यति
तप—तपति तपत: तपन्ति, तप्स्यति
तॄ—तरति तरत: तरन्ति, तरिष्यति तरीष्यति
त्यज—त्यजति त्यजत: त्यजन्ति, त्यच्यति
त्रै—त्रायते त्रायेते त्रायन्ते, त्रास्यते
त्वर—त्वरते त्वरेते त्वरन्ते, त्वरिष्यते
दन्श—दशति दशत: दशन्ति, दङ्क्ष्यति ८।२।३६
६।४।२५
दह—दहति दहत: दहन्ति, धच्यति, ८।२।३२
दाण—यच्छति यच्छत: यच्छन्ति, दास्यति ७।३।७८
दृश—पश्यति पश्यत: पश्यन्ति, द्रच्यति ७।३।८८
६।१।५८
द्युत—द्योतते द्योतेते द्योतन्ते, द्योतिष्यते

धृ—धरति, धरतः धरन्ति, धरिष्यति
ध्मा—धमति धमतः धमन्ति, ध्मास्यति ७।३।७८
ध्यै—ध्यायति ध्यायतः ध्यायन्ति, ध्यास्यति
नम—नमति नमतः नमन्ति, नंस्यति
निन्द—निन्दति निन्दतः निन्दन्ति, निन्दिष्यति

नी— { नयति नयतः नयन्ति, नेष्यति
नयते नयेते नयन्ते, नेष्यते }

पच— { पचति पचतः पचन्ति, पक्ष्यति
पचते पचेते पचन्ते, पक्ष्यते }

पठ—पठति पठतः पठन्ति, पठिष्यति
पत—पतति पततः पतन्ति, पतिष्यति
पा—पिबति पिबतः पिबन्ति, पास्यति ७.३।७८
बाध—बाधते बाधेते बाधन्ते, बाधिष्यते
बुध—बोधति बोधतः बोधन्ति, बोधिष्यति
भज—भजति भजतः भजन्ति, भक्ष्यति
भाष—भाषते भाषेते भाषन्ते, भाषिष्यते
भास—भासते भासेते भासन्ते, भासिष्यते
भ्रम—भ्रमति भ्रमतः भ्रमन्ति, भ्रमिष्यति
मुद—मोदते मोदेते मोदन्ते मोदिष्यते
मृष—मर्षति मर्षतः मर्षन्ति, मक्ष्यति मर्च्यति
म्ना—मनति मनतः मनन्ति, म्नास्यति ७।३।७८

यज— { यजति यजतः यजन्ति, यक्ष्यति
यजते यजेते यजन्ते, यक्ष्यते }

यत—यतते यतेते यतन्ते, यतिष्यते
यम—यच्छति यच्छतः यच्छन्ति, यंस्यति ७।३।७८

याच— { याचति याचतः याचन्ति, याचिष्यति
याचते याचेते याचन्ते, याचिष्यते }

रच—रचति रचतः रचन्ति, रचिष्यति
रभ—रभते रभेते रभन्ते, रप्स्यते
रम—रमते रमेते रमन्ते, रंस्यते

राज— { राजति राजतः राजन्ति, राजिष्यति
राजते राजेते राजन्ते, राजिष्यते }

रुच—रोचते रोचेते रोचन्ते, रोचिष्यते
रुह—रोहति रोहतः रोहन्ति, रोक्ष्यति

लङ्घ— { लङ्घति लङ्घतः लङ्घिष्यति
लङ्घते लङ्घेते लङ्घिष्यते }

लभ—लभते लभेते लभन्ते लप्स्यते
लोक—लोकते लोकेते लोकिष्यते
वद—वदति वदतः वदन्ति वदिष्यति
वन्द—वन्दते वन्देते वन्दिष्यते
वम—वमति वमतः वमन्ति, वमिष्यति
वस—वसति वसतः वसन्ति वत्स्यति, ७।४।४९

वह— { वहति वहतः वहन्ति वक्ष्यति
वहते वहेते वहन्ते वक्ष्यते }

वृध—वर्द्धते वर्द्धेते वर्द्धन्ते वर्द्धिष्यते
वृष—वर्षति वर्षतः वर्षन्ति वर्षिष्यति
व्यथ—व्यथते व्यथेते व्यथन्ते व्यथिष्यते
शङ्क—शङ्कते शङ्केते शङ्कन्ते शङ्किष्यते
शंस—शंसति शंसतः शंसन्ति, शंसिष्यति

शप— { शपति शपतः शपन्ति शप्स्यति
शपते शपेते शपन्ते शप्स्यते }

शुच—शोचति शोचतः शोचन्ति, शोचिष्यति
शुभ—शोभते शोभेते शोभन्ते शोभिष्यते

श्रि— { श्रयति श्रयतः श्रयन्ति श्रयिष्यति
श्रयते श्रयेते श्रयन्ते श्रयिष्यते }

श्लाघ—श्लाघते श्लाघेते श्लाघन्ते श्लाघिष्यते
ष्ठिव—ष्ठीवति ष्ठीवतः ष्ठीवन्ति, ष्ठेविष्यति ७।३।७५
सद—सीदति सीदतः सीदन्ति, सत्स्यति ७।३।७८
सह—सहते सहेते सहन्ते सहिष्यते
सृ—सरति सरतः सरन्ति, सरिष्यति
सेव—सेवते सेवेते सेवन्ते सेविष्यते
स्पर्द्ध—स्पर्द्धते स्पर्द्धेते स्पर्द्धिष्यते
स्वञ्ज—स्वजते स्वजेते स्वजन्ते स्वङ्क्ष्यते
हस—हसति हसतः हसन्ति हसिष्यति

हृ— { हरति हरतः हरन्ति हरिष्यति
हरते हरेते हरन्ते हरिष्यते }

ह्वे— { ह्वयति ह्वयतः ह्वयन्ति ह्वास्यति
ह्वयते ह्वयेते ह्वयन्ते ह्वास्यते }

अदादिः २।४।७२—'अद' ६।४।१०१, ७।३।१००

गुणः ७।३।८४, गुणाभावः १।१।५, १।२।४, ६।४।१०१

	प्रथमपुरुषस्य			मध्यमपुरुषस्य			उत्तमपुरुषस्य		
	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
लट्	अत्ति	अत्तः	अदन्ति,	अत्सि	अत्थः	अत्थ,	अद्मि	अद्वः	अद्मः
लोट्	अत्तु	अत्ताम्	अदन्तु,	अद्धि	अत्तम्	अत्त,	अदानि	अदाव	अदाम
लङ्	आदत्	आत्ताम्	आदन्,	आदः	आत्तम्	आत्त,	आदम्	आद्व	आद्म
लिङ्	अद्यात्	अद्याताम्	अद्युः,	अद्याः	अद्यातम्	अद्यात,	अद्याम्	अद्याव	अद्याम
लृट्	अत्स्यति	अत्स्यतः	अत्स्यन्ति,	अत्स्यसि	अत्स्यथः	अत्स्यथ,	अत्स्यामि	अत्स्यावः	अत्स्यामः
लृङ्	आत्स्यत्	आत्स्यताम्	आत्स्यन्,	आत्स्यः	आत्स्यतम्	आत्स्यत,	आत्स्यम्	आत्स्याव	आत्स्याम

'इण्' ६।४।७२,८१, ६।१।९०

लट्	एति	इतः	यन्ति,	एषि	इथः	इथ,	एमि	इवः	इमः
लोट्	एतु	इताम्	यन्तु,	इहि	इतम्	इत,	अयानि	अयाव	अयाम
लङ्	ऐत्	ऐताम्	आयन्,	ऐः	ऐतम्	ऐत,	आयम्	ऐव	ऐम
लिङ्	इयात्	इयाताम्	इयुः,	इयाः	इयातम्	इयात,	इयाम्	इयाव	इयाम
लृट्	एष्यति	एष्यतः	एष्यन्ति,	एष्यसि	एष्यथः	एष्यथ,	एष्यामि	एष्यावः	एष्यामः
लृङ्	ऐष्यत्	ऐष्यताम्	ऐष्यन्,	ऐष्यः	ऐष्यतम्	ऐष्यत,	ऐष्यम्	ऐष्याव	ऐष्याम

'जागृ' ७।३।८३, ८५, ७।२।४, ६।१।६, ६।४।११२

लट्	जागर्ति	जागृतः	जाग्रति,	जागर्षि	जागृथः	जागृथ,	जागर्म्मि	जागृवः	जागृमः
लोट्	जागर्त्तु	जागृताम्	जाग्रतु,	जागृहि	जागृतम्	जागृत,	जागराणि	जागराव	जागराम
लङ्	अजागः	अजागृताम्	अजागरुः,	अजागः	अजागृतम्	अजागृत,	अजागरम्	अजागृव	अजागृम
लिङ्	जागृयात्	जागृयाताम्	जागृयुः,	जागृयाः	जागृयातम्	जागृयात,	जागृयाम्	जागृयाव	जागृयाम

लृट् जागरिष्यति जागरिष्यतः जागरिष्यन्ति। लृङ् अजागरिष्यत् अजागरिष्यताम् अजागरिष्यन्

'रुद्' ७।३।९८, ९९, ७।२।७६

लट्	रोदिति	रुदितः	रुदन्ति,	रोदिषि	रुदिथः	रुदिथ,	रोदिमि	रुदिवः	रुदिमः
लोट्	रोदितु	रुदिताम्	रुदन्तु,	रुदिहि	रुदितम्	रुदित,	रोदानि	रोदाव	रोदाम
लङ्	अरोदीत् / अरोदत्	अरुदिताम्	अरुदन्,	अरोदीः / अरोदः	अरुदितम्	अरुदित,	अरोदम्	अरुदिव	अरुदिम
लिङ्	रुद्यात्	रुद्याताम्	रुद्युः,	रुद्याः	रुद्यातम्	रुद्यात,	रुद्याम्	रुद्याव	रुद्याम
लृट्	रोदिष्यति	रोदिष्यतः	रोदिष्यन्ति। लृङ्	अरोदिष्यत्	अरोदिष्यताम्	अरोदिष्यन्			

'विद' ३।१।४१, ३।४।८३, ८।२।७३, ७४

लट्	वेत्ति	वित्तः	विदन्ति,	वेत्सि	वित्थः	वित्थ,	वेद्मि	विद्वः	विद्मः
	वेद	विदतुः	विदुः,	वेत्थ	विदथुः	विद,	वेद	विद्व	विद्म
लोट्	वेत्तु	वित्ताम्	विदन्तु,	विद्धि	वित्तम्	वित्त,	वेदानि	वेदाव	वेदाम
	विदांकरोतु	०कुरुताम्	०कुर्वन्तु,	०कुरु	०कुरुतम्	०कुरुत,	०करवाणि	०करवाव	०करवाम
लङ्	अवेत्	अवित्ताम्	अविदन्,	अवेत् अवेः	अवित्तम्	अवित्त,	अवेदम्	अविद्व	अविद्म
लिङ्	विद्यात्	विद्याताम्	विद्युः,	विद्याः	विद्यातम्	विद्यात,	विद्याम्	विद्याव	विद्याम
लृट्	वेत्स्यति	वेत्स्यतः	वेत्स्यन्ति। लृङ्	अवेत्स्यत्	अवेत्स्यताम्	अवेत्स्यन्			

'हन्'—परस्मै यथा, ६।४।३६, ७।३।५४

लट्	हन्ति	हतः	घ्नन्ति	हंसि	हथः	हथ,	हन्मि	हन्वः	हन्मः
लोट्	हन्तु	हताम्	घ्नन्तु	जहि	हतम्	हत	हनानि	हनाव	हनाम
लङ्	अहन्	अहताम्	अघ्नन्	अहन्	अहतम्	अहत	अहनम्	अहन्व	अहन्म
लिङ्	हन्यात्	हन्याताम्	हन्युः	हन्याः	हन्यातम्	हन्यात	हन्याम्	हन्याव	हन्याम
लृट्	हनिष्यति	हनिष्यतः	हनिष्यन्ति। लृङ्	अहनिष्यत्	अहनिष्यताम्	अहनिष्यन्			

आत्मने यथा १।२।२८

लट्	हते	घ्नाते	घ्नते	हसे	घ्नाथे	हध्वे,	घ्ने	हन्वहे	हन्महे
लोट्	हताम्	घ्नाताम्	घ्नताम्,	हस्व	घ्नाथाम्	हध्वम्	हनै	हनावहै	हनामहै
लङ्	अहत	अघ्नाताम्	अघ्नत,	अहथाः	अघ्नाथाम्	अहध्वम्,	अघ्नि	अहन्वहि	अहन्महि
लिङ्	घ्नीत	घ्नीयाताम्	घ्नीरन्	घ्नीथाः	घ्नीयाथाम्	घ्नीध्वम्,	घ्नीय	घ्नीवहि	घ्नीमहि

'अस' (परस्मै यथा) ६।४।१११, ११९, २।४।५२, ७।३।९६

लट्	अस्ति	स्तः	सन्ति,	असि	स्थः	स्थ,	अस्मि	स्वः	स्मः
लोट्	अस्तु	स्ताम्	सन्तु,	एधि	स्तम्	स्त,	असानि	असाव	असाम
लङ्	आसीत्	आस्ताम्	आसन्,	आसीः	आस्तम्	आस्त.	आसम्	आस्व	आस्म
लिङ्	स्यात्	स्याताम्	स्युः	स्याः	स्यातम्	स्यात,	स्याम्	स्याव	स्याम
लृट्	भविष्यति	भविष्यतः	भविष्यन्ति। लृङ्	अभविष्यत्	अभविष्यताम्	अभविष्यन्			

(आत्मने यथा, व्यति—अस) १।३।१४

लट्	से	साते	सते,	सि	साथे	ध्वे	से	स्वहे	स्महे
लोट्	स्ताम्	साताम्	सताम्,	स्व	साथाम्	ध्वम्	असै	असावहै	असामहै
लङ्	आस्त	आसाताम्	आसत,	आस्थाः	आसाथाम्	आध्वम्,	आसि	आस्वहि	आस्महि
लिङ्	सीत	सीयाताम्	सीरन्,	सीथाः	सीयाथाम्	सीध्वम्	सीय	सीवहि	सीमहि

'शास' ६।४।३४, ३५, ८।३।६०, ६।१।६, ७।१।४, ८।३।७३, ७४

लट्	शास्ति	शिष्टः	शासति,	शास्सि	शिष्ठः	शिष्ठ	शास्मि	शिष्वः	शिष्मः
लोट्	शास्तु	शिष्टाम्	शासतु,	शाधि	शिष्टम्	शिष्ट	शासानि	शासाव	शासाम
लङ्	अशात्	अशिष्टाम्	अशासुः,	अशात् अशाः	अशिष्टम्	अशिष्ट,	अशासम्	अशिष्व	अशिष्म
लिङ्	शिष्यात्	शिष्याताम्	शिष्युः	शिष्याः	शिष्यातम्	शिष्यात,	शिष्याम्	शिष्याव	शिष्याम

लृट् शासिष्यति शासिष्यतः शासिष्यन्ति। लृङ् अशासिष्यत् अशासिष्यताम् अशासिष्यन्

स्वप ७।२।९८, ९९, ७।२।७६,

लट्	स्वपिति	स्वपितः	स्वपन्ति	स्वपिषि	स्वपिथः	स्वपिथ	स्वपिमि	स्वपिवः	स्वपिमः
लोट्	स्वपितु	स्वपिताम्	स्वपन्तु,	स्वपिहि	स्वपितम्	स्वपित	स्वपानि	स्वपाव	स्वपाम
लङ्	अस्वपीत् / अस्वपत्	अस्वपिताम्	अस्वपन्	अस्वपीः / अस्वपः	अस्वपितम्	अस्वपित,	अस्वपम्	अस्वपिव	अस्वपिम
लिङ्	स्वप्यात्	स्वप्याताम्	स्वप्युः	स्वप्याः	स्वप्यातम्	स्वप्यात,	स्वप्याम्	स्वप्याव	स्वप्याम

लृट् स्वप्स्यति स्वप्स्यतः स्वप्स्यन्ति। लृङ् अस्वप्स्यत् अस्वप्स्यताम् अस्वप्स्यन्

'या' ३।४।१११

लट्	याति	यातः	यान्ति,	यासि	याथः	याथ,	यामि	यावः	यामः
लोट्	यातु	याताम्	यान्तु,	याहि	यातम्	यात	यानि	याव	याम
लङ्	अयात्	अयाताम्	अयान् अयुः	अयाः	अयातम्	अयात,	अयाम्	अयाव	अयाम
लङ्	यायात्	यायाताम्	यायुः,	यायाः	यायातम्	यायात,	यायाम्	यायाव	यायाम
लृट्	यास्यति	यास्यतः	यास्यन्ति,	यास्यसि	यास्यथः	यास्यथ,	यास्यामि	यास्यावः	यास्यामः
लृङ्	अयास्यत्	अयास्यताम्	अयास्यन्,	अयास्यः	अयास्यतम्	अयास्यत,	अयास्यम्	अयास्याव	अयास्याम

एवम् 'वा' 'भा' 'स्ना' 'द्रा' 'पा' 'रा' 'ला' 'ख्या' 'मा' 'प्रा' इत्यादयः

वश ६।१।१६

लट्	वष्टि	उष्टः	उशन्ति,	वक्षि	उष्ठः	उष्ठ,	वश्मि	उश्वः	उश्मः
लोट्	वष्टु	उष्टाम्	उशन्तु,	उड्ढि	उष्टम्	उष्ट	वशानि	वशाव	वशाम
लङ्	अवट्	औष्टाम्	औशन्,	अवट्	औष्टम्	औष्ट	अवशम्	औश्व	औश्म
लिङ्	उश्यात्	उश्याताम्	उश्युः,	उश्याः	उश्यातम्	उश्यात	उश्याम्	उश्याव	उश्याम

लृट् वशिष्यति वशिष्यतः वशिष्यन्ति। लृङ् अवशिष्यत् अवशिष्यताम् अवशिष्यन्

'वच' ६।१ १५

लट् वक्ति वक्तः ०, वक्षि वक्थः वक्थ, वच्मि वच्वः वच्मः
लोट् वक्तु वक्ताम् वचन्तु, वग्धि वक्तम् वक्त, वचानि वचाव वचाम
लङ् अवक् अवक्ताम् अवचन्, अवक् अवक्तम् अवक्त, अवचम् अवच्व अवच्म
लिङ् वच्यात् वच्यातम् वच्युः, वच्याः वच्यातम् वच्यात, वच्याम् वच्याव वच्याम
लृट् वक्ष्यति वक्ष्यतः वक्ष्यन्ति। लृङ् अवक्ष्यत् अवक्ष्यताम् अवक्ष्यन्

मृज ८।२।३६, ७।२।११४

लट् मार्ष्टि मृष्टः मार्जन्ति मृजन्ति, मार्क्षि मृष्ठः मृष्ठ, मार्ज्मि मृज्वः मृज्मः
लोट् मार्ष्टु मृष्टाम् मार्जन्तु मृजन्तु, मृड्ढि मृष्टम् मृष्ट, मार्जानि मार्जाव मार्जाम
लङ् अमार्ट् अमृष्टाम् अमार्जन् अमृजन्, अमार्ट् अमृष्टम् अमृष्ट, अमार्जम् अमृज्व अमृज्म
लिङ् मृज्यात् मृज्याताम् मृज्युः मृज्याः मृज्यातम् मृज्यात मृज्याम् मृज्याव मृज्याम
लृट् मार्जिष्यति मार्जिष्यतः मार्जिष्यन्ति। लृङ् अमार्जिष्यत् अमार्जिष्यताम् अमार्जिष्यन्

दरिद्रा ६।४।११४, ११२, ६।१।६, ८।१।४

लट् दरिद्राति दरिद्रितः दरिद्रति, दरिद्रासि दरिद्रिथः दरिद्रिथ, दरिद्रामि दरिद्रिवः दरिद्रिमः
लोट् दरिद्रातु दरिद्रिताम् दरिद्रतु दरिद्रिहि दरिद्रितम् दरिद्रित, दरिद्राणि दरिद्राव दरिद्राम
लङ् अदरिद्रात् ०द्रिताम् अदरिद्रुः अदरिद्राः ०द्रितम् ०द्रित, ०द्राम् ०द्रिव ०द्रिम
लिङ् दरिद्रियात् ०द्रियाताम् दरिद्रियुः दरिद्रियाः ०द्रियातम् ०द्रियात, ०द्रियाम ०द्रियाव ०द्रियाम
लृट् दरिद्रिष्यति दरिद्रिष्यतः दरिद्रिष्यन्ति। लृङ् अदरिद्रिष्यत् अदरिद्रिष्यताम् अदरिद्रिष्यन्

जक्ष ७।३।९८, ९९, ७।२।७६, ७।१।४, ६।१।६

लट् जक्षिति जक्षितः जक्षति जक्षिषि जक्षिथः जक्षिथ जक्षिमि जक्षिवः जक्षिमः
लोट् जक्षितु जक्षिताम् जक्षतु, जक्षिहि जक्षितम् जक्षित जक्षाणि जक्षाव जक्षाम
लङ् अजक्षीत् / अजक्षत् अजक्षिताम् अजक्षुः, अजक्षीः / अजक्षः ०क्षितम् अजक्षित, अजक्षम् अजक्षिव अजक्षिम
लिङ् जक्ष्यात् जक्ष्याताम् जक्ष्युः, जक्ष्याः जक्ष्यातम् जक्ष्यात, जक्ष्याम् जक्ष्याव जक्ष्याम
लृट् जक्षिष्यति जक्षिष्यतः जक्षिष्यन्ति। लृङ् अजक्षिष्यत् अजक्षिष्यताम् अजक्षिष्यन्

चकास् ६।१।६, ७।१।४, ८।२।७३, ७४

लट चकास्ति चकास्तः चकासति, चकास्सि चकास्थः चकास्थ, चकास्मि चकास्वः चकास्मः
लोट् चकास्तु चकास्ताम् चकासतु, चकाद्धि चकास्तम् चकास्त, चकासानि चकासाव चकासाम
लङ् अचकात् अचकास्ताम् अचकासुः, अचकाः / अचकात् ०कास्तम् ०कास्त, अचकासम् अचकास्व अचकास्म

लिङ् चकास्यात् चकास्याताम् चकास्युः, चकास्याः चकास्यातम् चकास्यात चकास्याम् चकास्याव चकास्याम
लृट् चकासिष्यति चकासिष्यतः चकासिष्यन्ति। लृङ् अचकासिष्यत् अचकासिष्यताम् अचकासिष्यन्

अन ७।३।९८,९९, ७।२।७६, ८।४।१९,

लट् अनिति अनितः अनन्ति, अनिषि अनिथः अनिथ, अनिमि अनिवः अनिमः
लोट् अनितु अनिताम् अनन्तु, अनिहि अनितम् अनित, अनानि अनाव अनाम
लङ् आनीत् / आनत् आनिताम् आनन्, आनीः / आनः आनितम् आनित, आनम् आनिव आनिम
लिङ् अन्यात् अन्याताम् अन्युः, अन्याः अन्यातम् अन्यात, अन्याम् अन्याव अन्याम
लृट् अनिष्यति अनिष्यतः अनिष्यन्ति। लृङ् आनिष्यत् आनिष्यताम् आनिष्यन्

श्वस ७।३।९८, ९९, ७।२।७६,

लट् श्वसिति श्वसितः श्वसन्ति, श्वसिषि श्वसिथः श्वसिथ, श्वसिमि श्वसिवः श्वसिमः
लोट् श्वसितु श्वसिताम् श्वसन्तु, श्वसिहि श्वसितम् श्वसित, श्वसानि श्वसाव श्वसाम
लङ् अश्वसीत् / अश्वसत् अश्वसिताम् अश्वसन्, अश्वसीः / अश्वसः अश्वसितम् अश्वसित, अश्वसम् अश्वसिव अश्वसिम
लिङ् श्वस्यात् श्वस्याताम् श्वस्युः, श्वस्याः श्वस्यातम् श्वस्यात, श्वस्याम् श्वस्याव श्वस्याम
लृट श्वसिष्यति श्वसिष्यतः श्वसिष्यन्ति। लृङ् अश्वसिष्यत अश्वसिष्यताम् अश्वसिष्यन्

नु

लट् नौति नुतः नुवन्ति, नौषि नुथः नुथ, नौमि नुवः नुमः
लोट् नौतु नुताम् नुवन्तु, नुहि नुतम् नुत नवानि नवाव नवाम
लङ् अनौत् अनुताम् अनुवन्, अनौः अनुतम् अनुत, अनवम् अनुव अनुम
लिङ् नुयात् नुयाताम् नुयुः, नुयाः नुयातम् नुयात, नुयाम् नुयाव नुयाम
लृट् { नौष्यति नौष्यतः नौष्यन्ति, / नविष्यति नविष्यतः नविष्यन्ति, } लृङ् { अनौष्यत् अनौष्यताम् अनौष्यन्, / अनविष्यत् अनविष्यताम् अनविष्यन्, }

'वी'

लट् वेति वीतः वियन्ति वेषि वीथः वीथ वेमि वीवः वीमः
लोट् वेतु वीताम् वियन्तु वीहि वीतम् वीत वयानि वयाव वयाम
लङ् अवेत् अवीताम् अवियन् / अव्यन् अवेः अवीतम् अवीत अवयम् अवीव अवीम
विधिलिङ् वीयात् वीयाताम् वीयुः वीयाः वीयातम् वीयात वीयाम् वीयाव वीयाम
लृट् वेष्यति वेष्यतः वेष्यन्ति। लृङ् अवेष्यत् अवेष्यताम् अवेष्यन्

'आस'

लट् आस्ते आसाते आसते आस्से आसाथे आध्वे आसे आस्वहे आस्महे
लोट् आस्ताम् आसाताम् आसताम् आस्स्व आसाथाम् आध्वम् आसै आसावहै आसामहै

लङ् आस्त आसाताम् आसत आस्थाः आसाथाम् आध्वम् आसि आस्वहि आस्महि

विधिलिङ् आसीत आसीयाताम् आसीरन् आसीथाः ०याथाम् ०ध्वम् आसीय ०वहि ०महि

लृट् आसिष्यते आसिष्येते आसिष्यन्ते। लृङ् आसिष्यत आसिष्येताम् आसिष्यन्त।

शी ७।१।६, ७।४।२१

लट् शेते शयाते शेरते शेषे शयाथे शेध्वे शये शेवहे शेमहे

लोट् शेताम् शयाताम् शेरताम् शेष्व शयाथाम् शेध्वम् शयै शयावहै शयामहै

लङ् अशेत अशयाताम् अशेरत अशेथाः अशयाथाम् अशेध्वम् अशयि अशेवहि अशेमहि

विधिलिङ् शयीत शयीयाताम् शयीरन् शयीथाः शयीयाथाम् शयीध्वम् शयीय शयीवहि शयीमहि

लृट् शयिष्यते शयिष्येते शयिष्यन्ते। लृङ् अशयिष्यत अशयिष्येताम् अशयिष्यन्त

सू ७।२।४४

लट् सूते सुवाते सुवते सूषे सुवाथे सूध्वे सुवे सूवहे सूमहे

लोट् सूताम् सुवाताम् सुवताम् सूष्व सुवाताम् सूध्वम् सुवै सुवावहै सुवामहै

लङ् असूत असुवाताम् असुवत असूथाः असुवाथाम् असूध्वम् असुवि असूवहि असूमहि

विधिलिङ् सुवीत सुवीयाताम् सुवीरन् सुवीथाः सुवीयाथाम् सुवीध्वम् सुवीय सुवीवहि सुवीमहि

लृट् सोष्यते सोष्येते सोष्यन्ते। लृङ् असोष्यत असोष्येताम् असोष्यन्त

इङ् २।४।५०, आदौ इयङ् ततः आट्

लट् अधीते अधीयाते अधीयते अधीषे अधीयाथे अधीध्वे अधीये अधीवहे अधीमहे

लोट् अधीताम् अधीयाताम् अधीयताम् अधीष्व अधीयाथाम् अधीध्वम् अध्ययै ०यावहै ०यामहै

लङ् अध्यैत अध्यैयाताम् अध्यैयत अध्यैथाः अध्यैयाथाम् अध्यैध्वम् अध्यैयि अध्यैवहि अध्यैमहि

विधिलिङ् अधीयीत अधीयीयाताम् अधीयीरन् अधीयीथाः ०यीयाथाम् ०यीध्वम् ०यीय ०यीवहि ०यीमहि

लृट् अध्येष्यते अध्येष्येते। } लृङ् अध्येष्यत अध्येष्येताम् अध्येष्यन्त
अध्यगीष्यत अध्यगीष्येताम् अध्यगीष्यन्त

'चक्ष' २।४।५४

लट् चष्टे चक्षाते चक्षते, चक्षे चक्षाथे चड्ढ्वे चक्षे चक्ष्वहे चक्ष्महे

लोट् चष्टाम् चक्षाताम् चक्षताम् चक्ष्व चक्षाथाम् चड्ढ्वम् चक्षै चक्षावहै चक्षामहै

लङ् अचष्ट अचक्षाताम् अचक्षत, अचष्ठाः अचक्षाथाम् अचड्ढ्वम् अचक्षि अचक्ष्वहि अचक्ष्महि

लिङ् चक्षीत चक्षीयाताम् चक्षीरन् चक्षीथाः चक्षीयाथाम् चक्षीध्वम् चक्षीय चक्षीवहि चक्षीमहि

लृट् { ख्यास्यति ख्यास्यतः ख्यास्यन्ति, / ख्यास्यते ख्यासीते ख्यास्यन्ते, }　लृङ् { अख्यास्यत् अख्यास्यताम् अख्यास्यन्, / अख्यास्यत अख्यासीताम् अख्यास्यन्त, }

'निह्नु' (आत्मने)

लट्　निङ्क्ते　निह्नाते　निह्नते, निङ्चे　निह्नाथे　निङ्ग्ध्वे, निह्ने　निह्न्वहे निह्न्महे
लोट्　निङ्क्ताम्　निह्नाताम्　निह्नताम्, निङ्क्ष्व　निह्नाथाम् निङ्ग्ध्व　निह्नै　निह्नावहै ०महै
लङ्　अनिङ्क्त　अनिह्नाताम्　अनिह्नत, अनिङ्क्थाः ०ह्नाथाम् अनिङ्ग्ध्वम्, अनिह्नि अनिह्न्वहि ०महि
लिङ्　निह्नीत　निह्नीयाताम् निह्नीरन्, निह्नीथाः ०याथाम् निह्नीध्वम्　निह्नीय　निह्नीवहि ०महि
लृट्　निह्निष्यते　निह्निष्येते　।　लृङ्　अनिह्निष्यत् अनिह्निष्यताम्

'ईड' ७।२।७८

लट्　ईट्टे　ईडाते　ईडते, ईडिषे　ईडाथे　ईडिध्वे, ईडे　ईड्वहे ईड्महे
लोट्　ईट्टाम्　ईडाताम्　ईडताम्, ईडिष्व　ईडाथाम् ईडिध्वम्　ईडै　ईडावहै ईडामहै
लङ्　ऐट्ट　ऐडाताम्　ऐडत,　ऐट्ठाः　ऐडाथाम् ऐड्ढ्वम्,　ऐडि　ऐड्वहि　ऐड्महि
लिङ्　ईडीत　ईडीयाताम् ईडीरन्,　ईडीथाः　ईडीयाथाम् ईडीध्वम्, ईडीय　ईडीवहि ईडीमहि
लृट्　ईडिष्यते　ईडिष्येते　ईडिष्यन्ते। लृङ्　ऐडिष्यत　ऐडिष्येताम् ऐडिष्यन्त,

'क्ष्णु'

लट्　क्ष्णुते　क्ष्णुवाते　क्ष्णुवते　क्ष्णुषे　क्ष्णुवाथे　क्ष्णुध्वे　क्ष्णुवे　क्ष्णुवहे　क्ष्णुमहे
लोट्　क्ष्णुताम्　क्ष्णुवाताम्　क्ष्णुवताम्, क्ष्णुष्व　क्ष्णुवाथाम्　क्ष्णुध्वम्　क्ष्णवै　क्ष्णवावहै क्ष्णवामहै
लङ्　अक्ष्णुत　अक्ष्णुवाताम्　अक्ष्णुवत, अक्ष्णुथाः　अक्ष्णुवाथाम्　अक्ष्णुध्वम्　अक्ष्णुवि अक्ष्णुवहि ०महि
लिङ्　क्ष्णुवीत　क्ष्णुवीयाताम्　क्ष्णुवीरन्, क्ष्णुवीथाः　क्ष्णुवीयाथाम् क्ष्णुवीध्वम्, क्ष्णुवीय क्ष्णुवीवहि ०महि
लृट्　क्ष्णोष्यते　क्ष्णोष्येते　क्ष्णोष्यन्ते। लृङ्　अक्ष्णोष्यत　अक्ष्णोष्येताम् अक्ष्णोष्यन्त,

ईर

लट्　ईर्त्ते　ईराते　ईरते, ईर्षे　ईराथे　ईर्ध्वे　ईरे　ईर्वहे　ईर्महे
लोट्　ईर्त्ताम्　ईराताम्,　ईरताम्, ईर्ष्व　ईराथाम्　ईर्ध्वम्　ईरै　ईरावहै　ईरामहै
लङ्　ऐर्त्त　ऐराताम्　ऐरत,　ऐर्थाः　ऐराथाम्　ऐर्ध्वम्　ऐरि　ऐर्वहि　ऐर्महि
लिङ्　ईरीत　ईरीयाताम्　ईरीरन्　ईरीथाः　ईरीयाथाम्　ईरीध्वम्　ईरीय　ईरीवहि　ईरीमहि
लृट्　ईरिष्यते　ईरिष्येते　ईरिष्यन्ते। लृङ्　ऐरिष्यत　ऐरिष्येताम् ऐरिष्यन्त,

ईश ७।२।७७

लट् ईष्टे ईशाते ईशते ईशिषे ईशाथे ईशिध्वे ईशे ईश्वहे ईश्महे
लोट् ईष्टाम् ईशाताम् ईशताम्, ईशिष्व ईशाथाम् ईशिध्वम् ईशै ईशावहै ईशामहै
लङ् ऐष्ट ऐशाताम् ऐशत, ऐष्ठाः ऐशाथाम् ऐशिध्वम् ऐशि ऐश्वहि ऐश्महि
लिङ् ईशीत ईशीयाताम् ईशीरन् ईशीथाः ईशीयाथाम् ईशीध्वम् ईशीय ईशीवहि ईशीमहि
लृट् ईशिष्यते ईशिष्येते ईशिष्यन्ते । लृङ् ऐशिष्यत ऐशिष्येताम् ऐशिष्यन्त

'स्तु' (एवं यु, रु)—परस्मै यथा, ७।३।९५

लट् स्तौति स्तवीति स्तुतः स्तुवीतः स्तुवन्ति, स्तौषि स्तवीषि स्तुथः स्तुथ स्तवीमि स्तौमि स्तुवः स्तुमः
लोट् स्तौतु स्तवीतु स्तुताम् स्तुवन्तु, स्तुहि स्तुतम् स्तुत स्तवानि स्तवाव स्तवाम
लङ् अस्तवीत् अस्तौत् अस्तुताम् अस्तुवन् अस्तौः अस्तवीः अस्तुतम् अस्तुत अस्तवम् अस्तुव अस्तुम
लिङ् { स्तुयात् स्तुयाताम् स्तुयुः स्तुयाः स्तुयातम् स्तुयात स्तुयाम् स्तुयाव स्तुयाम
{ स्तुवीयात् स्तुवीयाताम् स्तुवीयुः, स्तुवीयाः स्तुवीयातम् स्तुवीयात स्तुवीयाम् स्तुवीयाव स्तुवीयाम
लृट् स्तोष्यति स्तोष्यतः स्तोष्यन्ति । लृङ् अस्तोष्यत् अस्तोष्यताम् अस्तोष्यन्,

आत्मने यथा

लट् स्तुते स्तुवीते स्तुवाते स्तुवते स्तुषे स्तुवीषे स्तुवाथे स्तुध्वे स्तुवीध्वे स्तुवे स्तुवहे स्तुमहे
लोट् स्तुताम् स्तुवीताम् स्तुवाताम् स्तुवताम् स्तुष्व स्तुवीष्व स्तुवाथाम् स्तुध्वम् स्तुवीध्वम् स्तवै स्तवावहै स्तवामहै
लङ् अस्तुत अस्तुवीत अस्तुवाताम् अस्तुवत अस्तुथाः अस्तुवाथाम् अस्तुध्वम् अस्तुवि अस्तुवहि अस्तुमहि
लिङ् स्तुवीत स्तुवीयाताम् स्तुवीरन् स्तुवीथाः स्तुवीयाथाम् स्तुवीध्वम् स्तुवीय स्तुवीवहि स्तुवीमहि
लृट् स्तोष्यते स्तोष्येते स्तोष्यन्ते । लृङ् अस्तोष्यत अस्तोष्येताम् अस्तोष्यन्त,

'ब्रू' परस्मै यथा, ३।४।८४, ८।२।३५, ई ७।३।९३

लट् { ब्रवीति ब्रूतः ब्रुवन्ति ब्रवीषि ब्रूथः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः
{ आह आहतुः आहुः आत्थ आहथुः ० ० ० ०
लोट् ब्रवीतु ब्रूताम् ब्रुवन्तु ब्रूहि ब्रूतम् ब्रूत ब्रवाणि ब्रवाव ब्रवाम
लङ् अब्रवीत् अब्रूताम् अब्रुवन् अब्रवीः अब्रूतम् अब्रूत अब्रवम् अब्रूव अब्रूम
लिङ् ब्रूयात् ब्रूयाताम् ब्रूयुः ब्रूयाः ब्रूयातम् ब्रूयात ब्रूयाम् ब्रूयाव ब्रूयाम
लृट् वक्ष्यति वक्ष्यतः वक्ष्यन्ति । लङ् अवचात् अवचाताम् अवचान्,

(आत्मने, यथा)

लट् ब्रूते ब्रुवाते ब्रुवते ब्रूषे ब्रुवाथे ब्रूध्वे ब्रुवे ब्रूवहे ब्रूमहे
लोट् ब्रूताम् ब्रुवाताम् ब्रुवताम् ब्रूष्व ब्रुवाथाम् ब्रूध्वम् ब्रवै ब्रवावहै ब्रवामहै

लङ् अब्रूत अब्रुवाताम् अब्रुवत अब्रूथाः अब्रुवाथाम् अब्रूध्वम् अब्रुवि अब्रूवहि अब्रूमहि
विधिलिङ् ब्रुवीत ब्रुवीयाताम् ब्रुवीरन् ब्रुवीथाः ब्रुवीयाथाम् ब्रुवीध्वम् ब्रुवीय ब्रुवीवहि ब्रुवीमहि
लृट् वक्ष्यते वक्ष्येते वक्ष्यन्ते। लृङ् अवक्ष्यत अवक्ष्येताम् अवक्ष्यन्त

'दुह' (परस्मै यथा) ८।२।४१, ३७

लट् दोग्धि दुग्धः दुहन्ति धोक्षि दुग्धः दुग्ध दोह्मि दुह्वः दुह्मः
लोट् दोग्धु दुग्धाम् दुहन्तु दुग्धि दुग्धम् दुग्ध दोहानि दोहाव दोहाम
लङ् अधोक् अदुग्धाम् अदुहन् अधोक् अदुग्धम् अदुग्ध अदोहम् अदुह्व अदुह्म
विधिलिङ् दुह्यात् दुह्याताम् दुह्युः दुह्याः दुह्यातम् दुह्यात दुह्याम् दुह्याव दुह्याम
लृट् धोक्ष्यति धोक्ष्यतः धोक्ष्यन्ति। लृङ् अधोक्ष्यत् अधोक्ष्यताम् अधोक्ष्यन् अधोक्ष्यः

(आत्मने यथा)

लट् दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे
लोट् दुग्धाम् दुहाताम् दुहताम् धुक्ष्व दुहाथाम् धुग्ध्वम् दोहै दोहावहै दोहामहै
लङ् अदुग्ध अदुहाताम् अदुहत अदुग्धाः अदुहाथाम् अधुग्ध्वम् अदुहि अदुह्वहि अदुह्महि
विधिलिङ् दुहीत दुहीयाताम् दुहीरन् दुहीथाः दुहीयाथाम् दुहीध्वम् दुहीय दुहीवहि दुहीमहि
लृट् धोक्ष्यते धोक्ष्येते धोक्ष्यन्ते। लृङ् अधोक्ष्यत अधोक्ष्येताम् अधोक्ष्यन्त अधोक्ष्यथाः

'द्विष' २।४।११२ (परस्मै)

लट् द्वेष्टि द्विष्टः द्विषन्ति द्वेक्षि द्विष्ठः द्विष्ठ द्वेष्मि द्विष्वः द्विष्मः
लोट् द्वेष्टु द्विष्टाम् द्विषन्तु द्विड्ढि द्विष्टम् द्विष्ट द्वेषाणि द्वेषाव द्वेषाम
लङ् अद्वेट् अद्विष्टाम् अद्विषन् / अद्विषुः अद्वेट् अद्विष्टम् अद्विष्ट अद्वेषम् अद्विष्व अद्विष्म
विधिलिङ् द्विष्यात् द्विष्याताम् द्विष्युः द्विष्याः द्विष्यातम् द्विष्यात द्विष्याम् द्विष्याव द्विष्याम
लृट् द्वेक्ष्यति द्वेक्ष्यतः द्वेक्ष्यन्ति। लृङ् अद्वेक्ष्यत् अद्वेक्ष्यताम् अद्वेक्ष्यन्

आत्मने (एवं 'काश')

लट् द्विष्टे द्विषाते द्विषते द्विक्षे द्विषाथे द्विड्ढ्वे द्विषे द्विष्वहे द्विष्महे
लोट् द्विष्टाम् द्विषाताम् द्विषताम् द्विक्ष्व द्विषाथाम् द्विड्ढ्वम् द्वेषै द्वेषावहै द्वेषामहै
लङ् अद्विष्ट अद्विषाताम् अद्विषत अद्विष्ठाः अद्विषाथाम् अद्विड्ढ्वम् अद्विषि अद्विष्वहि अद्विष्महि
विधिलिङ् द्विषीत द्विषीयाताम् द्विषीरन् द्विषीथाः द्विषीयाथाम् द्विषीध्वम् द्विषीय द्विषीवहि द्विषीमहि
लृट् द्वेक्ष्यते द्वेक्ष्येते द्वेक्ष्यन्ते। लृङ् अद्वेक्ष्यत अद्वेक्ष्येताम् अद्वेक्ष्यन्त

'लिह' (परस्मै यथा)

लट् लेढि लीढः लिहन्ति लेक्षि लीढः लीढ लेह्मि लिह्वः लिह्मः
लोट् लेढु लीढाम् लिहन्तु लीढि लीढम् लीढ लेहानि लेहाव लेहाम

लङ् अलेट् अलीढाम् अलिहन् अलेट् अलीढम् अलीढ अलेहम् अलिह्व अलिह्म

लिङ् लिह्यात् लिह्याताम् लिह्युः लिह्याः लिह्यातम् लिह्यात लिह्याम् लिह्याव लिह्याम

लृट् लेक्ष्यति लेक्ष्यतः लेक्ष्यन्ति। लृङ् अलेक्ष्यत् अलेक्ष्यताम् अलेक्ष्यन्,

(आत्मने यथा)

लट् लीढे लिहाते लिहते, लिक्षे लिहाथे लीढ्वे लिहे लिह्वहे लिह्महे

लोट् लीढाम् लिहाताम् लिहताम् लिक्ष्व लिहाथाम् लीढ्वम् लेहै लेहावहै लेहामहै

लङ् अलीढ अलिहाताम् अलिहत, अलीढाः अलिहाथाम् अलीढ्वम् अलिहि अलिह्वहि अलिह्महि

लिङ् लिहीत लिहीयाताम् लिहीरन् लिहीथाः लिहीयाथाम् लिहीध्वम् लिहीय लिहीवहि ०महि

लृट् लेक्ष्यते लेक्ष्येते लेक्ष्यन्ते। लृङ् अलेक्ष्यत अलेक्ष्येताम् अलेक्ष्यन्त,

'ऊर्णु' (परस्मै यथा, ७।३।९०, १।२।३, ७।३।९१,

लट् { ऊर्णौति ऊर्णुतः ऊर्णुवन्ति ऊर्णौषि ऊर्णुथः ऊर्णुथ ऊर्णौमि ऊर्णुवः ऊर्णुमः
ऊर्णोति ऊर्णोषि ऊर्णोमि

लोट् { ऊर्णौतु ऊर्णुताम् ऊर्णुवन्तु, ऊर्णुहि ऊर्णुतम् ऊर्णुत ऊर्णवानि ऊर्णवाव ऊर्णवाम
ऊर्णोतु

लङ् और्णोत् और्णुताम् और्णुवन् और्णोः और्णुतम् और्णुत और्णवम् और्णुव और्णुम

लिङ् ऊर्णुयात् ऊर्णुयाताम् ऊर्णुयुः ऊर्णुयाः ऊर्णुयातम् ऊर्णुयात ऊर्णुयाम् ऊर्णुयाव ऊर्णुयाम

लृट् { ऊर्णुविष्यति ऊर्णुविष्यतः ऊर्णुविष्यन्ति
ऊर्णविष्यति ऊर्णविष्यतः ऊर्णविष्यन्ति

लृङ् { और्णुविष्यत् और्णुविष्यताम् और्णुविष्यन्
और्णविष्यत् और्णविष्यताम् और्णविष्यन्

(आत्मने—यथा)

लट् ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊर्णुषे ऊर्णुवाथे ऊर्णुध्वे ऊर्णुवे ऊर्णुवहे ऊर्णुमहे

लोट् ऊर्णुताम् ऊर्णुवाताम् ऊर्णुवताम् ऊर्णुष्व ऊर्णुवाथाम् ऊर्णुध्वम् ऊर्णवै ऊर्णवावहै ०वामहै

लङ् और्णुत और्णुवाताम् और्णुवत और्णुथाः और्णुवाथाम् और्णुध्वम् और्णुवि और्णुवहि ०महि

लिङ् ऊर्णुवीत ०वीयाताम् ०वीरन् ऊर्णुवीथाः ०वीयाथाम् ०वीध्वम् ऊर्णुवीय ०वीवहि ०वीमहि

लृट् { ऊर्णुविष्यते ऊर्णुविष्येते ऊर्णुविष्यन्ते
ऊर्णविष्यते ऊर्णविष्येते ऊर्णविष्यन्ते

लृङ् { और्णुविष्यत और्णुविष्येताम् और्णुविष्यन्त
और्णविष्यत और्णविष्येताम् और्णविष्यन्त

ह्वादिः २।४।७५, ६।१।१०, १।२।४, १।१।५, ७।३।८४

'हु'

	प्रथमपुरुषस्य			मध्यमपुरुषस्य			उत्तमपुरुषस्य		
	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने	एकवचने	द्विवचने	बहुवचने
	सः	तौ	ते	त्वम्	युवाम्	यूयम्	अहम्	आवाम्	वयम्
लट्	जुहोति	जुहुतः	जुह्वति	जुहोषि	जुहुथः	जुहुथ	जुहोमि	जुहुवः	जुहुमः
लोट्	जुहोतु	जुहुताम्	जुह्वतु	जुहुधि	जुहुतम्	जुहुत	जुहवानि	जुहवाव	जुहवाम
लङ्	अजुहोत्	अजुहुताम्	अजुहवुः	अजुहोः	अजुहुतम्	अजुहुत	अजुहवम्	अजुहुव	अजुहुम
लिङ्	जुहुयात्	जुहुयाताम्	जुहुयुः	जुहुयाः	जुहुयातम्	जुहुयात	जुहुयाम्	जुहुयाव	जुहुयाम
लृट्	होष्यति	होष्यतः	होष्यन्ति।	लृङ्	अहोष्यत्	अहोष्यताम्	अहोष्यन्		

भी ६।४।११५

लट्	बिभेति	बिभीतः बिभितः	बिभ्यति	बिभेषि	बिभीथः बिभिथः	बिभीथ बिभिथ	त्रिभेमि	बिभीवः बिभिवः	बिभीमः बिभिमः
लोट्	बिभेतु	बिभीताम् बिभिताम्	बिभ्यतु	बिभीहि बिभिहि	बिभीतम् बिभितम्	बिभीत बिभित	बिभयानि	बिभयाव	बिभयाम
लङ्	अबिभेत्	अबिभीताम् अबिभिताम्	अबिभयुः	अबिभेः	अबिभीतम् अबिभितम्	अबिभीत अबिभित	अबिभयम्	अबिभीव अबिभिव	अबिभीम अबिभिम
लङ्	बिभीयात् बिभियात्	बिभीयाताम् बिभियाताम्	बिभीयुः बिभियुः	बिभीयाः बिभियाः	बिभीयातम् बिभियातम्	बिभीयात बिभियात	बिभीयाम् बिभियाम्	०याव ०याव	०याम ०याम
लृट्	भेष्यति	भेष्यतः	भेष्यन्ति।	लृङ्	अभेष्यत्	अभेष्यताम्	अभेष्यन्		

ह्री ६।४।७७

लट्	जिह्रेति	जिह्रीतः	जिह्रियति	जिह्रेषि	जिह्रीथः	जिह्रीथ	जिह्रेमि	जिह्रीवः	जिह्रीमः
लोट्	जिह्रेतु	जिह्रीताम्	जिह्रियतु	जिह्रीहि	जिह्रीतम्	जिह्रीत	जिह्रयाणि	जिह्रयाव	जिह्रयाम
लङ्	अजिह्रेत्	अजिह्रीताम्	अजिह्रयुः	अजिह्रेः	अजिह्रीतम्	अजिह्रीत	अजिह्रियम्	०ह्रीव	०ह्रीम
लिङ्	जिह्रीयात्	जिह्रीयाताम्	जिह्रीयुः	जिह्रीयाः	जिह्रीयातम्	जिह्रीयात	जिह्रीयाम्	०याव	०याम
लृट्	ह्रेष्यति	ह्रेष्यतः	ह्रेष्यन्ति।	लृङ्	अह्रेष्यत्	अह्रेष्यताम्	अह्रेष्यन्		

'पॄ' पृ इत्येके ७।४।७७, ७।१।१०२ ८।२.३८

लट्	पिपर्त्ति	पिपूर्त्तः पिपृतः	पिपुरति पिप्रति	पिपर्षि ,,	पिपूर्थः पिपृथः	पिपूर्थ पिपृथ	पिपर्म्मि ,,	पिपूर्व्वः पिपृवः	पिपूर्म्मः पिपृमः

लोट्	पिपर्त्तु	पिपूर्त्ताम्	पिपुरतु	पिपूर्हि	पिपूर्त्तम्	पिपूर्त्त	पिपराणि	पिपराव	पिपराम
		पिपृताम्	पिप्रतु	पिपृहि	पिपृतम्	पिपृत	,,	,,	,,
लङ्	अपिपः	अपिपूर्त्ताम्	अपिपरुः	अपिपः	अपिपूर्त्तम्	अपिपूर्त्त	अपिपरम्	०पूर्व्व	०पूर्म्म
		अपिपृताम्	,,	,,	अपिपृतम्	अपिपृत	,,	०पृव	०पृम
लिङ्	पिपूर्यात्	पिपूर्य्याताम्	पिपूर्य्युः	पिपूर्य्याः	पिपूर्य्यातम्	पिपूर्य्यात	पिपूर्य्याम्	०र्याव	०र्याम
	पिपृयात्	पिपृयाताम्	पिपृयुः	पिपृयाः	पिपृयातम्	पिपृयात	पिपृयाम्	०याव	०याम

लृट् परिष्यति परिष्यतः परिष्यन्ति। लृङ् अपरिष्यत् अपरिष्यताम् अपरिष्यन्

'हा' ६।४।११६, ६।४।११७, ६।४।११८, ७।१।४

लट्	जहाति	जहीतः			जहीथः	जहीथ		जहीवः	जहीमः
			जहति,	जहासि			जहामि		
		जहितः			जहिथः	जहिथ		जहिवः	जहिमः
लोट्	जहातु	जहीताम्		जहीहि जहिहि	जहीतम्	जहीत			
			जहतु				जहानि	जहाव	जहाम
		जहिताम्		जहाहि	जहितम्	जहित			
लङ्	अजहात्	अजहीताम्			अजहीतम्	अजहीत		०हीव	०हीम
			अजहुः	अजहाः			अजहाम्		
		अजहिताम्			अजहितम्	अजहित		०हिव	०हिम
लिङ्	जह्यात्	जह्याताम्	जह्युः	जह्याः	जह्यातम्	जह्यात	जह्याम्	जह्याव	जह्याम
लृट्	हास्यति	हास्यतः	हास्यन्ति	हास्यसि	हास्यथः	हास्यथ	हास्यामि	हास्यावः	हास्यामः
लृङ्	अहास्यत्	अहास्यताम्	अहास्यन्	अहास्यः	अहास्यतम्	अहास्यत	अहास्यम्	०स्याव	०स्याम

'ऋ' ६।४।७८, ७।२।७०, ७।४।७७,

लट्	इयर्त्ति	इयृतः	इय्रति	इयर्षि	इयृथः	इयृथ	इयर्म्मि	इयृवः	इयृमः
लोट्	इयर्त्तु	इयृताम्	इय्रतु	इयृहि	इयृतम्	इयृत	इयराणि	इयराव	इयराम
लङ्	ऐयः	ऐयृताम्	ऐयरुः	ऐयः	ऐयृतम्	ऐयृत	ऐयरम्	ऐयृव	ऐयृम
लिङ्	इयृयात्	इयृयाताम्	इयृयुः	इयृयाः	इयृयातम्	इयृयात	इयृयाम्	इयृयाव	इयृयाम

लृट् अरिष्यति अरिष्यतः अरिष्यन्ति। लृङ् आरिष्यत् आरिष्यताम् आरिष्यन्

'मा' एवं 'ओहाङ्' ७।४।७६, ६।४।११३

लट्	मिमीते	मिमाते	मिमते	मिमीषे	मिमाथे	मिमीध्वे	मिमे	मिमीवहे	मिमीमहे
लोट्	मिमीताम्	मिमाताम्	मिमताम्	मिमीष्व	मिमाथाम्	मिमीध्वम्	मिमै	मिमावहै	मिमामहै
लङ्	अमिमीत	अमिमाताम्	अमिमत	अमिमीथाः	०माथाम्	०मीध्वम्	अमिमि	०मीवहि	०मीमहि
लिङ्	मिमीत	मिमीयाताम्	मिमीरन्	मिमीथाः	०याथाम्	मिमीध्वम्	मिमीय	मिमीवहि	मिमीमहि

लृट् मास्यते मास्येते मास्यन्ते। लृङ् अमास्यत अमास्येताम् अमास्यन्त।

'दा' परस्मै यथा—

लट्	ददाति	दत्तः	ददति	ददासि	दत्थः	दत्थ	ददामि	दद्वः	दद्मः
लोट्	ददातु	दत्ताम्	ददतु	देहि	दत्तम्	दत्त	ददानि	ददाव	ददाम
लङ्	अददात्	अदत्ताम्	अददुः,	अददाः	अदत्तम्	अदत्त	अददाम्	अदद्व	अदद्म
लिङ्	दद्यात्	दद्याताम्	दद्युः	दद्याः	दद्यातम्	दद्यात	दद्याम्	दद्याव	दद्याम
लृट्	दास्यति	दास्यतः	दास्यन्ति	दास्यसि	दास्यथः	दास्यथ	दास्यामि	दास्यावः	दास्यामः
लृङ्	अदास्यत्	अदास्यताम्	अदास्यन्	अदास्यः	अदास्यतम्	अदास्यत	अदास्यम्	अदास्याव	अदास्याम

(आत्मने यथा)

लट्	दत्ते	ददाते	ददते	दत्से	ददाथे	दद्ध्वे	ददे	दद्वहे	दद्महे
लोट्	दत्ताम्	ददाताम्	ददताम्	दत्स्व	ददाथाम्	दद्ध्वम्	ददै	ददावहै	ददामहै
लङ्	अदत्त	अददाताम्	अददत,	अदत्थाः	अददाथाम्	अदद्ध्वम्	अददि	अदद्वहि	अदद्महि
लिङ्	ददीत	ददीयाताम्	ददीरन्	ददीथाः	ददीयाथाम्	ददीध्वम्	ददीय	ददीवहि	ददीमहि
